Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

संस्कृतविश्वविद्यालयग्रन्थमालायाः 119 पुष्पम्

श्रीपदार्थदीपिका

प्रधानसम्पादकः
प्रो. मुरलीमनोहरपाठकः
कुलपतिः

सम्पादकः
प्रो. शीतलाप्रसाद उपाध्यायः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
(केन्द्रीयविश्वविद्यालयः)
नवदेहली-110016

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

संस्कृतविश्वविद्यालयग्रन्थमालायाः 119 पुष्पम्

श्रीपदार्थदीपिका

प्रधानसम्पादकः
प्रो. मुरलीमनोहरपाठकः
कुलपतिः

सम्पादकः
प्रो. शीतलाप्रसाद उपाध्यायः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
(केन्द्रीयविश्वविद्यालयः)
नवदेहली-110016

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रकाशक:
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय:
(केन्द्रीयविश्वविद्यालय:)
कुतुबसांस्थानिकक्षेत्रम्
नवदेहली-110016

आई.एस.बी.एन : 81-87987-88-x

प्रकाशनवर्ष : 2023

© श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय:

मूल्यम् : ₹ 210/-

मुद्रक:
अमरप्रिंटिंगप्रैस:
देहली-११०००९
दूरभाष: : 8802451208

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

श्रीहरिः
प्ररोचना

जगदिदं चिदधिष्ठानं परिस्पन्ददेव कामप्यपूर्वां चिच्छक्तेरभिव्यक्तिं प्रचापयति। चिच्छक्तेर्विलास एव संसाराभिधेयः। अयञ्च विलासः प्राणिमात्रमभिलक्ष्य कल्याणाय प्रकल्पितः। किं वा वागर्थयोस्तादात्म्यविशेषात् समग्रापि सृष्टिः विपश्चितां धिया चिदाकारैव। तदेव समष्टिरपि चिच्छक्तिरूपा मनागपि न तद्व्यतिरिक्ता। तदेवाकूतं भवति-

शरीरं त्वं शम्भोः शशिमिहिरवक्षोरुहयुगं
तवात्मानं मन्ये भगवति नवात्मानमनघम्।
अतः शेषःशेषीत्ययमुभयसाधारणतया
स्थितः सम्बन्धो वां समरसपरानन्दपरयोः।। इति।।

सत्यप्यभेदे केनचित् कारुण्यप्रवहेण पिपीलिकां समारभ्य ब्रह्मादिपर्यन्तं यावत्सृष्टिजातमहर्निशमजस्रं निरीक्षमाणा स्वीयनिरीक्षणसमवधानकालविशेषेण समग्रमपि सामर्थ्यं यावत्परिमाणं प्रतिष्ठापयति पराम्बैव। तदेव पुनराह आचार्यः-

जगत्सूते धाता हरिरवति रुद्रः क्षपयते
तिरस्कुर्वन्नेतत्स्वमपि वपुरीशस्तिरयति।
सदापूर्वं सर्वं तदिदमनुगृह्णाति च शिव-
स्तवाज्ञामालम्ब्य क्षणचलितयोर्भ्रूलतिकयोः।। इति।।

एतावदचिन्त्यसामर्थ्यं सन्दधाना लावण्यकारुण्यपरिपूरा दयार्द्रभावभरा अनवद्यकरुणा कृतज्ञैः कथन्नोपास्या? तेन तदपचित्यै सुहृदाचार्यानुकम्पिता, अजिह्मा, समर्चोपचारपद्धतिरवश्यमेवोपज्ञापनीया। सन्त्यप्यनेकाः पद्धतयो

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

बहुविधाः यथासम्प्रदायम् इतिकर्त्तव्यतां ज्ञापयन्ति तथापि विस्पष्टार्जवाभावात् सर्वत्रापि काठिन्यलेशः सुलक्ष्यत एव। तदेव क्लेशमेनमवधार्य काशीवास्तव्येन श्रीशीतलाप्रसादोपाध्यायमहाभागेन वरिवस्यारतेन च गुरोः सदनुग्रहेण अधिगतविधानस्य क्रमविशेषमासाद्य विधिरयमुपज्ञातः।

यद्यपि पूजाविधानेषु सम्प्रदाय एवं शरणम्, तथापि सन्ति बहुविधाः विधयः यत्र सर्वत्र ऐक्यं भवत्येव । किं वा स्वसम्प्रदायशरणानामुपास्तितत्पराणां विपश्चितामयं कल्पद्रुम एव। अतोहं मेने यत् संस्कृतसाहित्यस्य निधये जगत्कल्याणाय च सर्वथा समर्थोयं कृतिविशेषस्तेषां यशः पारेकालमपि प्रतिष्ठाभयिष्यत्येव। तदेव गीयते मया–

शास्त्रीयार्चनपद्धतीः प्रकटयन् सारल्यतः सर्वथा
अज्ञानान्धनिवारणे पटुतरः तिग्मांशुवद्भास्वरः।
नित्यानुष्ठितिसद्विधानमहितो न्यासादिना संयुतः
शुभ्रेणावरणार्चनेन लसितो ग्रन्थस्सतां स्यान्मुदे।।

शास्त्रीयपद्धतिजुषां विदुषां प्रमोदं
व्युत्पित्सुवर्गमुदभावमिहावितन्वन्।
देव्याः शुभामपचितिं प्रकटीचिकीर्षुः
सद्ग्रन्थ एष रसिकान् सकलान् धिनोतु।।

इत्येवं मङ्गलं समीहमानः।

प्रो. मुरलीमनोहरपाठकः
कुलपतिः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सम्पादकीयम्

आगमविषयकाचार्यपरीक्षोत्तीर्णादनु शोधोपाधये मया श्रीकृष्णयामलतन्त्रस्य समालोचनात्मकसंस्करणं रचयितुं निर्णयोऽकारि। मम शोधनिर्देशकः म.म. प. गोपीनाथकविराजमहोदयानां श्रेष्ठशिष्यस्तथा तन्त्रसाहित्यस्य रहस्यार्थवित् प्रो. व्रजवल्लभद्विवेदिमहोदय आसीत्। पूर्णतामुपगते शोधकार्ये विश्वविद्यालयद्वारानिर्धारितपरीक्षकद्वयमध्येऽन्यतम आचार्यश्रीभास्कररायभारती-दीक्षितानां श्रीविद्यापरम्परायाः संवाहको म.म.प.बटुकनाथशास्त्रिखिस्तेमहोदय आसीत्। तदानीमुभाभ्यामपि परीक्षकमहोदयाभ्यां लेशतोऽपि मम परिचयो नासीत्। विश्वविद्यालयः शोधोपाधिहेतुकवाक्परीक्षायै प्रो. खिस्तेमहोदय-मामन्त्रयत्। सम्पन्नायां वाक्परीक्षायां प्रो. खिस्तेमहोदयः मां कस्यचन हस्तलेखस्य सम्पादनायाऽचूचुदत्। पश्चादहं प्रोक्तग्रन्थस्याऽन्येषां हस्तलेखानां तेभ्यो ज्ञानं प्राप्तुमैच्छम्। अन्ये हस्तलेखाः सन्ति न वेति नाहं जानामीति तेनोक्तोऽहं पुनरेकमेव हस्तलेखमाश्रित्य सम्पादनकर्मकाठिन्यं ध्यायन् भूयः संकोचपुरस्सरं तदादिष्टगुरुतरकार्यभरं स्वीकृत्य चैकवर्षाभ्यन्तर एव सम्पादितग्रन्थं तदीयश्रीचरणेषु प्रत्यर्प्ययम्। मम सेवया प्रसादप्रफुल्लित-वदनाम्बुजोऽसौ मां श्रीविद्यायामदीक्षिष्ट तथा यावज्जीवं मां विद्या-दानेनाऽन्वग्रहीत्।

एतद्ग्रन्थप्रकाशनस्य गुरुतरभरं स्वर्गीयाः प्रो. वाचस्पत्युपाध्यायमहोदयाः कुलपतित्वस्य प्रथमकार्यकाल एवागृह्णन् किन्तु दौर्भाग्यादयं ग्रन्थस्तेषां सम्पूर्णकार्यकालेऽपि प्रकाशितो नाभूत्। साम्प्रतं कुलपतीनां प्रो. मुरलीमनोहरपाठकमहोदयानां रुचिविपाकतया ''श्रीपदार्थदीपिका''ऽभिधानो ग्रन्थस्तत्त्वजिज्ञासुपाठकानां साम्मुख्यमुपगच्छति। अस्य नामान्तरं ''श्रीपदार्थव्यवस्था'' अपि। अप्ययदीक्षितस्य निगमागमपरम्परानुसारिणी श्रीविद्यापद्धतिरियम्।

ग्रन्थस्यास्य मातृकापृष्ठसंख्या नवाशीतिमिता, आकारश्च लघीयान्। अस्यां मातृकायां ग्रन्थसन्दर्भाः स्थले-स्थले अस्पष्टाः। अस्याः मातृकायाः

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रतिलिपिकर्त्ता कोऽपि सुदर्शनाभिधो जनः। प्रतिलिपिकालोऽत्र नोल्लिखितः।

श्रीशङ्करभगवत्पादपरम्परायां प्रायः सर्वत्रैव श्रीविद्योपासना स्वीक्रियते। त्रिपुरसुन्दर्युपास्तिस्तावद् द्विविधा-बहिर्यागान्तर्यागभेदात्। बर्हियागः पात्रासादनादिशान्तिस्तवान्तः कर्मसमूहः। अन्तर्यागो नामाधाराद्राजदन्तान्तं तेजस्तन्तोर्विभावनम्, मानसी देवपूजा वा। अन्तर्यागस्त्रिविधः-सकलः, सकलनिष्कलः, निष्कलश्चेति। श्रीचक्रस्य त्रिधा विभावनमेतदनुपदमेव। उपास्यायाः परमेश्वर्यास्त्रीणि रूपाणि भवन्त्युपास्तियोग्यानि-स्थूलं सूक्ष्मं परं चेति। तत्राद्यं करचरणाद्यवयवशीलं मन्त्रसिद्धिमतां चक्षुरिन्द्रियपाणीन्द्रिययो-र्योग्यम् "ततः पद्मनिभां देवीं" इत्यादिना प्रतिपाद्यते। द्वितीयं मन्त्रात्मकं पुण्यवतां श्रवणेन्द्रियवागिन्द्रिययोर्योग्यम्। तृतीयं वासनात्मकं पुण्यवतां मनसो योग्यम्। सत्यपि रूपत्रैविध्ये देव्या भावना द्विविधैव भवति– सरूपा, अरूपा चेति। स्थूलरूपानुसन्धानात्मिका प्रथमा, पररूपानुसन्धानात्मिका चरमा। सूक्ष्मरूपानुसन्धानात्मिकाया विधाया उभयत्राप्युपयोगान्न पार्थक्येन परिगणनम्। अत्र प्रथमाया बहिर्यागत्वेन, चरमाया अन्तर्यागत्वेन व्यपदेशः शास्त्रेषु। तदिदमुभयविधमप्युपासनं मानसव्यापारविशेष एवेति। सा चोपासना मानसक्रियाविशेषरूपा। सा च द्विविधा - तन्मन्त्रजपरूपा, तद्यन्त्रपूजारूपा चेति। जप मानसे चेति धातुपाठस्मृत्या जपस्य मानसक्रियारूपत्वावगमात्। पूजाया अपि ध्यानादिरूपायास्तथात्वात्, उपचारसमर्पणरूपाया अपि न ममेत्याकारकमानससंकल्पैकरूपत्वादिति। उपासनाया मानसव्यापारमात्रत्वेऽपि बहिर्यागे बाह्यपदार्थोपादानकत्वं तस्याङ्गीकर्तव्यमेव। स च पञ्चोपचार-षोडशोपचार-चतुष्षष्ट्युपचारादिभेदेन बहुधा भिद्यते।

अन्ते च ग्रन्थस्यास्य प्रकाशनकर्मणि संलग्नाः श्रीलालबहादुरशास्त्री-राष्ट्रीयसंस्कृतविश्वविद्यालयस्य शोधविभागाध्यक्षाः प्रो. शिवशंकरमिश्रमहोदयाः तत्सहयोगिनः अनुसन्धानसहायकाः डॉ. ज्ञानधरपाठकमहोदयाश्च, एवमेव मुद्रणकर्मणि प्रवृत्ताः अमरप्रिन्टिंगप्रैसयन्त्रालयस्य स्वामिनः श्रीमन्तः विशेषखत्रीमहाशयाः तत्सहयोगिनश्च धन्यवादशतैः सभाज्यन्ते।

—शीतलाप्रसादोपाध्यायः

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रास्ताविकम्

आचार्यश्रीबटुकनाथशास्त्रिखिस्ते
साहित्यविभागाध्यक्षचरः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

गीर्वाणवाणीपरिचरणपरायणानां विदुषां न नामाऽविदितं चतुरधिकशतप्रबन्ध-निर्माणकर्मठानां शिवावतारभूतानां श्रीमदप्पय्यदीक्षितेन्द्राणां महनीयं नामधेयम्। शाङ्करपरम्परायां लब्धोदया दीक्षितेन्द्राः शिवावतारभूता एवाऽभूवन्निति शिवरहस्यादिवचनप्रामाण्यादामनन्ति विद्वांसः। एतेषामनुजन्मानोऽपि भ्रातुरनुगुणाः सकलविद्यापारदृश्वानः श्रीमदाच्चान्दीक्षितनामधेया आसन्निति ज्ञायते। महाकविभिः श्रीनीलकण्ठदीक्षितैर्गङ्गावतरणकाव्ये नलचरितनाटके च कश्चित्परिचयः प्रदत्तः। यथा–

तत्समानप्रभावस्य तदनन्तरजन्मनः।
आसीदाच्चादीक्षितस्य पुत्रो नारायणाध्वरी॥

–गङ्गावतरणकाव्यम् (1.48)

सूत्रधारः– तत्सोदर्यस्य विद्वत्कवेराच्चादीक्षितस्य महिमा केन वर्ण्यते, तथाऽपि किञ्चिद् वर्णितं गुरुरामकविना–

शब्दब्रह्म जगाहुषी जगृहिषी वैशेषिकं साहुषी
तर्कोन्मर्दमुपेयुषी श्रुतिशिखां भाट्टे पदं दाशुषी।
सांख्यार्थानधिजग्मुषी विविदुषी साहित्यमर्माऽखिलं
कस्मिन्नस्य न शेमुषी नृपसभे नाऽपूपुषद् वैदुषीम्॥

–न.च. (1.4)

एतेषामपरमपि 'चारुदीक्षितः' इति नामधेयमासीदिति कलिविडम्बनहस्तलेखादवसीयते। एतेषां समयः प्रायः 1523–1560 ईसवीयाब्दावधिक इति

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

लेखकाः प्रमाणयन्ति। एते च नातिदीर्घायुषः सञ्जाता इत्यनुमीयते। एतेषां द्वौ तनयावभूताम्– ज्येष्ठो नारायणाध्वरी, कनिष्ठश्च अप्पैदीक्षितनामा।

श्रीनारायणाध्वरिणोऽपि विद्वांसः साहित्यरत्नाकरमहावीरचरितप्रभृतिग्रन्थानां टीकाकारा आसन्। एते विशेषतया श्रीदेव्युपासकाः साधका अभूवन्निति नलचरिते 'जगदम्बिकापुरुषावतार'–पदेन निर्दिष्टा नीलकण्ठकवीन्द्रैः। तेषां विषयेऽन्यत्राऽपि तस्यैव कवेरपरा सूक्तिर्विराजते–

नारायणाध्वरीन्द्राय नमोऽस्तु ज्ञानसिन्धवे।
शारदा यत्कटाक्षाणां साऽप्यवेतनकिङ्करा।। इति।

नारायणाध्वरीन्द्रस्य कुटुम्बिनी भूमिदेवीति ख्याता। अनयोर्दम्पत्योः पञ्चपुत्राः समजायन्तः। ते सर्वेऽपि विद्वांसः शिवभक्ता इत्यग्रिमेण पद्येन ज्ञायते–

जयन्ति तनयास्तस्य पञ्च सौभ्रात्रशालिनः।
गर्भदासा महेशस्य कवयश्च विपश्चितः।। इति।

(गङ्गावत.–1/49)

पुत्राणाञ्च नामानि क्रमेण यथा– आच्चान्, नीलकण्ठः, चिन्नप्पधैया, चन्द्रकलावतंसः, अतिरात्रयाजी चेति। तेषु कनिष्ठः अतिरात्रयाजीति स्पष्टमवगम्यते। अयमपि स्वकुलमर्यादानुरूपं शास्त्रेषु लब्धवैदुष्यो काव्यनाटकादिनिर्माणनिपुणश्च सञ्जात इति ज्ञायते। अस्यैव काचिन्नातिविस्तृता कृतिः श्रीपदार्थदीपिका श्रीपदार्थव्यवस्था वा वाराणस्यामेव समुपलब्धा, तद्विषये परिचयरूपेण किञ्चिदुपपादयितुं क्रियते यत्नः।

श्रीशङ्करभगवत्पादपरम्परायां प्रायः सर्वत्रैव श्रीविद्योपासनाऽपि सुतरामभ्यर्हितत्त्वेन स्वीक्रियत इति जानन्ति विद्वांसः। अप्पय्यदीक्षितेन्द्राः सविशेषं भगवति महश्वरे भक्तिभाजः शैवशास्त्रव्याख्यातारश्च समभूवन्नित्यत्र न सन्देहः, परं तेषां श्रीविद्योपास्तिविषये काऽपि कृतिर्नोपलभ्यते, न च तद्विषये ते स्वयमपि सूचयन्तीति मन्ये सुतरां रहस्यत्वाद् अवसराभावाद्वा तैरत्रविषये न लेखनी प्रवर्तितेति। अतिरात्रयज्वनः प्रकृतप्रबन्धोपलब्ध्या

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तेषामेव सम्प्रदायागता सरणिरियमित्युन्नेतुं शक्यम्। यद्यपि अप्पय्यदीक्षितेन्द्रै-रात्मार्पणस्तुतिर्भगवन्तं शिवमुद्दिश्य समुपनिबद्धा। तामेवाऽनुध्यायन् श्रीनीलकण्ठः कविरानन्दसागरस्तवे प्रस्तौति–

त्वय्यर्पितं प्रथममप्पययज्वनैव
स्वात्मार्पणं विदधता स्वकुलं समस्तम्।
का त्वं महेशि कुलदासमुपेक्षितुं मां
को वाऽनुपासितुमहं कुलदेवतां त्वाम्॥

वस्तुतः शिवोपास्तिः शिवशक्त्युभयोपास्तिरूपैवेति शास्त्ररहस्यवेदिनो-ऽवगच्छन्ति। नीलकण्ठस्य वचनाच्च भगवत्या उपास्तिरप्पयदीक्षितानामपि सर्वथा समभ्यर्हिताऽवर्ततेति मन्यामहे।

किञ्च, आत्मार्पणं नाम पूजावसानकाले किमप्यावश्यकं कृत्यमिति तत्तत्पद्धतिदर्शनान्निश्चीयते, यथा चाऽस्यामेव श्रीपदार्थदीपिकापद्धत्यामन्तिमे भागे पङ्क्तयः– 'तत् स्वकृतकर्मसमर्पणपूर्वकम् आत्मनिवेदनं कुर्यात्– इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्-स्वप्न-सुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्याम् उदरेण शिश्ना यत् स्मृतं यदुक्तं यत्कृतं तत् सर्वं ब्रह्मार्पणं भवतु स्वाहा। मां मदीयञ्च सकलम् अस्मत्स्वामिन्यै श्रीमहात्रिपुरसुन्दर्यै नम इति सम्यगर्पयेत्' इति।[1]

एभिः प्रमाणैरियमप्पय्यदीक्षितपरम्परानुसारिणी पद्धतिरस्तीति निःसन्देहं शक्यते वक्तुम्।

अप्पय्यदीक्षितेन्द्राणां नीलकण्ठे विशेषतश्च स्नेहो दीक्षितेन्द्रैराशीर्वादप्रदान-ञ्चेत्यादि वृत्तं प्रसिद्धमेव। नीलकण्ठदीक्षितस्य समय ईसवीयाब्ददृष्ट्या 1576 कालादारभ्य 1660 पर्यन्तमासीत्। तदनुषङ्गेण अतिरात्रयज्वनोऽपि तत्समान एव काल उन्नीयते।

महाराष्ट्रभाषायां नीलकण्ठकवीन्द्रस्य समग्रं जीवनं तदीयं ग्रन्थनिर्माणाद्य-वदानञ्च नागपुरस्थेन प्रो. केशवरामरावजोशीमहाशयेन भूरि परिश्रम्योपनिबद्धम्,

1. श्रीपदार्थदीपिका (पृ. 93)

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तत एव भूयांसः सन्दर्भा उपलभ्यन्ते। तस्मिन्नपि प्रबन्धे अतिरात्रयज्वनस्त्रय एव प्रबन्धा उपलभ्यन्त इत्युक्तम्। ते च यथा–1. कुशकुमुद्वतीयं नाटकम्, 2. त्रिपुरविजयचम्पूः, 3. चित्रमीमांसादोषधिक्कारश्चेति। तेनास्य पद्धतिग्रन्थस्य सर्वथा प्राथम्येनोपलब्धिरस्तीति प्रमोदमादध्याद् गवेषकाणाम्।

अतिरात्रयज्वाऽपि पाण्डित्यप्रकर्षमासाद्य सर्वैः सम्मानितोऽभवदिति तदीयोक्त्या प्रतीयते। यथा–

यन्नारायणदीक्षितेन्द्रतनुभूसाधारणं घुष्यते
यच्च श्रीयुतनीलकण्ठमखिनः सोदर्यतालक्षणम्।
विद्वांसस्तदिदं समस्तमधुना श्रीकण्ठदासस्य मे
लक्ष्यन्तामतिरात्रयाजिन इतः पाण्डित्यमत्यद्भुतम्॥

(त्रिपुरविजयचम्पूः)

अस्य ज्येष्ठे भ्रातरि गुरुबुद्धिर्महानादरश्चेति प्रकृतपद्धतिसन्दर्भैर्निश्चीयते, तदग्रे सप्रमाणमुपदर्शयामः।

कुशकुमुद्वतीयनाटकप्रस्तावनायां श्रीनीलकण्ठकविविषये गौरवमात्मनश्च तच्छिष्यतां सूचयति सोऽयमतिरात्रयज्वा। तथा हि तत्रत्यः सन्दर्भः–

"**पारिपार्श्वकः**– अथ श्रीहालास्यचैत्रोत्सवयात्रामार्यमिश्राः समापतन्ति। किं समापतन्ति इति? (परिषदं निर्वर्ण्य) (सानन्दम्) अथवा किमभिमतेति। सर्वस्याऽपि प्रार्थितदुर्लभैवैषा। यतः–

विद्वद्वादविवादकालयुगपद्विस्फूर्त्यहंपूर्विका-
निर्यद्युक्तिसहस्रदर्शितनिजाहीन्द्रावताराकृतिः।
कर्तुं कारयितुं तथा रसयितुं नव्यानि काव्यान्यलं-
भूष्णुर्भाति सभासभाजितमतिः श्रीनीलकण्ठाध्वरी॥

सूत्रधारः–अयं किल भरद्वाजकुलपारावारपारिजातः सकलकलासाम्राज्य-सिंहासनाधिपतिस्तत्रभवतो नारायणाध्वरिणरूपः परिपाकः, कर्ता काव्यानां, व्याकर्ता, तन्त्राणाम्, आहर्ता क्रतूनां, व्याहर्त्ता सकलनृपसभेषु, दिगन्तविश्रान्त-

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कीर्त्तिरपारमहिमा, मानवाकृतिः साक्षादेव दाक्षायणीवल्लभः, श्रीकण्ठमत-सर्वस्ववेदी श्रीनीलकण्ठाध्वरी।

नटी–(उरसि हस्तं निधाय) न चैतं न जानामि। एष खलु द्वितीयशङ्कररूपाणाम् अप्पयदीक्षितानां........नप्ता नलचरितनाटकप्रबन्द्धा।

सूत्रधारः–अथ किम्। ज्ञातस्तवाभिप्रायः।

स्वादूनेव रसान् कटून् विदधतां कर्षन्तु मामेति च
क्रन्दत्येव पदानि वा कवयतां कुर्वन्तु लज्जां च वा।
कुत्रैको मधुरो रसः क्व मधुरा वाणीति नो जीवतां
कर्णौ निष्करुणां दहन्ति कवयः कस्मादिदानीन्तनाः॥

इत्यतो नलचरितश्लोकाद्भीताऽसि। मा मैवम्।

तच्छिक्षया परिणतं तदतिप्रियञ्च
तत्कर्णधारितमभूदपि यस्य काव्यम्।
तेनेदमद्य निरवद्यरसानुसारि
तेने नवं प्रकरणं तदिह प्रयोज्यम्॥

नटी–कुत्र तन्नाटकम्?

सूत्रधारः–नन्वस्यैव सभानेतुरनुजन्मा विदितवेदितव्यः कविलोकमित्र-मतिरात्रयाजी।

नटी–युज्यते, युज्यते। कोऽन्य ईदृशांनेरवद्यरसकविकर्मनिर्माता।

एवमतिरात्रयज्वनो नीलकण्ठविषये महानादरः, तदीयशिक्षागौरवञ्च सम्यगनुभूयते। एवमेव शृङ्गारकोषभाणे नीलकण्ठसुतो गीर्वाणेन्द्रनामा स्वपितुर्गौरवं विद्यासु वैचक्षण्यमाचष्टे। द्वाविमौ गीर्वाणेन्द्र-अतिरात्रयाजिनौ श्रीनीलकण्ठस्य काव्यकलां वैदुषीञ्च सविशेषमनुहरतः।

अतिरात्रयज्वनः किमप्यन्यदपि नाम स्यान्न वा इति न ज्ञायते, सर्वत्रैकेनैव नाम्ना तदुल्लेखो दृश्यते। श्रीपदार्थदीपिकाया आद्यन्तसन्दर्भेणाऽपि कश्चित्- परिचयविशेषो निर्णीयते। यथा ग्रन्थावसाने पुष्पिकेयम्–

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्धनिर्वाहकश्रीमदप्पयदीक्षितसोदर्यश्रीमदाचार्यदीक्षितपौत्रेण श्रीनारायणदीक्षितात्मजेन श्रीनीलकण्ठदीक्षितानुजेन श्रीमदतिरात्रयाजिना विरचिता श्रीपदार्थव्यवस्था समाप्ता" इति।[1]

ग्रन्थारम्भे मङ्गलाचरणादि यथा[2]–

प्रस्विन्नाननपद्ममाकुलकरप्रेङ्खत्क्वणत्कङ्कणं
संरम्भश्लथमौलिमाल्यमसकृद्व्यालोलहारावलि।
वाग्देवीशरदिन्दुसुन्दररुचोर्वादान्मिथः कुर्वती
पश्यन्ती परदेवताऽवतु दरोपक्रान्तमन्दस्मिता॥
अन्तर्लीनविमर्शप्रकाशरूपं समस्तमन्त्रनुतम्।
श्रीगीर्वाणेन्द्रमहं प्रणमामि गुरुं परे व्योम्नि॥

अत्र द्वितीयपद्ये परिवर्णिताः श्रीगीर्वाणेन्द्रसरस्वतीनामधेयाः काञ्चीपीठाधिष्ठिताः शङ्कराचार्यचरणा एव प्रतीयन्ते। एते च श्रीनीलकण्ठकवीन्द्राणामतिरात्रयज्वनाञ्चोपासनायां दीक्षागुरवोऽपि बभूवुरिति कथने नाऽस्ति संशीतिः। नीलकण्ठप्रणीतं गुरुराजस्तवाभिधानमेकं स्तोत्रमप्युलभ्यते, तत्र क्वचित्काश्चन पङ्क्तयो विलुप्ताः सन्ति। तत्रत्यवर्णनेन गीर्वाणेन्द्राणां माहात्म्यमुच्चैरनुभूयेत। श्रीगीर्वाणेन्द्रसरस्वतीचरणाः प्रपञ्चसारसङ्ग्रहनिर्मातारः प्रसिद्धाः। तच्च नीलकण्ठदीक्षितेन स्फुटमुपश्लोकितं यथा–

तत्त्वज्ञानकलापदाक्षरमनून् शैवान् षडप्यध्वनः
संशोध्यैव चिरन्तनैश्च गुरुभिः केचित् क्वचित्तारिताः।
एकेनैव तु सारसंग्रहकृतिव्यक्तेन मन्त्राध्वना
गीर्वाणेन्द्रगुरुर्विश्रृङ्खलमवत्याप्रौढमूढं जगत्॥

अन्यत्राऽपि गुरुविषये तदुक्तयो भक्तिनिर्भरा अनुभूयन्ते। यथा–

---

1. श्रीपदार्थदीपिका (पृ. 97–98)
2. तत्रैव (पृ. 1)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सर्वारम्भपराङ्मुखस्य जरया भग्नस्य रुग्णस्य मे।
गीर्वाणेन्द्रसरस्वतीचरणयोश्चिन्ता परं तारिका।। इति।

उद्भूतस्मितमुत्प्रबन्धकरुणाकल्लोललोलेक्षणं
त्रय्यन्तामृत्तवर्षिधर्षितपराहङ्कारशङ्कारवम्।
एकं तद्वदनाम्बुजं कुलगुरोर्भक्त्या निदिध्यासतः
पञ्चाहो परितः स्फुरन्ति युगपद्वक्त्राणि चित्राणि मे।।

एवमादिभिर्भावार्द्रैः पदैः स्तुवन् नीलकण्ठकविर्गुरोर्माहात्म्यमभिव्यनक्ति। अतिरात्रयज्वाऽपि मङ्गलाचरणे तमेव गुरुं भजत इति द्वयोरपि सहोदरयोः श्रीगीर्वाणेन्द्रा एव दीक्षागुरुवोऽपि भवेयुरिति कल्पना नाऽसङ्गता स्यात्। स्तुतिपद्ये प्रकाशविमर्शात्मकशैवशास्त्रीयमूलसत्त्वरूपेण गुरुप्रणतिः प्रसङ्गौचित्यमनुबन्धाति।

काञ्चीपीठपरम्पराया ऐतिह्ये श्रीगीर्वाणेन्द्रचरणानां विशदं वृत्तं सङ्गृहीतं भवेदिति सम्भावयामि। नीलकण्ठादीनां महाविदुषामुक्तिभिरेव तादृशस्य महात्मनो गुरोः स्वरूपं किञ्चित्लक्ष्यते। मङ्गलाचरणानन्तरमत्रप्रबन्धे किमप्युपोद्घातरूपेण लिखितमतिरात्रयोजिना। तत्र शिवानन्दलहर्यां यदप्पय-दीक्षितेन्द्रचरणैः परतत्त्वविषये निरूपितम्, तदेवाऽत्र ग्राह्यमित्युक्तम्। अग्रे चोपासनाविषय उपक्रमोपसंहारादिविचाराणां बहुत्वाद् दुरवगाहत्वाच्च श्रीनीलकण्ठप्रणीतग्रन्थानुसारेणैव पद्धतिरियं निबद्धेत्युक्तम्। तथा च तत्रत्या पङ्क्तिः– सकलतन्त्रोपसंहारक्षमसर्वतन्त्रस्वतन्त्रश्रीमूलदेवताऽपरविग्रह-श्रीनीलकण्ठदीक्षितैरस्मज्ज्येष्ठचरणै शिष्यानुग्रहाय कृतं बहुमीमांसान्यायदुरवगाहं सौभाग्यचन्द्रातपमनुसृत्य व्यवस्था प्रदर्श्यत इति।[1] अयं सौभाग्यचन्द्रातपग्रन्थो-ऽप्यत्रैव प्रथमतया समुल्लिखितो दृश्यते, नीलकण्ठकृतिषु कुत्रापि तच्चरित-लेखकैर्न निर्दिष्टः। अत्रैवोपोद्घाते शैवतन्त्राणां प्रामाण्येऽपि शक्तितन्त्राणां क्वचिद्वामाचारप्राधान्ये कथं प्रामाण्यमित्यादिपूर्वपक्षमुपक्षिप्य वेदाऽविरुद्धांशे चिच्छक्त्युपासनायाश्च प्रत्यक्षश्रुतिनिर्देशात् प्रामाण्यमेवेत्यादि व्यवस्थापितम्। उपोद्घातानन्तरं पद्धतिक्रमेण ब्राह्ममुहूर्तोत्त्थानादिसाधकचर्या प्रदर्शिता। स्थले-

---

1. श्रीपदार्थदीपिका (पृ. 2)

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

स्थले कर्मणां संक्षेपविस्तरविषये अङ्गाङ्गिभावादौ च विचारोऽपि समाहितः। यथा–

"हृदि सामान्यसमयी चिन्तयेत् परमेश्वरम्।
विशेषसमयी बिन्दौ मूर्ध्नि निर्वाणदीक्षितः।।

इत्यस्मत्पितामहचरणोक्तरीत्या यथाधिकारं हृदयादिषु देवीं ध्यायेत्" इति।[1]

"अजपाविधानं प्रातरेव कर्तव्यमिति नियमाऽभावाद् अग्रे वक्ष्यते" इति।[2]

"सकलं श्रौतस्मार्तसंस्कारकर्मसु प्रधानकर्मानुष्ठानसमये मूलविद्या स्मर्त- व्येत्याचाराह्निकयोश्च वैदिकतान्त्रिकयोः समुच्चयस्तत्रापि वैदिक-(मादौ) तान्त्रिकस्य तु पश्चात्कर्तव्यतेति....तदनुसारिप्रयोगो लिख्यते" इति।[3]

"यद्यपि भूतशुद्धिप्रकारा बहवः सन्ति, चन्द्रातपे च रत्नकोषोक्त-प्रकारावेव प्रदर्शितौ, तथापि लाघवानुसारेण प्रपञ्चसारसङ्ग्रहेऽस्मद्गुरु-चरणोक्तरीत्या तत्प्रकारः कथ्यते" इति।[4]

"अस्मद्गुरुचरणास्तु– अशक्तश्चेद् भूतशुद्धिस्थाने केवलमातृकान्यासमेव कुर्याद् इत्याहुः" इति।[5]

"बहुमन्त्रविद्भिस्तावन्मन्त्रजपाशक्तौ मातृकैव जप्ता, उक्तमन्त्रजप-प्रत्याम्नायरूपा भवतीत्युपदेशः"[6] इतीत्यादिरूपेण तत्तत् स्थलेषु विचारोऽपि विहितः।

कामकलाविषये मातृकादिस्वरूपे च सूक्ष्म-सूक्ष्मतरा भावनाप्रकाराश्च यथास्थानं निवेशिताः सन्ति। विशेषतश्च प्रत्यक्षगुरुमुखावगततत्त्वजालस्य

1. श्रीपदार्थदीपिका (पृ. 5)
2. तत्रैव (पृ. 9)
3. तत्रैव (पृ. 9)
4. तत्रैव (पृ. 17)
5. तत्रैव (पृ. 18)
6" तत्रैव (पृ. 20)

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

लेखकस्य क्रियाभिज्ञत्वं सम्प्रदायानुसारित्वञ्च प्रामाण्यमावहति। अस्यां पद्धत्यां बहूनां सन्दर्भग्रन्थानामुल्लेखोऽपि विहितः। तेषु प्रायेण निम्नाङ्किता दृश्यन्ते—यथा कामिकम्, वातुलम्, बृहत्कालोत्तरम्, योगिनीहृदयम्, चतुःशती-शास्त्रम्, कल्पसूत्रम्, दक्षिणामूर्त्तिसंहिता, तन्त्रराजः, कालिकापुराणम्, देव्यागमः, रुद्रयामलम्, कामकलाविलासः, शिवार्कमणिदीपिका इत्यादयः।

अस्य ग्रन्थस्य मूलस्वरूपात् प्रतिलिपिरियं विहिता केनाऽपि सुदर्शननाम्ना पुरुषेण। तस्य संस्कृतभाषायां व्युत्पत्तिः सम्यङ्नास्तीति लेखकप्रमादादवसीयते। लेखकश्च कश्चिदुत्तरभारतीय एवास्ति। प्रतिलिपिकालस्तु क्वापि नोल्लिखितः; तथापि पुस्तकं प्राचीनमेव प्रतीयते। मध्ये मध्ये हरिताललेपेन मार्जनं शोधनं च व्यधायि। पुस्तकपृष्ठसंख्या 89 नवाशीतिमिता, आकारश्च लघीयान्। सन्दर्भाः क्वचित् क्वचिदस्पष्टा विभाव्यन्ते। मुद्रणावसरे सपरिश्रमं संशोधनमावश्यकं भवेत्। एतत्पुस्तकोपलब्ध्या श्रीमतामप्पयदीक्षितानां श्रीविद्यापारम्परीज्ञानं सुलभं जातमिति प्रमोदस्थानं शास्त्राध्ययनशीलानामुपासना-तत्त्वविविदिषूणां मनीषिणामिति।

पूर्वपरिचयलेखनानन्तरमधुना सौभाग्यात् मुद्रणावसरः प्राप्त इति सप्रमोदं किञ्चिदावश्यकं लिख्यते। एतत्पुस्तकसम्पादनकर्मणि दर्शितोत्साहेन सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयाऽऽगमतन्त्रविभागाध्यापकेन श्रीशीतला-प्रसादोपाध्यायशर्मणा सोत्साहं ग्रन्थपङ्क्तिशोधने सन्दर्भग्रन्थानामुद्धरणे तत्तदपेक्षितविषयसूचीनिर्माणे तथाऽन्येष्वपि विषयेषु बहुपरिश्रम्य मुद्रणार्हं परिष्कृतञ्च स्वरूपमुपपादितमिति तस्मै भूयसः साधुवादान् आशीर्वचांसि चोपहरामि। स्वविवक्षितञ्च हिन्दीभाषायामेतेन संयोजितं तत्तदेवाऽवगन्तव्यम्। मन्ये नूतनोपलब्धस्याऽस्य ग्रन्थरत्नस्य प्रकाशनेन मार्मिकाणां विदुषां परितोषः स्यात्। इति।

—बटुकनाथशास्त्रिखिस्ते

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विषयानुक्रमणिका

प्ररोचना	iii-iv
सम्पादकीयम्	v-vi
प्रास्ताविकम्	vii-xv
उपोद्घातप्रकरणम्	1
प्रातःस्मृतिः (गुरुपूजा)	3
मन्त्रध्यानम्	4
देवतास्मरणम्	5
प्रातःकृत्यम्	9
भस्मधारणम्	11
त्रिपुण्ड्रधारणम्	13
सन्ध्याकृत्यम्	13
यागगृहप्रवेशनम्	15
प्राणायामः	16
आत्मशुद्धिः	17
प्राणप्रतिष्ठा	18
मातृकान्यासः	19
षोढान्यासः	21
– गणेशन्यासः	21
– ग्रहन्यासः	23
– नक्षत्रन्यासः	24
– योगिनीन्यासः	26
– राशिन्यासः	33

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

– पीठन्यासः	34
श्रीचक्रन्यासः	36
– संहारन्यासः	36
– सृष्टिन्यासः	41
चक्रेश्वरीनवकन्यासः	45
आन्तरभावनालक्षणश्रीचक्रन्यासः	46
करशुद्धिन्यासः	47
आसनन्यासः	47
षडङ्गन्यासः	47
श्रीकण्ठन्यासः	48
वाग्देवतान्यासः	50
कामेश्वर्यादिन्यासः	50
तत्त्वत्रयन्यासः	50
अमृतप्लावनम् (परान्यासः)	51
मूलविद्यान्यासः	52
आन्तरपूजा	53
वैश्यदेवम्	55
बाह्यपूजा	56
कलशादिप्रतिष्ठा	56
सामान्यार्घ्यस्थापनम्	57
विशेषार्घ्यस्थापनम्	57
आत्मपूजा	61
पीठार्चनम्	62
योगपीठपूजा	64
श्रीचक्रराजे देव्यावाहनम्	65
षोडशोपचाराः	66
तिथिनित्यापूजा	67
गुरुपङ्क्तिपूजा	70

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

आवरणपूजा	70
– प्रथमावरणपूजनम्	70
– द्वितीयावरणपूजनम्	74
– तृतीयावरणपूजनम्	76
– चतुर्थावरणपूजनम्	77
– पञ्चमावरणपूजनम्	78
– षष्ठावरणपूजनम्	79
– सप्तमावरणपूजनम्	80
– अष्टमावरणपूजनम्	81
– नवमावरणपूजनम्	83
धूपदीपादिसमर्पणम्	84
निवेद्यसमर्पणम्	85
बलिप्रदानम्	85
आरात्रिकम्	86
कामकलाध्यानम्	87
आत्मरक्षाविधानम्	88
अन्तर्मातृकान्यासभावना	89
जपप्रकारः	90
आत्मनिवेदनम्	93
प्रदक्षिणम्	94
निर्माल्यवासिनीपूजा	95
भोजनविधानम्	95

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

श्रीपदार्थदीपिका

प्रस्विन्नाननपद्ममाकुलकरप्रेङ्खत्क्वणत्कङ्कणं
संरम्भश्लथमौलिमाल्यमसकृद्व्यालोलहारावलि।
वाग्देवी शरदिन्दुसुन्दररुचोर्वादान्मिथः कुर्वती
पश्यन्ती परदेवताऽवतु दरोपक्रान्तमन्दस्मिता॥

अन्तर्लीनविमर्शप्रकाशरूपं समस्तमन्त्रनुतम्।
श्रीगीर्वाणेन्द्रमहं प्रणमामि गुरुं परे व्योम्नि॥

अस्ति तावत्समस्तवेदान्तवाक्यपरमप्रेमास्पदं तदुपबर्हणेतिहासपुराणाद्युद्धुष्टं सच्चिदानन्दात्मकमानन्त्यनिर्गुणत्वनिष्कलत्वाद्युपलक्षितमपरोक्षं ब्रह्म। तदेव शिवतत्त्वमिति शैवागमेषु शक्तितन्त्रेषु च प्रसिद्धम्। तत्र सकलवैषयिकसुखकणिका महासमुद्रायमाणनित्यनिरतिशयानन्दलहरीरूपा शैवी चिच्छक्तिरित्युपनिषदभ्यस्तदुपबर्हणेभ्यः पुराणादिभ्यस्तदविरुद्धशैवशक्तितन्त्रेभ्यश्च ज्ञायत एव विदितपदपदार्थसङ्गतिकेन पुरुषेण।

इदं च सप्रपञ्चं निरूपितमस्मत्पितामहचरणैः शिवानन्दलहर्यामिति[1] नेह किञ्चिदुपपादनीयम्।

तस्याश्च परदेवताया विधिवदाराधिताया ऐहिकानुरोधेनापवर्गप्रदातृत्वं धर्मिग्राहकमानसिद्धमिति न तदप्युपपादनमपेक्षते। तदिहैहिकानुबन्ध्यपवर्गकानां तदाराधने कर्तव्ये तदितिकर्तव्यतायाः

1. श्रीमदप्पयदीक्षितप्रणीता शिवानन्दलहरी आनन्दलहरीति वा एक एव ग्रन्थ इति प्रामाणिकैरनुमन्यते। आनन्दलहरी तद्व्याख्या च वाणीविलासमुद्रणालयतः (सन् 1908 ई.) मुद्रितोपलभ्यते।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शक्तितन्त्रबाहुल्यात् तदुपसंहारक्षमैः पद्धतिकारैर्विविधमुपपादितायास्सकलतन्त्रोपसंहारक्षमसर्वतन्त्रस्वतन्त्रश्रीमूलदेवताऽपरविग्रहश्रीनीलकण्ठदीक्षितैरस्मज्ज्येष्ठचरणैः शिष्यानुग्रहाय कृतं बहुमीमांसान्यायदुरवगाहं सौभाग्यचन्द्रातपमनुसृत्य व्यवस्था प्रदर्श्यते।

ननु शैवागमानां मोहशास्त्रत्वप्रतिपादककौर्मवचनस्य वामपाशुपतविषयत्वे सिद्धे तेषां वेदार्थसन्दर्भरूपाणां वेदबोधितकर्तव्यताकशिवपूजनापेक्षितेतिकर्तव्यताबोधकानां वेदविरोधाऽभावेन श्रीमदप्पयदीक्षितोक्तरीत्या भवतु प्रामाण्यम्[2], कथं शक्तितन्त्राणां कूर्मवचनावगतमोहशास्त्रत्वानां वेदविरुद्धवामाचारतात्पर्यकाणां प्रामाण्यम्? तथा च तदुपजीवनेन ग्रन्थकरप्रयासो व्यर्थ इति चेत्, अत्र ब्रूमः–

न तावत् ग्रन्थारम्भवैयर्थ्यं मन्त्रदेवतातदुपासनाङ्गप्रत्यक्षश्रुतिप्रतिपन्नतया तदुपासनाङ्गसकलार्थव्यवस्थायाः कर्तव्यत्वात्, नाऽपि तन्त्रोपजीवने वैयर्थ्यं तन्त्राणामपि वेदाऽविरुद्धांशेष्वापाततः प्रामाण्यस्य केनाऽपि वारयितुमशक्यत्वात्।

एवं सञ्चोदितो रुद्रो माधवेन मुरारिणा।
चकार मोहशास्त्राणि केशवोऽपि शि[वेरितः]॥
कापालं लागुडं शाक्तं भैरवं पूर्वपश्चिमम्।
पाञ्चरात्रं पाशुपतं [तथान्यानि सहस्रशः]॥

(कू.पु. 1.15.112–113)

---

2. अयं विषयः श्रीमदप्पयदीक्षितैः ब्रह्मसूत्रव्याख्यानरूपायां शिवार्कमणिदीपिकायां (ब्रह्मसूत्र, 2/2/38) सम्यक् विचारितः। इत्थमेव श्रीभास्कररायदीक्षितैः तन्त्रप्रामाण्यविषये वरिवस्याविधौ (सरस्वतीभवनस्था मातृका सं. 60984) विवेचितमस्ति।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

इत्यादिकूर्मपुराणवचनगतशाक्तपदस्य केवलशक्तिसम्बन्धिमात्रपरत्वे चिच्छक्तिपारम्यप्रतिपादककूर्मपुराणस्यैव मोहशास्त्रत्वाभिया सङ्कोच आवश्य[कः]। तत्रत्य शाक्तपदस्य वेदविरुद्धवामाचारप्रधानचतुरशीतिप्रतिपन्नमायादि चतुषष्ट्या तन्त्रैः सकलमिति तन्त्रपरत्वात्। एतदेवाऽभिप्रेत्य सकलश्रुतिस्मृतिपुराणादिपारदर्शिभिर्भगवत्पादैरभिहितं सौन्दर्यलहर्याम्–**"चतुःषष्ट्यातन्त्रैः सकलमति(भि)सन्धाय"** (श्लो. 31) इति। न च तन्त्रराजादिषु क्वचित् मपञ्चकप्रतिपादनादप्रामाण्यं तावत्तेषां वेदविरुद्धांशे प्रामाण्याभावेऽपि प्रत्यक्षश्रुत्यवगतचिच्छक्तिमहिमतदुपासनप्रतिपादनांशे प्रामाण्यसम्भवात्। अन्यथा कल्पसूत्रादीनामपि वेदविरुद्धसर्ववेष्टनादिबोधकतया सर्वांशेऽप्यप्रामाण्यं स्यादिति दिक्। इत्युपोद्धातप्रकरणम्।

ततः श्रीमान् साधकेन्द्रः ब्राह्मे मुहूर्ते चोत्थाय, मनसा शुचिर्भूत्वा, उपरुद्धश्चेदावश्यकं कृत्वा, धौते वाससी परिधाय, शुचिर्भूत्वा, ब्रह्मरन्ध्रे सहस्रदलपुण्डरीके सन्निषण्णं तद्गतचिदानन्दघनं परमशिवज्योतीरूपं प्रसन्नं द्विभुजं द्विनेत्रं वराभयकरं वामाङ्कस्थितचिच्छक्त्या त्रिनेत्रया उत्पलहस्तया आलिङ्गितं चन्द्रिकाधौतवसनं मणिकुण्डलमण्डितं करुणापूर्णं स्वगुरुं ध्यात्वा, मनसा पञ्चोपचारैः सम्पूज्य, तन्त्रराजोक्तश्लोकपञ्चकेन स्तुत्वा, शिरःस्थसहस्रदलकमलगतं चिदानन्दघनं परंज्योतिरेव गुरुमूर्त्या प्रादुर्भूयास्मत्कृतां पूजां स्वीकृत्य, पुनस्तत्रैव लीनमिति भावनात्मकं विसर्जनं कुर्यात्। जीवति गुरौ तु पश्चात् गुरुस्थितां दिशमपि नमस्कुर्यात् इति विशेषः। अयं चापरो विशेषः। पूर्णाभिषिक्तशिष्यो गुरुपादुकामन्त्रेण "ऐं ह्रीं श्रीं अमुकानन्दनाथश्रीपादुकां पूजयामि" इत्यनेन "ऐं ह्रीं श्रीं अमुकश्रीपादुकां पूजयामि" इत्यनेन वा गुरुपूजां कुर्यात्। इतरस्तु

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शिवमेव गुरुबुद्ध्या स्मृत्वा पूजयेदिति।

तन्त्रराजोक्तपञ्चश्लोक(का:) यथा–

नमस्ते नाथ! भगवन्! शिवाय गुरुरूपिणे।
विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह!।।

नवाय नवरूपाय परमार्थैकरूपिणे।
सर्वाज्ञानतमोभेदभानवे चिद्घनायते।।

स्वतन्त्राय दयाक्लृप्तविग्रहाय शिवात्मने।
परतन्त्राय भक्तानां भव्यानां भव्यरूपिणे।।

विवेकिनां विवेकाय विमर्शाय विमर्शिनाम्।
प्रकाशानां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे।।

पुरस्तात् पार्श्वयोः पृष्ठे नमस्कुर्यामु(दु)पर्यधः।
सदा मच्चित्तरूपेण विधेहि भवदासनम्।।

(तं.रा.त. 1.96–100)

इति। यद्यपि पद्धतिषु दिव्यौघादिन्यासो लिख्यते, तथापि तन्त्रराजादिषु तस्य प्रातरिक(?)विधावप्रतिपादनादनित्यतां मन्वानैरस्माभिस्तत्प्रकारो न प्रदर्शितः। इति गुरुपूजा।

अथ मन्त्रध्यानम्। यथा–

मूलाधारस्थचतुर्दलकमलकर्णिकायां मन्त्राऽऽद्यखण्डं शुक्लवर्णं अतिभास्वरमनाहतचक्रपर्यन्तं व्याप्तनादशिखं ध्यात्वा, अनाहतच-क्रस्थद्वादशदलकमलकर्णिकामध्ये मध्यमखण्डमुद्यदादित्यसङ्काशमा-ज्ञाचक्रपर्यन्तं व्याप्तनादशिखं ध्यात्वा, आज्ञाचक्रगतद्विदलकमल-कर्णिकामध्ये अन्त्यखण्डं शुक्लभास्वरं ब्रह्मरन्ध्रान्तव्याप्तनादशिखं ध्यायेत्। नादशिखास्वरूपमग्रे वक्ष्यते। ततः समस्तविद्यां

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मूलादिब्रह्मरन्ध्रान्तं पद्मरागशलाकामिव ऋजुरूपामतिरक्तवर्ण(र्णां) महाभास्वरां यावत् श्वासं ध्यात्वा तत्तेजसान्तरभिव्याप्य, बहिर्निर्गच्छता व्याप्तमतिपाटलं स्वमपि शरीरं चिन्तयेदिति मन्त्रध्यानम्।[3]

अथ देवतास्मरणं कुर्यात्।

हृदि सामान्यसमयी चिन्तयेत् परमेश्वरम्।
विशेषसमयी बिन्दौ मूर्ध्नि निर्वाणदीक्षितः।।[4]

इति अस्मत्पितामहचरणोक्तरीत्या यथाधिकारं हृदयादिषु देवीं ध्यायेत्। तदुक्तं चतुःशतीतन्त्रराजयोः **"ततः पद्मनिभाम्"** इत्यादिना।[5] यथा–

ततः पद्मनिभां देवीं बालार्ककिरणारुणाम्।
जपाकुसुमसङ्काशां दाडिमीकुसुमोपमाम्।।
पद्मरागप्रतीकाशां कुङ्कुमोदकसन्निभाम्।
स्फुरन्मुकुटमाणिक्यकिङ्किणीजालमण्डिताम्।।
कालालिकुलसङ्काशकुटिलालकपल्लवाम्।
प्रत्यग्रारुणसङ्काशवदनाम्भोजमण्डलाम् ।।
किञ्चिदर्धेन्दुमुकुटललाटमृदुपट्टिकाम् ।
पिनाकिधनुराकारभ्रूलतां परमेश्वरीम्।।
आनन्दमुदितोल्लोललीलान्दोलितलोचनाम्।
स्फुरन्मयूखसङ्घातविलसद्धेमकुण्डलाम्।।
सुगण्डमण्डलाभोगजितेन्द्वमृतमण्डलाम्।
विश्वकर्मादिनिर्माणसूत्रसुस्पष्टनासिकाम्।।

---

3. इयमेव गुरुणा क्रियमाणा शाक्तीदीक्षेत्युच्यते नित्योत्सवे।
4. श्लोकोऽयमप्पयदीक्षितकृतशिवार्चनचन्द्रिकातः (पृ. 2) समुद्धृतः।
5. एते श्लोका नित्याषोडशिकार्णवे श्रीविद्यार्णवे च किञ्चित्पाठभेदेन दृश्यन्ते। सम्प्रति प्रकाशिते तन्त्रराजे तु एते श्लोकाः नोपलभ्यन्ते।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ताम्रविद्रुमबिम्बाभरक्तोष्ठीममृतेश्वरीम् ।
पक्वदाडिमबीजाभदन्तपंक्तिविराजिताम् ॥

स्मितमाधुर्यविजितमाधुर्यरससागराम् ।
अनौपम्यगुणोपेतचिबुकोद्देशशोभिताम् ॥

कम्बुग्रीवां महादेवीं मृणाललिलतैर्भुजैः ।
रक्तोत्पलदलाकारसुकुमारकराम्बुजाम् ॥

कराम्बुजनखज्योतिर्वितानितनभःस्थलाम् ।
मुक्ताहारलतोपेतसमुन्नतपयोधराम् ॥

त्रिवलीवल्लिसन्नद्धमध्यदेशसुशोभिताम् ।
लावण्यसरिदावर्ताकारनाभिविभूषिताम् ॥

अनर्घरत्नखचितकाञ्चीयुतनितम्बिनीम् ।
नितम्बबिम्बद्विरदरोमराजिवराङ्कुशाम् ॥

कदलीललितस्तम्भसुकुमारोरुमीश्वरीम् ।
लावण्यकदलीतुल्यजङ्घायुगलमण्डिताम् ॥

गूढगुल्फपदद्वन्द्वां प्रपदाजितकच्छपाम् ।
तनुदीर्घाङ्गुलीभास्वन्नखराजिविराजिताम् ॥

ब्रह्मविष्णुशिरोरत्ननिघृष्टचरणाम्बुजाम् ।
शीतांशुशतसङ्काशकान्तिसन्तानहासिनीम् ॥

लौहित्यजितसिन्दूरजपादाडिमरागिणीम् ।
रक्तवस्त्रपरीधानां पाशाङ्कुशकरोद्यताम् ॥

रक्तपद्मनिविष्टां तु रक्ताभरणमण्डिताम् ।
चतुर्भुजां त्रिणे(ने)त्रां च पञ्चबाणधनुर्धराम् ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कर्पूरशकलोन्मिश्रताम्बूलापूरिताननाम् ।
महामृगमदोद्दामकुङ्कुमारुणविग्रहाम् ॥
सर्वशृङ्गारवेषाढ्यां सर्वालङ्कारभूषिताम्।
जगदाह्लादजननीं जगद्रञ्जनकारिणीम्॥
जगदाकर्षणकरीं जगत्कारणरूपिणीम्।
सर्वमन्त्रमयीं देवीं सर्वसौभाग्यसुन्दरीम्॥
सर्वलक्ष्मीमयीं नित्यां परमानन्दनन्दिताम्।
सर्वदेवमयीं देवीं कदम्बवनमध्यगाम्॥
वहन्नाडीपुटद्वारि निर्गतां चिन्तयेत्क्रमात्॥

(नि.षो.का. 1.130-149)

इति ध्यायेदिति विशेषः। इदं चोपलक्षणम्। तदाधार एतादृश सौन्दर्यशाली पुंरूपः शिवोऽपि ध्येयः। एवं ध्यात्वा मानसैरुपचारैः संपूज्य यथाशक्ति मनसै[व] मूलमन्त्रमावर्त्य समर्प्य, ब्रह्मयामलोक्तेन स्तोत्रेण[6] स्तुवीत। यथा–

---

6. श्रीविद्यार्णवे पञ्चदशश्वासे त्रिपुरार्णवोक्तं स्तोत्रमुद्धृतमस्ति। यथा–'प्रातर्नमामि जगतां जनन्याश्चरणाम्बुजम्। श्रीमत्त्रिपुरसुन्दर्या जनन्या जगतां सदा॥1॥ प्रसन्नायाः स्वभक्तानां नमिताया हरादिभिः। प्रातस्त्रिपुरसुन्दर्या नमामि चरणाम्बुजम्॥2॥ हरिर्हरो विरिञ्चिश्च सृष्ट्यादीन् कुरुते यया। [प्रातस्त्रिपुरसुन्दर्या नमामि पदपङ्कजम्]॥3॥ यत्पाद्यमम्बु शिरसि भाति गङ्गा महेशितुः। प्रातः पाशाङ्कुशशरपाशहस्तां नमाम्यहम्॥4॥ उद्यदादित्यसङ्काशां श्रीमत्त्रिपुरसुन्दरीम्। प्रातर्नमामि पादाब्जं ययेदं भासते जगत्॥5॥ तस्यास्त्रिपुरसुन्दर्या यत्प्रसादान्निवर्तते। यः श्लोकपञ्चकमिदं प्रातर्नित्यं पठेन्नरः॥6॥ तस्मै दद्यादात्मपदं श्रीमत्त्रिपुरसुन्दरी।' इति।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ॐ प्रातर्नमामि जगतां जनन्याश्चरणाम्बुजम्।
श्रीमत्त्रिपुरसुन्दर्या नमिताया हरादिभिः॥

प्रातस्त्रिपुरसुन्दर्या नमामि पदपङ्कजम्।
हरिर्हरो विरिञ्चिश्च सृष्ट्यादीन् कुर्वते यथा॥

प्रातस्त्रिपुरसुन्दर्या नमामि चरणाम्बुजम्।
यत्पाद्यमम्बुशिरसि भाति गङ्गा महेशितुः॥

प्रातः पाशाङ्कुशशरचापहस्तान्नमाम्यहम्।
उद्यदादित्यसङ्काशां श्रीमत्त्रिपुरसुन्दरीम्॥

प्रातर्नमामि पादाब्जं ययेदं भासते जगत्।
तस्यास्त्रिपुरसुन्दर्या यत्प्रसादान्निवर्तते॥

यः श्लोकपञ्चकमिदं प्रातर्नित्यं पठेन्नरः।
तस्मै दद्यादात्मपदं श्रीमत्त्रिपुरसुन्दरी॥

इति एवं देवीं स्तुत्वा,

त्रैलोक्यचैतन्यमयेश्वरेशि श्रीसुन्दरि त्वच्चरणाज्ञयैव।
प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये॥

संसारयात्रामनुवर्तमानं त्वदाज्ञया श्रीत्रिपुरे परेशि!
स्पर्धातिरस्कारकलिप्रमादभयानि मा माभिभवन्तु मातः॥

जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः।
त्वया हृषीकेशि हृदिस्थयाऽहं यथा नियुक्तोऽस्मि तथा करोमि॥

इति नित्ययात्रार्थं देव्या अनुज्ञां प्रार्थ्य,

प्रातरारभ्य सायान्तं सायादिप्रातरन्ततः।
यत्करोमि जगन्मातस्तदस्तु तव पूजनम्॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

इति करिष्यमाणं कर्म सर्वमपि तदाज्ञापालनरूपतया तत्प्रीत्या-वहत्वात्तत्पूजारूपं मत्वा,

समुद्रमेखले देवि पर्वतस्तनमण्डले।
विष्णुपत्नि! नमस्तुभ्यं पादन्यासं क्षमस्व मे॥

इति भूमिं प्रार्थ्य, वहच्छ्वासानुसारेण भूमौ पादन्निधाय बहिर्निर्गच्छेत्। अजपाविधानं तु प्रातरेव कर्तव्यमिति नियमाऽभावात् अग्रे वक्ष्यते।

द्विजादीनां तु संस्कारो वेदोक्तः समुदीरितः।
तेषां च तत्र तत्राऽपि विद्यया विधिमाचरेत्॥

स विद्यास्मरणं कुर्यात् क्रियां सर्वत्र चोदिताम्।
तेन तन्मयतासिद्धिः सर्वत्र भवति ध्रुवम्॥

(तं.रा.त. 1.86-87)

इति तन्त्रराजवचनपर्यालोचनया दन्तधावनादिसकलं श्रौतस्मार्तसंस्कार-कर्मसु प्रधानकर्मानुष्ठानसमये मूलविद्या स्मर्तव्येति आचाराह्निकयोश्च वैदिकतान्त्रिकयोश्च समुच्चय इति। तत्रापि वैदिका(कं)[आदौ] तान्त्रिकस्य पश्चात् कर्तव्येति[7] च मनसि कृत्वा तदनुसारिप्रयोगो लिख्यते। विस्तरस्तु सौभाग्यचन्द्रातपे द्रष्टव्यः।

तत्र स्मृत्युक्तप्रकारेण दन्तकाष्ठं गृहीत्वा "३ क्लीं कामदेवाय सर्वजनप्रियाय नमः" इति मन्त्रेण दन्तधावनं कुर्यात्। ततो मूलविद्यया च तदहर्नित्य(त्या)विद्यया च मुखनासानेत्रादीनि प्रक्षाल्य, नद्यादिषु वैदिकस्नानान्ते, "अद्येत्यादि साम्बशिवप्रीत्यर्थं तान्त्रिकस्नानं करिष्ये" इति संकल्प्य मूलेन प्राणानायम्य त्रिः। ऋष्यादिषडङ्गन्यासान्ते

---

7. इदं तु चिन्त्यम्। प्रायः सर्वासु पद्धतिषु वैदिककर्मानन्तरमेव तान्त्रिकं कर्म कर्तव्यमिति पद्धतिकारा लिखन्ति।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

देवीरूपमात्मानं ध्यात्वा, पुरतो जलं चतुर्हस्तपरिमितं चतुरस्रं तीर्थं विभाव्य, तत्र–

ॐ पृथिव्यां यानि तीर्थानि करैः स्पृष्टानि ते रवे।
तेन सत्येन मे देव तीर्थं देहि दिवाकर।।
गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु।।

इति तीर्थमन्त्रेण अङ्कुशमुद्रया तीर्थमावाह्य, "ऐं अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावय स्रावय स्वाहा" इति मन्त्रेण चन्द्रमण्डलादमृतमावाह्य[8], "व"मित्याप्लाव्य, कवचेनावगुण्ठ्य, अस्त्रमन्त्रेण चक्रमुद्रया संरक्ष्य, तत्र श्रीचक्रं ध्यात्वा, तन्मध्ये मूलदेवतां स्मृत्वा, तीर्थामृतेन मूलविद्यया कलशमुद्रया देवीं तर्पयित्वा, देव्याश्चरणाब्जनिःसृतं रक्तवर्णं तीर्थं मत्वा, मूलेन दशधाऽभिमन्त्र्य, मूलविद्यां जपन् तन्नामस्मरणपूर्वकं देव्याश्चरणतले तत्तीर्थजले त्रिर्निमज्ज्योन्मज्ज्य, योनिमुद्रया कुम्भमुद्रया वा मूलेन शिरसि जलाञ्जलित्रयं निक्षिप्य, आद्यकूटान्ते, "आत्मतत्त्वं शोधयामि स्वाहा"। द्वितीयान्ते, "विद्यातत्त्वं शोधयामि स्वाहा"। तृतीयान्ते, "शिवतत्त्वं शोधयामि स्वाहा"। समस्तगुच्चार्य, "सर्वतत्त्वं शोधयामि स्वाहा" इति चतुराचम्य, प्रणवपूर्वकं "देवांस्तर्पयामि नमः, ऋषींस्तर्पयामि नमः, पितॄंस्तर्पयामि नमः" इति सकृत् सकृत् संतर्प्य, मूलान्ते "श्रीमहात्रिपुरसुन्दरीं तर्पयामि नमः" यथाशक्ति तर्पयेत्।

ततो देवीं हृदि विसृज्य, तीर्थानि रविमण्डले विसृज्य, जलादुत्तीर्य, बालया प्रोक्षितेन मूलेनाभिमन्त्रितेन धौते वाससी

---

8. प्रायः सर्वत्र पद्धतिषु सूर्यमण्डलादेवावाहनं दृश्यते।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

परिधायाऽऽचम्य भस्मधारणं कुर्यात्। तत्र पूजिताया गौर्भूमावपतितं गोमयमाकाशस्थमेव गृहीत्वा, पञ्चब्रह्ममन्त्रैश्शिववह्नौ दग्ध्वा, मूलपञ्चाक्षरेण विशोधितं वा भस्मकल्पं वनकरि(री)षैर्मन्त्रेण सम्पादितमनुकल्पं दावाग्न्यादि भस्मवस्त्रेण संशोध्य, गोमूत्रेण पिण्डीकृत्य, प्राग्वन्मन्त्रेण सम्पादितमुपकल्पं मन्त्रादिहीनं शुचिगोमयसिद्धं श्रोत्रियगृहानीतं वा भस्मकल्पं तत्राकल्पं चेत् तद् गृहीत्वा, वस्त्रेण दिग्बन्धनं कृत्वा, "हों ईशानमूर्ध्ने नमः। हें तत्पुरुषवक्त्राय नमः। हुं अघोरहृदयाय नमः। हिं वामदेवाय गुह्याय नमः। हं सद्योजातपादाभ्यान्नमः।", "ह्रां हृदयाय नमः" इत्यादि[9]। "ह्रां निवृत्तिकलायै नमः। ह्रीं प्रतिष्ठाकलायै नमः। ह्रू विद्याकलायै नमः। ह्रैं शान्तिकलायै नमः। ह्रौं शान्त्यतीतकलायै नमः" इति पञ्चब्रह्मषडङ्गकलामन्त्रैः[10] शोधयेत्। भस्मधारणं च साम्बब्रह्मविद्याङ्गं सकलश्रौतस्मार्तकर्माङ्गमिति सौभाग्यचन्द्रातपे प्रपञ्चितम्। तस्य षट्प्रकारभेदाश्च प्रदर्शिताः। तत्राऽऽवश्यकः प्रकारः प्रदृ(द)र्श्यते।

एवमुक्तचतुर्विधान्यतमं भस्म ब्राह्मणादिक्रमेण निष्कसार्ध-निष्कद्वयसार्धद्वयनिष्कप्रमाणं (मासा सार्धचतुष्टयं प्रमाणम्) गृहीत्वा, नैर्ऋतकोणे तद्राक्षसांशे परित्यज्य, सप्तवारं अस्त्रेणाभिमन्त्र्य, विरक्तश्चेत् पादादिमस्तकान्तम्, अविरक्तश्चेत् मस्तकादिपादान्तम्। दक्षिणाङ्गुष्ठतर्जन्यग्रगृहीतेन स्वल्पेन भस्मना तद्गम्यकरपादतल-व्यतिरिक्ताङ्गं संस्पर्शरूपमुद्धूलनं कुर्यात्। एवं मलस्वानं कृत्वा

9. शिवार्चनचन्द्रिकायां (पृ. 10-11) हृदयादिन्यासस्यायं क्रमः-'हां हृदयाय नमः, हीं शिरसे नमः, हूँ शिखायै नमः, हैं कवचाय नमः, हौं नेत्रत्रयाय नमः, हः अस्त्राय नमः' इति।
10. शिवार्चनचन्द्रिकायां (पृ. 10-11) तु न्यासबीजविषये किञ्चिद्भेदः। तद्यथा-'ह्लां निवृत्तिकलायै नमः, ह्लीं प्रतिष्ठाकलायै नमः, ह्लूं विद्याकलायै नमः, ह्लैं शान्तिकलायै नमः, ह्लौं शान्त्यतीतकलायै नमः' इति।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विधिस्नानं कुर्यात्। यथा-

अवशिष्टं भस्म षडङ्गैरभिमन्त्र्य, 'शिरसि- अथर्वशिरसे ऋषये नमः, मुखे-गायत्र्यै छन्दसे नमः, हृदये-श्रीरुद्राय देवतायै नमः, करपुटे-भस्माभिमन्त्रणे विनियोगः' इति तत्तत्स्थानेषु ऋषिच्छन्ददेवताविनियोगन्यासपूर्वकं अग्निरिति भस्म, वायुरिति भस्म, जलमिति भस्म, स्थलमिति भस्म, व्योमेति भस्म, सर्वं ह वा इदं भस्म, मन इत्येतानि चक्षूंषि भस्मानीति एभिर्मन्त्रैरभिमन्त्र्य, तेन भस्मना ईशानतत्पुरुषाघोरवामदेवसद्योजातैर्मूर्धाननहृदयगुह्यपादेषूद्धूलनं दक्षिणकरेण कुर्यात्तदगम्यप्रदेशे वामहस्तेन कुर्यात्। अवशिष्टं भस्म कुम्भमुद्रयाऽऽभिषिञ्चेत्। मन्त्रा यथा–

ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपति–
ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥1॥

(तै.आ., 10.17.1, महानारा.उप. 17.5)

तत्पुरुषाय विद्महे महादेवाय धीमहि।
तन्नो रुद्रः प्रचोदयात्॥2॥

(तै.आ., 10.1.5, महानारा.उप. 17.4)

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः।
सर्वेभ्यः सर्वसर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥3॥

(तै.आ., 10.45.1, महानारा.उप. 17.3)

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः॥4॥

(तै.आ., 10.43, महानारा.उप. 17.2)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः।
भवे भवेनातिभवे भवस्व मां भवोद्भवाय नमः॥5॥

(तै.आ., 10.43.1, महानारा.उप. 17.1)

इदं चोद्धूलनं मध्याह्नात्प्राक् जलसहितं परतो जलवर्जितं च व्रतिवनस्थकन्यकादिभिर्दीक्षाहीनैर्नरैश्च कार्यम्। दीक्षितगृहस्थैः सन्ध्यात्रयेऽपि जलसहितं कार्यम्। स्त्रीभिर्यतिभिश्च जलवर्जितं कार्यम्।

अथ त्रिपुण्ड्रधारणम्। तत्र प्राग्वत् भस्मादायाऽभिमन्त्र्य, जलेनालोड्य, शिरोललाटहृदयांसद्वयाख्यपञ्चस्थानेषु श्रुत्युक्तेषु ब्रह्मवैवर्तप्रतिपन्नेषु तेषु वा ब्रह्मकै(वै)वर्तोक्तशिरोललाटकण्ठां-सद्वयहृदयनाभिपृष्ठाख्येषु अष्टसु स्थानेषु वा यथाचारं तर्जनीमध्यमानामिकाभिरङ्गुलीभिः शिवस्मरणपूर्वकं पञ्चाक्षरीमुच्चरन् त्रिपुण्ड्रं धारयेत्। इदं च भस्मधारणं गोब्राह्मणदेवाग्निगुहवन्द्यादीनां प्रशस्तानां म्लेच्छान्त्यजकृतघ्नादिनीचानां च सन्निधिं परिहृत्य मार्गभिन्ने शुचौ देशे कार्यम्।[11]

अथ सन्ध्यां कुर्यात्। तद्यथा—गुर्वादिवन्दनं कृत्वा, मूलेन प्राणायामत्रयं कृत्वा, ऋष्यादिषडङ्गन्यासपूर्वकं देवीरूपमात्मानं ध्यात्वा, पूर्ववत् तत्त्वेनाचम्य, दक्षिणहस्ते जलमादाय, वामेन तत्त्वमुद्रया मूलेनाभिमन्त्र्य, पाञ्चभौतिकमन्त्रेण प्रत्येकं कूटमुच्चार्य, त्रिरभ्युक्ष्य, नासासमीपमानीय, वहन्नासारन्ध्रेण तदन्तर्गतं विभाव्य, तेन—

[12]ब्रह्महत्याशिरस्कञ्च स्वर्णस्तेयभुजद्वयम्।
सुरापानहृदायुक्तं गुरुतल्पकटिद्वयम्॥

---

11. इदं भस्मधारणप्रकरणं शिवार्चनचन्द्रिकाया (पृ. 10-11) एव परिगृहीतम्।
12. एते श्लोकाः मेरुतन्त्र (5.235-238)- दक्षिणामूर्तिसंहिता (55. 16-19)- ज्ञानार्णव (12.28-31)- त्रिपुरार्णव (2.52-56)- श्रीविद्यार्णवग्रन्थेष्वपि किञ्चित्पाठान्तरयुक्ता दृश्यन्ते।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तत्संसर्गपदद्वन्द्वमङ्गप्रत्यङ्गपातकम् ।
उपपातकरोमाणं रक्तश्मश्रुविलोचनम्।
खड्गचर्मधरं कृष्णं कुक्षौ पापं विचिन्तयेत्।।

वामकुक्षिस्थितं पापपुरुषं तस्मिन् जले समागतं मत्वा, तज्जलं दक्षिणहस्ते निधाय, अग्रे वज्रशिलां ध्यात्वा, अस्त्रमन्त्रेण दग्धं घायतयेदिति अघमर्षणं कृत्वा, हस्तौ प्रक्षाल्याचम्य, "ॐ ह्रां ह्रीं सः श्रीसूर्य एष ते अर्घ्यः स्वाहा" इत्यञ्जलित्रयं दत्वा, सूर्यमण्डले देवीं ध्यात्वा, मूलविद्यामुच्चार्य, "सूर्यमण्डलमध्यस्थे महात्रिपुरसुन्दरि एष ते अर्घ्यः स्वाहा" इत्यञ्जलित्रयं सूर्याभिमुखं दद्यात्। ततस्तां मूलेनोपस्थाय त्रैपुरगायत्रीं ध्यायेत्–

भास्वद्रत्नौघमुकुटां स्फुरच्चन्द्रकलाधराम्।
सद्यःसन्तप्तहेमाभां सूर्यमण्डलरूपिणीम्।।
पाशाङ्कुशाभयवरान् धारयन्तीं स्मरन् जपेत्।
गायत्रीं सुभगां मन्त्री तथा बीजस्वरूपिणीम्।।

इति वामकेश्वरवचनात्।[13] "ऐं वागीश्वरि विद्महे क्लीं कामेश्वरि धीमहि सौः तन्नः शक्तिः प्रचोदयात्" इति यथाशक्ति जपित्वा, मूलविद्यां अष्टोत्तरशतं जपेत्। तद्दशांशमङ्गमन्त्रानपि जपेत्। इदं च सन्ध्यावन्दनं कालत्रयेऽपि कार्यमिति पद्धतिकाराः[14]। अस्मज्ज्येष्ठ-चरणास्तु सौभाग्यपद्धत्याम् "यद्यपि सर्वा अपि सन्ध्याः कर्तव्याः, तथाऽपि–

---

13. ध्यानमिदं श्रीविद्यार्णवे पञ्चमश्वासे, दक्षिणामूर्तिसंहितायां (5.21–24) च दृश्यते।
14. परशुरामकल्पसूत्रमते तु एकैव प्रातःसन्ध्या, नान्या माध्याह्निकादयः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सर्वासामपि सन्ध्यानां प्रातःसन्ध्या गरीयसी।
तस्मात्तां न त्यजेद्विप्रस्त्यजन्नरकमाप्नुयात्॥

इति त्रिपुरार्णवादिवचनैः[15] प्रातःसन्ध्यैवाऽऽवश्यकी" इत्याहुः।

अथ [16]शिवार्चनचन्द्रिकायामस्मत्पितामहचरणोक्तरीत्या रुद्राक्षधारणस्य शिवपूजाङ्गतया रुद्राक्षधारणं कृत्वा श्रुतिस्मृत्य-विरुद्धमङ्गलाचाररूपशृङ्गारवेषधारी मौनी विशुद्धहृदयः-

अपसर्पन्तु ये(ते) भूताः ये भूता दिवि संस्थिताः[17]।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया।

इति श्लोकान्ते अस्त्रमन्त्रमुच्चरन् तन्मन्त्रमहिम्ना यागमन्दिरान्निर्गच्छतो मत्वा, तेषामवकाशप्रदानाय स्ववामाङ्गसङ्कोचपूर्वकं यागगृहं प्रविशन्नस्त्रमन्त्रपूर्वकैः पार्ष्णिघाततालत्रयनिरीक्षणैर्भौमान्तरिक्षदि-व्यविघ्नापहृतान्मत्वा, पश्चात् ज्वालामालिनीविद्यया निर्गतानां पुनरप्रवेशाय परितो वह्निप्राकारं भावयन्नस्त्रमन्त्रप्रोक्षिते शुभप्रदेशे दारवाद्यन्यतममासनं निधाय गुरुस्मरणपूर्वकं-

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता।
त्वं च धारय मां नित्यं पवित्रं कुरु चासनम्॥

स्योना पृथिवी भवानृक्षरा निवेशिनी।
यच्छानश्शर्म स प्रथा॥

(ऋ.सं. 1.22.15, तै.आ. 10.1.10)

---

15. श्लोकोऽयं श्रीविद्यार्णवे पञ्चमश्वासे त्रिपुरार्णववचनादेव लभ्यते। तत्र तु प्रथमे पादे 'सन्ध्यानामपि सर्वासाम्' इति। पाठोऽयं प्रकाशिते त्रिपुरार्णवे नोपलभ्यते।
16. प्रकाशितशिवार्चनचन्द्रिकायां (पृ. 14-16) विस्तृतं विवरणमिदं द्रष्टुं शक्यते।
17. 'भुवि संस्थिताः' इति प्रसिद्धः पाठः।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

इति मन्त्राभ्यां तत्रोपविश्य, त्रिखण्डामुद्रया "शिवादिश्रीनाथपर्यन्तायै गुरुपरम्परायै नमः" इति प्रणम्य, पद्मस्वस्तिकाद्यन्यतममभ्यस्तमासनं बद्ध्वा, वक्ष्यमाणकरशुद्धिविद्यया मध्यमानामिकाकनिष्ठिकासु अङ्गुष्ठतर्जनीकरतलेषु च द्विरावृत्या विन्यस्य, "ऐं ह्रीं श्रीं आत्मानं रक्ष रक्ष" इति मन्त्रेणात्मरक्षां कृत्वा, अस्त्रमन्त्रेण अङ्गुलिस्फोटेन दशदिग्बन्धनं कृत्वा मूलविद्यां सकृदुच्चार्य, वामनासापुटेन वायुमाकृष्य, कनिष्ठिकानामाङ्गुष्ठैर्नासापुटे विधृत्य चतुर्वारं मूलजपाद्वा कुम्भयित्वा, वारद्वयजपाद्दक्षिणनासापुटेन वायुं विरेचयेत् [इति] एकः प्राणायामः। पुनस्तथैव दक्षिणनासापुटेन पूरयित्वा विधृत्य वामेन रेचयेत् इत्यन्यः।

एवं पुनर्वैपरीत्येन षोडशवारं द्वादशवारं वा त्रिवारं वा यथाशक्ति प्राणायामं कुर्यादादौ जपान्ते इति ललितार्चन-मञ्जर्युक्तप्रकारेण अभ्यासार्थं वामनासापुटेन वमिति बीजं ध्यायन्, तेनैव सम्भवताकालेन बाह्यवायुमापूर्य, यमिति वायुबीजं ध्यायन् दक्षिणनासापुटेन विरेचयेत्। एवं कृत्वा दीर्घकालं पूरणादिषु सामर्थ्यं सम्पाद्य, ततो वामनासापुटेन द्वात्रिंशन्मात्राकालं वायुमापूर्य चतुःषष्टिमात्राकालं धृत्वा, षोडशमात्राकालं दक्षिणनासिकया विरेचयेदिति तन्त्रराजोक्तप्रकारेण[18] वा सगर्भमगर्भं वा प्राणायामत्रयं[19]

---

18. प्रकरणमिदं तन्त्रराजतन्त्रे (27.67–68) दृश्यते। यथा–'वामेन नासारन्ध्रेण पूरयेदमृतात्मना। स्मरन्नम्बुमरुत्पश्चाद् दक्षिणेनापसारयेत्।। एवं सुसाधिते पश्चाद् द्वात्रिंशन्मात्रयाहरेत्। धारयेत्तच्चतुःषष्ट्या रेचयेत्तत्तुरीयतः।। इति।

19. प्राणायामत्रयस्य विषये तन्त्रराजे (27.64–66) उक्तम्। यथा– 'प्राणायामस्त्रिधा प्रोक्त उत्तमाधममध्यमाः। लाघवो भूतलत्याग उत्तमे चित्तनिर्वृत्तिः।। सर्वाङ्गे स्वेदसंवृद्धिरधमे मध्यमे तथा। सर्वाङ्गकम्पनं प्रोक्तमभ्यासात् कालसंयुतात्। तेऽप्युत्तमगुणा भूयुरभ्यासात् कालयोगतः। तस्मात् समभ्यसेत् प्रातः सायञ्च नियमेन वै।'

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कृत्वा आत्मशुद्धिं कुर्यात्। सा द्विविधा–जीवशुद्धिर्देहशुद्धिश्चेति।

तत्र जीवशुद्धिः[20] प्रदर्श्यते–कुम्भकं कृत्वा जीवब्रह्मणोरभेद-प्रतिपादकं हंस इत्युच्चरन् प्राणवायुं रक्तस्फुलिङ्गोपमं मूलाधारादुत्थाप्य सुषुम्नान्तर्गतब्रह्मनाडीमध्यगतचित्रनाडीमार्गेण हृदयं प्रापय्य, तत्रत्यजीवं सूक्ष्मपुर्यष्टकाद्विमोच्य स्फुरत्ताकारं ब्रह्मरन्ध्रं नीत्वा, तत्रत्येन परमात्मना योजयेत्। एवं कृते जीवात्मापुर्यष्टकबन्धान्मोचितः कर्तृत्वभोक्तृ-त्वादिरहितः शुद्धो भवति। एवं मनसा जीवशुद्ध्या करिष्यमाणादेह-दाहात्मसंरक्षणरूपं फलान्तरमपि नान्तरीयकतया सिद्ध्यति।

ततो देहशुद्ध्यात्मकभूतशुद्धिं कुर्यात्। यद्यपि भूतशुद्धिप्रकारा बहवः सन्ति, [सौभाग्य]चन्द्रातपे च रत्नकोषोक्तप्रकारावेव प्रदर्शितौ, तथापि लाघवानुसारेण प्रपञ्चसारसङ्ग्रहे[21]ऽस्मद्गुरुचरणोक्तरीत्या तत्प्रकारः कथ्यते–

प्रथमं नीललोहितं सकलभुवनोच्छोषणकरं सबिन्दुवायुबीजं यकारं मनसाऽग्रे स्मृत्वा, व्याप्तवपुषा तेन वायुना स्वकं देहं वामनासिकाश्वासमार्गेणैवापूर्य सकलं सकल्मषं देहं विशोषितं स्मृत्वा, पुनर्दक्षिणनासिकया पूर्वपूरितं वायुं व्यामुञ्चेत्। पुनर्दक्षिणनासाग्र एव वह्निबीजमरुणवर्णं सबिन्दुकं रेफं विचिन्त्य तदेव बीजं वायुनाऽऽपूर्य, विसृष्टेनान्तर्नीत्वा सकलदेहं ताभ्यां दग्धं विभाव्य, तेन भस्मना सह वामनासिकया वायुं व्यामुञ्चेत्। पुनर्वामनासाग्रे ठंकारं सोमात्मकं शुभ्रवर्णं ध्यात्वा, वायुना मूलाधारं नीत्वा, सुषुम्नाद्वारा

---

20. इदं जीवशुद्धिप्रकरणं शिवार्चनचन्द्रिकातः (पृ. 21) गृहीतम्।
21. प्रपञ्चसारसंग्रहे (पृ. 14-15) यो निर्दिष्टो भूतशुद्धिप्रकारः, तदेव संक्षेपेण परिगृहीतः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

द्वादशान्तस्थितं सहस्रदलकमलकर्णिकाख्यमिन्दुमण्डलं प्रापय्य, तयोरुभयोः सम्बन्धाच्चन्द्रमण्डलचालनात्ततो निःसृताऽमृतधारया तद् भस्म प्रक्षाल्य, पुनरकारादिवर्णरूपतया मुखकरचरणादिकमुत्पादया-मीत्यनुस्मरन् "ॐ वं" इति त्रिंशद्वारं जपन् कुम्भकेन सम्पाद्य, देहकाठिन्यार्थं लं बीजं मूर्ध्नि विन्यसेत्।

एवं भूतशुद्धिं कृत्वा प्राक् परमात्मना संयोजितं जीवं सोऽहमिति मन्त्रेण शिरसोऽवरोप्य हृदये यथापूर्वं स्थापयेत्। भूतशुद्ध्यकरणे प्रत्यवायः फेट(त्)कारिणीतन्त्रे दर्शितः–"**भूतशुद्धिविहीनेन कृतापूजाऽभिचारवत्**"[22] इत्यादिना। अस्मद्गुरुचरणास्तु[23]– "अशक्तश्चेत् भूतशुद्धिस्थाने केवलमातृकान्यासमेव कुर्यात्" इत्याहुः।

अथ प्राणप्रतिष्ठा अस्मद्गुरुचरणोक्तरीत्या लिख्यते। यथा–अस्यश्री प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः, ऋग्यजुःसामाथर्वाणि छन्दांसि, सकलजगत्सृष्टिकारिणी प्राणधारिणी शक्तिर्देवता, आं बीजं, ह्रीं शक्तिः, क्रों कीलकम्, प्राणप्रतिष्ठार्थे विनियोगः।

आं हृत्, ह्रीं शिरः, क्रों शिखा, आं कवचम्, ह्रीं नेत्रम्, क्रों अस्त्राय इत्याद्यङ्गानि।

रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः
पाशं कोदण्डमिक्षूद्भवमलिगुणमप्यङ्कुशं पञ्चबाणान्।

---

22. इयं पङ्क्तिः मेरुतन्त्रेऽपि (5.247) लभ्यते। प्रकाशिते फेत्कारिणीतन्त्रे नोपलभ्यते।
23. प्रपञ्चसारसंग्रहः (पृ.15)

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विभ्राणाऽसृक्कपालं त्रिणयनलसिता पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः।।[24]

इति ध्यानम्।

आं ह्रीं क्रों य र ल व श ष स हों क्षं सं हं सः अमुष्यप्राणाः इह प्राणाः, आं ह्रीं क्रों य र ल व श ष स हों क्षं सं हं सः अमुष्य जीव इह स्थितः, आं ह्रीं क्रों य र ल व श ष स हों क्षं सं हं सः अमुष्य सर्वेन्द्रियाणि वाङ्मनश्चक्षुश्रोत्रजिह्वाघ्राणप्राणाः इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा। क्रों ह्रीं आं हं सः सं लं। तत्र अमुष्य पदात्तु पूर्वं साध्यनाम योजनीयम्। इति प्राणप्रतिष्ठामन्त्रं स्वहृदयं स्पृष्ट्वा जपेत्।

ततो मातृकान्यासं कुर्यात्–

मन्त्रा मूकत्वमायान्ति विन्यासेन विना लिपेः।
सर्वमन्त्रप्रसिद्ध्यर्थं तस्मादादौ लिपिं न्यसेत्।।

इति फेट्(त्)कारिणीतन्त्रवचनपर्यालोचनया[25] मातृकान्यासश्च सर्वमन्त्रसाधारणः। यद्यपि मातृकान्यासे बहवः प्रकाराः सन्ति तथाऽपि तेष्वन्यतमेनाऽपि प्रत्यवायपरिहारसिद्ध्यै अस्मद्गुरुचरणोक्तमार्गेण मातृकान्यास उच्यते। अन्तर्मातृका त्वाकरेष्वदर्शनादुपेक्षिता।

मातृकान्यासस्य ब्रह्माऋषिः, गायत्री छन्दः, मातृका सरस्वती देवता। अं कं खं गं ङं आं हृत्। इं चं छं जं झं ञं ईं शिरः। उं टं ठं डं ढं णं ऊं शिखा। एं तं थं दं धं नं ऐं कवचम्। ओं पं फं बं भं मं औं नेत्रम्। अं यं रं लं वं शं षं सं हं ळं क्षं अः अस्त्रम्।

---

24. श्लोकोऽयं प्रपञ्चसारसंग्रहे (पृ. 851) दृश्यते।
25. योगतन्त्रग्रन्थमालायां प्रकाशिते तन्त्रसंग्रहे द्वितीये भागस्थे फेत्कारिणीतन्त्रे श्लोकोऽयं न दृश्यते।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

एवमङ्गन्यासं कृत्वा हं बीजं सः शक्तिरिति बीजशक्तिः स्मरेत्।

पञ्चाशद्वर्णभेदैर्विहितवदनदोः पादयुक्कुक्षिवक्षो
देशां भास्वत्कपर्दाकलितशशिकलामिन्दुकुन्दावदाताम्।
अक्षस्रक्कुम्भचिन्तालिखितवरकरां त्रीक्षणां पद्महस्ता-
मच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि॥[26]

इति ध्यानम्। अकारादिक्षकारान्ताः शुद्धवर्णाः मातृकामन्त्रः। तं यथाशक्ति जपेत्। बहुमन्त्रविद्भिस्तावन्मन्त्रजपाशक्तौ मातृकैव जप्ता त्यक्त(पूर्वोक्त)जपप्रत्याम्नायरूपा भवतीत्युपदेशः।

अथ मातृकान्यासः। तस्य स्थानान्युक्तानि यथा-

[27]कानननवृत्तद्व्यक्षिश्रुतिगण्डोष्ठदन्तमूर्धास्ये
दोः पदसन्ध्यग्रेषु च पार्श्वद्वयपृष्ठनाभिजठरेषु।
हृद्दोर्मूलापरगलकक्षेषु हृदादिपाणिपादयुगे
जठराननयोर्व्यापकसंज्ञान् न्यसेदक्षरान् क्रमशः॥

व(य)कारादिदशकं व्यापकतया न्यसेदित्युपदेशः। अयं च सृष्टिन्यासः। "अं नमः, आं नमः" इत्यादिमन्त्रैर्यथोक्तस्थानेषु कर्तव्यः। अयमेव क्षाद्यया विलोममातृकया सबिन्दुकया पूर्वोक्तस्थान-

---

26. ध्यानमिदं प्रपञ्चसारे (7.3), प्रपञ्चसारसंग्रहे सप्तमे पटले (पृ. 22), नित्योत्सवे न्यासप्रकरणे (पृ. 73), मेरुतन्त्रे (5.313) च प्राप्यते।

27. एतादृशा एव श्लोकाः प्रपञ्चसारे (7.4-5) प्रपञ्चसारसंग्रहे (पृ. 25) च किञ्चित्पाठभेदेनोपलभ्यन्ते। तत्रापि केषाञ्चिदक्षराणां न्यासा असूचिता अपि पद्धतिसन्दर्भेण ग्राह्या एवेति समुचितं प्रतिभाति। श्लोकस्य प्रथमपादे श्रुतिपदाग्रे 'नसोः' इति निवेशनं सम्यक् प्रतिभाति। प्रपञ्चसारे तत्संग्रहे च श्रुतिपदाग्रे 'नो' इति पदं 'नसोः' इति भवितुमर्हति।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

प्रतिलोमेन क्रियमाणः संहार इत्युच्यते। ककारादिवर्णैर्विसर्गान्तै-र्बाहुमूलादिस्वस्वस्थानेषु आनुलोम्येन न्यासपूर्वकं स्वरैर्विसर्गान्तैः काननेत्यादि मुखस्थानेषु निवर्त्यमानो न्यासः स्थितिन्यास इत्युच्यते।

अथ विद्यान्यासेषु बहुषु सत्स्वपि आवश्यकाः योगिनीहृदयो-क्ताः[28] साधकदेहदेवतादेहयोरैक्यापादक(काः)(ननु?) शुद्धावन्तर्भूत-लघुषोढादयश्चत्वारो न्यासा लिख्यन्ते।

तत्र षोढान्यासस्य दक्षिणामूर्तिऋषिः, गायत्रीच्छन्दः, पराशक्तिर्देवता, ॐ बीजम्, ह्रीं शक्तिः, न्यासे विनियोगः। ह्रां इत्यादि षडङ्गानि।

ध्यायेत् बालार्कसङ्काशां चतुर्बाहुं त्रिलोचनाम्॥
सूर्येन्दुमण्डलोद्योतमुक्ताताटङ्कशोभिताम्।
कम्बुग्रीवां महादेवीं पीनोन्नतपयोधराम्॥
तनुमध्यां पृथुश्रोणीं पीतकौशयवासिनीम्।
प्रत्यग्रकदलीकाण्डसुकुमारोरुमीश्वरीम्॥
गूढगुल्फपदद्वन्द्वामिन्द्रादिवसुवन्दिताम् ।
ब्रह्मविष्णुशिवाकारां सृष्टिस्थित्यन्तकारिणीम्॥
गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीम् ।
नवचक्रात्मिकां देवीमिन्दुमण्डलमध्यगाम्।
मातृकापीठमध्यस्थां पञ्चाशद्वर्णरूपिणीम्॥[28]

इति ध्यात्वा प्रथमं एकपञ्चाशतो वक्ष्यमाणान् गणेशान् रक्तवर्णान् त्रिणयनान् पाशाङ्कुशवराभयकरान् शक्तिसमन्वितान् ध्यात्वा, ऐं ह्रीं

---

28. अत्र योगिनीहृदये (3.81) 'स्वाभेदेन विचिन्तयेत्' इति वचनेन स्वदेहावयवैरपृथक्त्वं सिद्ध्यति।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

श्रीं अं विघ्नेश्वराय श्रियै नमः– मूर्ध्नि। ३[29] आं विघ्नराजाय ह्रियै नमः –आननवृत्ते। ३ इं विनायकाय तुष्ट्यै नमः – दक्षनेत्रे। ३ ईं शिवोत्तमाय शान्त्यै नमः– वामनेत्रे। ३ उं विघ्नकृते पुष्ट्यै नमः – दक्षकर्णे। ३ ऊं विघ्नहर्त्रै सरस्वत्यै नमः – वामकर्णे। ३ ऋं विघ्नराजाय धृत्यै नमः – दक्षिणनासिकायाम्। ३ ॠं गणनाथाय मेधायै नमः – वामनासिकायाम्। ३ ऌं एकदन्ताय कान्त्यै नमः – दक्षगण्डे। ३ ॡं द्विदन्ताय कामिन्यै नमः – वामगण्डे। ३ एं गजवक्त्राय मोहिन्यै नमः – उत्तरोष्ठे। ३ ऐं निरञ्जनाय जटायै नमः – अधरोष्ठे। ३ ओं कपर्दीशाय तीव्रायै नमः – ऊर्ध्वदन्तपङ्क्तौ। ३ औं दीर्घवक्त्राय ज्वालिन्यै नमः – अधरदन्तपङ्क्तौ। ३ अं शङ्कुकर्णाय नन्दायै नमः – मूर्ध्नि। ३ अः वृषध्वजाय सुधायै नमः – आस्ये। ३ कं गणनाथाय कामरूपायै नमः – दक्षिणबाहुमूले। ३ खं गजेन्द्राय उग्रायै नमः – तत्कूर्परे। ३ गं शूर्पकर्णाय जयिन्यै नमः – तन्मणिबन्धे। ३ घं त्रिलोचनाय सत्यायै नमः – तदङ्गुलिमूले। ३ ङं लम्बोदराय विघ्नेश्यै नमः – तदङ्गुल्यग्रे। ३ चं महानादाय स्वरूपिण्यै नमः – वामदोर्मूले। ३ छं चतुर्मूर्तये कामदायै नमः – तत्कूर्परे। ३ जं सदाशिवाय मदविह्वलायै नमः – तन्मणिबन्धे। ३ झं आमोदाय विकटायै नमः – तदङ्गुलिमूले। ३ ञं दुर्मुखाय धूम्रायै नमः –तदङ्गुल्यग्रे। ३ टं सुमुखाय भूत्यै नमः - दक्षिणपादमूले। ३ ठं प्रमोदायै भूम्यै नमः – तज्जानुनि। ३ डं एकपादाय स्मृत्यै नमः – तद्गुल्फसन्धौ। ३ ढं द्विजिह्वाय रमायै नमः – तदङ्गुलिमूले। ३ णं शूर्पकर्णाय मानुष्यै नमः – तदङ्गुल्यग्रे। ३ तं वीराय मकरध्वजायै नमः – वामपादमूले। ३ थं षण्मुखाय पिङ्गलायै नमः – तज्जानुनि। ३ दं वरदाय भ्रूकुट्यै नमः – तद्गुल्फसन्धौ। ३ धं वामदेवाय

29. '३' इत्यङ्केन सर्वत्र 'ऐं ह्रीं श्रीं' इति बीजत्रययोजना सूच्यते।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

लज्जायै नमः – तदङ्गुलिमूले। ३ नं वक्रतुण्डाय दीर्घघोणायै नमः – तदङ्गुल्यग्रे। ३ पं द्विरण्डाय धनुर्धरायै नमः – दक्षपार्श्वे। ३ फं सेनान्ये यामिन्यै नमः – वामपार्श्वे। ३ बं ग्रामण्ये रात्र्यै नमः – पृष्ठे। ३ भं मत्ताय चन्द्रिकायै नमः– नाभौ। ३ मं विमत्ताय शशिप्रभायै नमः – जठरे। ३ यं मत्तवाहनाय लोलायै नमः– हृदि। ३ रं जटिने चपलेक्षणायै नमः – दक्षकक्षे। ३ लं मुण्डिने ऋद्ध्यै नमः – अपरगले। ३ वं खड्गिने दुर्भगायै नमः – वामकक्षे। ३ शं वरेण्याय सुभगायै नमः – दक्षबाहौ। ३ षं वृषस्कन्धाय शिवायै नमः – वामबाहौ। ३ सं भक्ष्यप्रियाय दुर्गायै नमः – दक्षपादे। ३ हं गणेशाय ग्रहकान्तायै नमः – वामपादे। ३ ळं मेघनादाय कालिकायै नमः – जठरे। ३ क्षं गणेश्वरायानलजिह्वायै नमः – मुखे। इति त्रितारमातृका-युक्ततत्तच्छक्तियुक्ततत्तद्गणेशान् उक्तमातृकास्थानेषु न्यसेत्।

ऐं ह्रीं श्रीं अं विघ्नेश्वराय श्रिये नम इत्यादिमन्त्रस्यायमर्थः– वेदत्रयप्रतिपाद्यशिवशक्तिसामरस्यरूपलक्ष्मीशब्दितविष्णुशक्त्यात्मकतत्तन्मातृकावर्णाभिन्नतत्तद्गणेशमिथुनरूपायै देव्यै नम इति यथा चैतत्तथा सौभाग्यचन्द्रातपे द्रष्टव्यम्।

अथ ग्रहन्यासः। तत्र ध्यानम्[30]–

रक्तं श्वेतं तथा रक्तं श्यामं पीतं च पाण्डरम्।
[धूम्रकृष्णं] कृष्णधूम्रं धूमधूम्रं विचिन्तयेत्।।

रविमुख्यान् कामरूपान् सर्वाभरणभूषितान्।
वामोरुन्यस्तहस्तांश्च दक्षहस्तवरप्रदान्।।

30. ध्यानमिदं योगिनीहृदय-ज्ञानार्णव-श्रीविद्यार्णव-मेरुतन्त्र-प्रपञ्च-सारसंग्रहादौ दृश्यते किञ्चित्पाठभेदेन।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शक्तयोऽपि तथा ध्येया वराऽभयकराम्बुजाः।
स्वस्वप्रियाङ्कनिलयाः सर्वाभरणभूषिताः॥

इति।

ऐं ह्रीं श्रीं स्वरान्ते श्रीसूर्याय रेणुकाम्बायै नमः – ललाटे। ३ यं रं लं वं चन्द्राय अमृताम्बायै नमः – भ्रूमध्ये। ३ कवर्गान्ते मङ्गलायाष्टधामाम्बायै नमः – नेत्रद्वये। ३ टवर्गान्ते बुधाय ज्ञानरूपाम्बायै नमः – हृदयोपरि। ३ तवर्गान्ते बृहस्पतये यशस्विन्यम्बायै नमः – कर्णयोः। ३ चवर्गान्ते शुक्राय शाङ्कर्यम्बायै नमः – हृदये। ३ पवर्गान्ते शनैश्चराय शक्त्यम्बायै नमः – नाभौ। ३ शं षं सं हं राहवे कृष्णाम्बायै नमः – मुखे। ३ ळं क्षं केतवे धूम्राम्बायै नमः – पायौ। इति न्यसेत्।

यद्यपि प्रसिद्धमातृकावर्गक्रमग्रहक्रमानुरोधेन चन्द्रशुक्रयोः कवर्गपवर्गयोगेन भवितव्यं तथापि वचनादेव चन्द्रस्यान्तःस्थयोगः, शुक्रस्य चवर्गयोग इति ध्येयम्।

अथ नक्षत्रदेवताध्यानम्[31]–

ज्वलत्कालाग्निसङ्काशा वरदाभयपाणयः।
नतिपाण्योऽश्विनीमुख्याः सर्वाभरणभूषिताः॥

अधःकरयोर्वराभये ऊर्ध्वयोर्नतिमुद्रेति विवेकः।

[ललाटे] – ३ अं आं अश्विन्यै नमः। दक्षिणनेत्रे – ३ इं भरण्यै नमः। वामनेत्रे–३ ई उं ऊं कृत्तिकायै नमः। दक्षिणकर्णे – ३ ऋं ॠं लृं ॡं रोहिण्यै नमः। वामकर्णे–३ एं मृगशिरसे नमः। दक्षिणनासिकायाम् – ३ ऐं आर्द्रायै नमः। वामनासायाम्–३ ओं

31. नक्षत्रदेवताध्यानं योगिनीहृदय–ज्ञानार्णव–प्रपञ्चसारसंग्रह–मेरुतन्त्रादावपि दृश्यते।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

औं पुनर्वसवे नमः। कण्ठे – ३ कं पुष्याय नमः। दक्षस्कन्धे – ३ खं गं आश्लेषायै नमः। वामस्कन्धे – ३ घं ङं मघायै नमः। दक्षकूर्परे – ३ चं पूर्वाफल्गुन्यै नमः। वामकर्पूरे– ३ छं जं उत्तराफल्गुन्यै नमः। दक्षिणमणिबन्धे – ३ झं ञं हस्तायै नमः। वाममणिबन्धे – टं ठं चित्रायै नमः। दक्षस्तने – ३ डं स्वात्यै नमः। वामस्तने – ३ ढं णं विशाखायै नमः। नाभौ – ३ तं थं दं अनुराधायै नमः। दक्षकट्याम् – ३ धं ज्येष्ठायै नमः। वामकट्याम् – ३ नं पं फं मूलायै नमः। दक्षोरौ – ३ बं पूर्वाषाढायै नमः। वामोरौ – ३ भं उत्तराषाढायै नमः। दक्षजानुनि – ३ मं श्रवणाय नमः। वामजानुनि – ३ यं रं धनिष्ठायै नमः। दक्षजङ्घायाम् – ३ लं शतभिषायै नमः। वामजङ्घायाम् – ३ वं शं पूर्वाभाद्रपदायै नमः। दक्षपादे – ३ षं सं हं उत्तराभाद्रपदायै नमः। वामपादे – ३ ळं क्षं अं अः रेवत्यै नमः। इति न्यसेत्। स्थानमातृकावर्णयोजनप्रकारयोराकर– श्लोकाः–

ललाटे दक्षनेत्रे च वामकर्णद्वये पुनः।
पुटयोर्नासिकायाश्च कण्ठे स्कन्धद्वये पुनः॥[32]
स्तनयोर्नाभिदेशे च कटिबन्धे ततः परम्।
ऊरुयुग्मे तथा जान्वोर्जङ्घयोश्च पदद्वये॥

(यो.हृ. 3.26–28)

इति स्थानानि। कटिबन्ध इति कटिद्वयमित्यर्थः।

आद्ययुग्मं तथा चैकं ततस्त्रीणि चतुष्टयम्।

---

32. 'स्कन्धद्वये पुनः' इत्यस्याग्रे योगिनीहृदये 'पश्चात्कूर्परयुग्मे च मणिबन्धद्वये पुनः' (3.27) इत्यपि लभ्यते । पाठोऽयं लेखकप्रमादाच्च्युतं प्रतिभाति।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

एकमेकं द्वयञ्चेति स्वराः प्रोक्ताः चतुर्दशः॥
व्यञ्जनेष्वेकमुभयं द्वयं न्यस्येत् ततः परम्।
एकं युग्मं द्वयं द्वन्द्वमेकयुग्मं त्रयं ततः॥
एकं त्रयं तथा चैकमेकमेकं द्वयं तथा।
एकं द्वयं त्रयं पश्चात् ळं क्षं अं आः(अः) चतुष्टयम्।
अश्विन्यादेः पुरो भागे दत्वा च क्रमशो न्य[से]त्॥

इति मातृकाक्षरयोगक्रमः।

अथ योगिनीन्यासः[33]। तत्र विशुद्धे(द्धौ) षोडशदलकमल-कर्णिकायां त्वक्धातुदेवतां ध्यायेत्[34]–

रक्तां रक्तत्रिनेत्रां पशुजनभयकृत् शूलखट्वाङ्गहस्तां
वामे खेटं दधानां चषकमपि सुधापूरितं चैकवक्त्राम्।
अत्युग्रामुग्रदंष्ट्रामरिकुलमथनीं पायसान्ने प्रसक्तां
कण्ठस्थानेऽमृताद्यैः परिवृतवपुषं भावयेड्डाकिनीं ताम्॥

इति दक्षोर्ध्वाधः शूलखट्वाङ्गे, वामोर्ध्वादधः खेटचषके इत्यायुधध्यानम्।

"३ डां डीं डूं डैं डौं डः ड म ल व र यूं डाकिनि मां रक्ष रक्ष मम त्वक्धातुं रक्ष रक्ष सर्वसत्त्ववशंकरि देव्यागच्छागच्छेमां पूजां गृहाण गृहाण ऐं घोरे देवि ह्रीं सः परमघोरे ह्रूं घोररूपे ऐह्येहि नमश्चामुण्डे ड र ल क स हैं श्रीमहात्रिपुरसुन्दरि देवि वरदे विच्चे अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः विशुद्धिपीठस्थे विशुद्धिडाकिनी विशुद्धिनाथदेव श्रीपादुकां पूजयामि नमः" इति मनसा कर्णिकायां विन्यस्य, तदग्रादि परितः तदावरणशक्ति-

33. श्रीविद्यार्णवे योगिनीन्यासस्तन्त्रान्तरेति सन्दर्भेण दर्शितः।
34. ध्यानमिदं श्रीविद्यार्णवे षष्ठे श्वासे दर्शितम्।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

(क्ती)र्न्यसेत्। यथा–

"३ अं अमृतायै नमः। ३ आं आकर्षिण्यै नमः। ३ इं इन्द्राण्यै नमः। ३ ईं ईशान्यै नमः। ३ उं उमायै नमः। ३ ऊं ऊर्ध्वकेशिन्यै नमः। ३ ऋं ऋद्धिदायै नमः। ३ ॠं ॠपायै नमः। ३ लृं लृतायै नमः। ३ ॡं ॡषायै नमः। ३ एं एकपादायै नमः। ३ ऐं ऐश्वर्यात्मिकायै नमः। ३ ओं ओंकारात्मिकायै नमः। ३ औं औषधात्मिकायै नमः। ३ अं अम्बिकायै नमः। ३ अः अक्षरात्मिकायै नमः" इति प्रादक्षिण्येन चैता डागि(कि)नीवद् ध्यात्वा न्यस्तव्याः।

ततोऽनाहते द्वादशदलकमले राकिणीं रक्तधातुदेवतां सावरणां ध्यात्वा न्यसेद्यथा–

श्यामां शूलाब्जहस्तां डमरुकसहितां तीक्ष्णचक्रं वहन्तीं
द्व्यास्यां रक्तत्रिनेत्रां भ्रुकुटिवलिलसद्दृष्टदन्तप्रभाभिः।
दीप्तास्यां देवदेवीं हृदयकमलगां रक्तधात्वेकनाथां
शुद्धान्नेषु प्रसक्तां मधुमदमुदितां चिन्तयेद्राकिणीं ताम्।।[35]

दक्षाधःकरमारभ्य दक्षोर्ध्वकरपर्यन्तमायुधध्यानम्।

"३ रां रीं रूं रैं रौं रः र म ल व र यूं राकिणि मां रक्ष रक्ष मम रक्तधातुं रक्ष रक्ष सर्वसत्त्वविशंकरि देव्यागच्छागच्छेमां पूजां गृह्ण गृह्ण ऐं घोरे देवि ह्रीं सः परमघोरे हूं घोररूपे ऐह्येहि नमश्चामुण्डे ड र ल क स हैं श्रीमहात्रिपुरसुन्दरि देवि वरदे विच्चे कं खं गं घं ङं चं छं जं झं ञं टं ठं अनाहतपीठस्थे अनाहतराकिनी श्रीअनाहतनाथदेव श्रीपादुकां पूजयामि नमः" इति कर्णिकायां विन्यस्य दलेषु परितस्तदावरणाक्षरशक्ति(क्ती)र्न्यसेत्।

---

35. श्रीविद्यार्णवे षष्ठे श्वासे ध्यानमिदमुल्लिखितम्।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"३ कं कालरात्र्यै नमः। ३ खं खातीतायै नमः। ३ गं गायत्र्यै नमः। ३ घं घण्टाधारिण्यै नमः। ३ ङं ङार्णात्मिकायै नमः। ३ चं चामुण्डायै नमः। ३ छं छायायै नमः। ३ जं जयायै नमः। ३ झं झङ्कारिण्यै नमः। ३ ञं ञार्णात्मिकायै नमः। ३ टं टङ्कहस्तायै नमः। ३ ठं ठङ्कारिण्यै नमः" इति ताश्च राकिनीवद् ध्येयाः।

ततो मणिपूरके दशदलकमलकर्णिकायां मांसधातुदेवतां लाकिनीं सावरणां ध्यायन्न्यसेत्। तत्र ध्यानम्–

कृष्णां देवीं त्रिवक्त्रां त्रिनयनलसितां दंष्ट्रिणीमुग्ररूपां
वज्रं शक्तिञ्च दण्डाभयवरददरान् दक्षवामे दधानाम्।
ध्यात्वा नाभिस्थपद्मे दशदलविलसत्कर्णिके लाकिनीं तां
मांसस्थां गौडभुक्तोत्सुकहृदयवतीं विन्यसेल्लाकिनीं ताम्।।[36]

दक्षाद्यूर्ध्वयोराद्ये तदाद्यधःस्थयोरन्ये, तदाद्यधःस्थयोः इतरे इत्यायुधस्थानम्।

"३ लां लीं लूं लैं लौं लः ल म ल व र यूं लाकिनि मां रक्ष रक्ष मम मांसधातुं रक्ष रक्ष सर्वसत्त्ववशंकरि देवि आगच्छागच्छेमां पूजां गृह्ण गृह्ण ऐं घोरे देवि ह्रीं सः परमघोरे ह्रूं घोररूपे एह्येहि नमश्चामुण्डे ड र ल क स हैं श्रीमहात्रिपुरसुन्दरि देवि वरदे विच्चे डं ढं णं तं थं दं धं नं पं फं मणिपूरपीठस्थे मणिपूरलाकिनी मणिपूरदेवनाथ श्रीपादुकां पूजयामि नमः" इति कर्णिकायां विन्यस्य तस्य परितस्तदक्षरशक्तीर्न्यसेत्।

"३ डं डामर्यै नमः। ३ ढं ढङ्कारिण्यै नमः। ३ णं णङ्कारिण्यै नमः। ३ तं तामस्यै नमः। ३ थं स्थानदेव्यै नमः। ३ दं दाक्षायण्यै

---

36. वस्तुतः श्रीविद्यार्णवादिग्रन्थानुरोधेन चतुर्थपादान्ते "चिन्तयेत्साधकेन्द्रः" इतिपाठः समीचीनः। ध्यानमिदं श्रीविद्यार्णवे षष्ठेश्वासे द्रष्टव्यम्।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नमः। ३ धं धात्र्यै नमः। ३ नं नन्दायै नमः। ३ पं पार्वत्यै नमः। ३ फं फट्कारिण्यै नमः'' इति लाकिनीवद् ध्येयाः।

ततः स्वाधिष्ठाने षट्कमलकर्णिकायां मेदोधातुदेवतां काकिनीं सावरणां ध्यायन्न्यसेत्। यथा–

स्वाधिष्ठानाख्यपद्मे रसदललसिते वेदवक्त्रां त्रिनेत्रां
पीताभां धारयन्तीं त्रिशिखगुणकपालाभयान्यात्तगर्वाम्।
[37]मेदोधातुप्रविष्टामलिमदमुदितां बन्धिनीत्यादिवीतां
दध्यान्ने सक्तचित्तामभिमतफलदां काकिनीं भावयेत्ताम्॥

दक्षोर्ध्वकरमारभ्य दक्षाधःकरपर्यन्तमायुधध्यानम्।

''३ कां कीं कूं कैं कौं कः क म ल व र यूं काकिनि मां रक्ष रक्ष मम मेदोधातुं रक्ष रक्ष सर्वसत्त्ववशंकरि देव्यागच्छागच्छेमां पूजां गृह्ण गृह्ण ऐं देवि ह्रीं सः परमघोरे हूं घोररूपे एह्येहि नमश्चामुण्डे ड र ल क स हैं श्रीमहात्रिपुरसुन्दरि देवि वरदे विच्चे बं भं मं यं रं लं स्वाधिष्ठानपीठस्थे स्वाधिष्ठानकाकिनी स्वाधिष्ठाननाथदेव श्रीपादुकां पूजयामि नमः" इति कर्णिकायां विन्यस्य परितः षट्दलेषु तदावरणशक्तीर्न्यसेत्।

---

37. श्रीविद्यार्णवे षष्ठे श्वासे अस्य श्लोकस्य तृतीये पादे ''मेदो धातुप्रतिष्ठामलिमदमुदितां बन्धिनीत्यादियुक्ताम्'' इति पाठः। ध्यानमिदं प्रपञ्चसारसङ्ग्रहेऽपि (पृ. 179) प्राप्यते। नित्योत्सवे (पृ. 82) श्लोकस्यास्य द्वितीये पादे ''हस्ताब्जैर्धारयन्तीं त्रिशिखगुण-कपालाङ्कुशानात्तगर्वाम्'', तृतीयपादान्ते ''बन्धिनींमुख्ययुक्तां'', चतुर्थपादे च ''पीतां दध्योदनेष्टामभिमतफलदां काकिनीं भावयामः'' इति पाठः।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"३ बं बन्धिन्यै नमः। ३ भं भद्रकाल्यै नमः। ३ मं महामायायै नमः। ३ यं यशस्विन्यै नमः। ३ रं रमायै नमः। ३ लं लम्बोदर्यै नमः" इति ताश्च काकिनीवद् ध्यायेत्।

ततो मूलाधारे चतुर्दलकमलकर्णिकायां अस्थिधातुदेवतां साकिनीं सपरिवारां ध्यायन्न्यसेत्। यथा—

देवीं ज्योतिःस्वरूपां त्रिनयनविलसत्पञ्चवक्त्रां सुदंष्ट्रां
हस्ताब्जैरिक्षुचापं सृणिमपि दधतीं पुस्तकं ज्ञानमुद्राम्।
मूलाधारस्थपद्मे निखिलपशुजनोन्मादिनीमस्थिसंस्थां
मुद्गान्नप्रीतियुक्तां मधुमदमुदितां चिन्तयेत् साकिनीं ताम्॥[38]

इति। वामार्धादूर्ध्वयोराद्ये तदाद्यधःस्थयोरन्ये इत्यायुधध्यानम्। अथ चापग्रहणात्तत्रैव पुष्पबाणानपि ध्यायेत्। धनुर्बाणयो अत्यन्तं साहचर्यादिति सौभाग्यपद्धत्यामस्मज्ज्येष्ठचरणाः।

"३ सां सीं सूं सैं सौं सः स म ल व र यूं साकिनि मां रक्ष रक्ष ममास्थिधातुं रक्ष रक्ष सर्वसत्त्ववशंकरि देवि आगच्छागच्छेमां पूजां गृह्ण गृह्ण ऐं घोरे देवि ह्रीं सः परमघोरे ह्रूं घोररूपे एह्येहि नमश्चामुण्डे ड र ल क स हैं श्रीमहात्रिपुरसुन्दरि देवि वरदे विच्चे वं शं षं सं मूलाधारपीठस्थे मूलाधारसाकिनी मूलाधारनाथदेव श्रीपादुकां पूजयामि नमः" इति विन्यस्य तद्दलेषु परिवारदेवताः परितो न्यसेत्।

"३ वं वरदायै नमः। ३ शं शशिन्यै नमः। ३ षं षण्डायै नमः। ३ सं सरस्वत्यै नमः" इति ताश्च साकिनीवद् ध्येयाः।

---

38. श्रीविद्यार्णवे षष्ठे श्वासे अस्य ध्यानस्य द्वितीये पादारम्भे "हस्ताम्भोजेषु चापं" इति पाठः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ततो भ्रूमध्ये आज्ञाचक्रे दिदलपद्मे मज्जधातुदेवतां हाकिनीं सपरिवारां ध्यायेत्। यथा–

भ्रूमध्ये बिन्दुपद्मे द्विदलसुललिते शुक्लवर्णां कराब्जै-
र्बिभ्राणां ज्ञानमुद्रां [39]डमरुकसहितामक्षमालां कपालम्।
षड्वक्त्रां मज्जसंस्थां त्रिनयनलसितां हंसवत्यादियुक्तां
हारिद्रान्ने प्रसक्तां सकलसुरनुतां हाकिनीं भावयेत्ताम्॥

इति दक्षाद्यूर्ध्वयोराद्ये तदाद्यधःस्थयोरन्ये इत्यायुधध्यानम्।

अथ न्यासः – "३ हां हीं हूं हैं हौं हः ह म ल व र यूं हाकिनि मां रक्ष रक्ष मम मज्जधातुं रक्ष रक्ष सर्वसत्त्ववशंकरि देव्यागच्छागच्छेमां पूजां गृह्ण गृह्ण ऐं घोरे देवि ह्रीं सः परमघोरे ह्रूं घोररूपे एह्येहि नमश्चामुण्डे ड र ल क स हैं श्रीमहात्रिपुरसुन्दरि देवि विच्चे हं क्षं आज्ञापीठस्थे आज्ञाहाकिनी आज्ञानाथदेव श्रीपादुकां पूजयामि नमः" इति विन्यस्य, तद्दलयोः–

"३ हं हंसवत्यै नमः। ३ क्षं क्षमावत्यै नमः" इति विन्यस्य हाकिनीवत्तदावरणशक्तीर्ध्यायेत्।

ततो ब्रह्मरन्ध्रे सहस्रदलपद्मकर्णिकायां शुक्लधातुदेवतां याकिनीं सावरणां ध्यात्वा न्यसेत्।

[40]मुण्डव्योमस्थपद्मे सकलदलयुते याकिनीं भैरवीं तां
यक्षिण्याद्यां समस्तायुधलसितकरां सर्ववर्णां समष्टिम्।

---

39. ध्यानमिदं श्रीविद्यार्णवे षष्ठे श्वासे, प्रपञ्चसारसंग्रहे (पृ. 180) च लभ्यते। प्रपञ्चसारसंग्रहे "डमरुककमलान्यक्षमालाम्", नित्योत्सवे (पृ. 82) च "डमरुकममलामक्षमालाम्" इति पाठान्तरम्।
40. ध्यानमिदं श्रीविद्यार्णवे षष्ठे श्वासे, प्रपञ्चसारसंग्रहे (पृ. 181) च लभ्यते। नित्योत्सवे (पृ. 83) तु श्लोकोऽयं किञ्चित् पाठान्तरयुक्तो दृश्यते।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सादीनां सर्ववक्त्रां सकलसुखकरीं सर्वधातुस्वरूपां
सर्वान्ने सक्तचित्तां परशिवरसिकां भावयेत् सर्वरूपाम्॥

इति ध्यानम्।

"३ यां यीं यूं यैं यौं यः य म ल व र यूं याकिनि मां रक्ष रक्ष मम शुक्लधातुं रक्ष रक्ष सर्वसत्त्ववशंकरि देवि आगच्छागच्छेमां पूजां गृह्ण गृह्ण ऐ घोरे देवि ह्रीं सः परमघोरे ह्रूं घोररूपे एह्येहि नमश्चामुण्डे ड र ल क स हैं श्रीमहात्रिपुरसुन्दरि देवि वरदे विच्चे अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं क्षं ब्रह्मरन्ध्रपीठस्थे ब्रह्मरन्ध्रयाकिनी ब्रह्मरन्ध्रनाथदेवश्रीपादुकां पूजयामि नमः" इति कर्णिकायां विन्यस्य तत्परितः ळकाररहितपञ्चाशन्मातृकावर्णदेवता न्यसेत्।

"३ अं अमृतायै नमः। ३ आं आकर्षिण्यै नमः। ३ इं इन्द्राण्यै नमः। ३ ईं ईशान्यै नमः। ३ उं उमायै नमः। ३ ऊं ऊर्ध्वकेशिन्यै नमः। ३ ऋं ऋद्ध्यै नमः। ३ ॠं ॠपायै नमः। ३ लृं लृतायै नमः। ३ ॡं ॡषायै नमः। ३ एं एकपादायै नमः। ३ ऐं ऐश्वर्यात्मिकायै नमः। ३ ओं ओङ्कारात्मिकायै नमः। ३ औं औषधात्मिकायै नमः। ३ अं अम्बिकायै नमः। ३ अः अक्षरात्मिकायै नमः। ३ कं कालरात्र्यै नमः। ३ खं खातीतायै नमः। ३ गं गायत्र्यै नमः। ३ घं घण्टाधारिण्यै नमः। ३ ङं ङार्णात्मिकायै नमः। ३ चं चामुण्डायै नमः। ३ छं छायायै नमः। ३ जं जयायै नमः। ३ झं झङ्कारिण्यै नमः। ३ ञं ञार्णात्मिकायै नमः। ३ टं टङ्कहस्तायै नमः। ३ ठं ठङ्कारिण्यै नमः। ३ डं डामर्यै नमः। ३ ढं ढङ्कारिण्यै नमः। ३ णं णङ्कारिण्यै नमः। ३ तं तामस्यै नमः। ३ थं स्थानदेव्यै नमः। ३ दं दाक्षायण्यै नमः। ३ धं धात्र्यै नमः। ३ नं नन्दायै नमः। ३ पं

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पार्वत्यै नमः। ३ फं फट्कारिण्यै नमः। ३ बं बन्धिन्यै नमः। ३ भं भद्रकाल्यै नमः। ३ मं महामायायै नमः। ३ यं यशस्विन्यै नमः। ३ रं रमायै नमः। ३ लं लम्बोदर्यै नमः। ३ वं वरदायै नमः। ३ शं शशिन्यै नमः। ३ षं षण्डायै नमः। ३ सं सरस्वत्यै नमः। ३ हं हंसवत्यै नमः। ३ क्षं क्षमावत्यै नमः'' इति विन्यसेत्। अयं च योगिनीन्यासः मन्त्रलिङ्गात् स्वच्छन्दपद्धतौ तथैव दर्शनाच्च।[41]

अथ राशिन्यासः। तत्र ध्यानम्–

रक्तं श्वेतं हरिद्वर्णं पाण्डुं चित्रं सितं स्मरेत्।
पिङ्गला पिङ्गलाकर्द(वभ्रु)कर्बुरारुणधूम्रकान्।।[42]

दक्षपादे – ३ अं आं इं ईं मेषाय नमः। लिङ्गदक्षपार्श्वे– ३ उं ऊं ऋं वृषभाय नमः। दक्षकुक्षौ– ३ ॠं लृं ॡं मिथुनाय नमः। दक्षहृदि– ३ एं ऐं कर्काय नमः। दक्षबाहुमूले– ३ ओं औं सिंहाय नमः। शिरोदक्षभागे– ३ अं अः शं षं सं हं कन्यायै नमः। शिरोवामभागे– ३ कं खं गं घं ङं तुलायै नमः। वामबाहुमूले– ३ चं छं जं झं ञं वृश्चिकाय नमः। वामहृदि– ३ टं ठं डं ढं णं धनुषे नमः। वामकुक्षौ– ३ तं थं दं धं नं मकराय नमः। लिङ्गवामपार्श्वे– ३ पं फं बं भं मं कुम्भाय नमः। वामपादे– ३ यं रं लं वं क्षं मीनाय नमः।

---

41. योगिनीहृदये दीपिकायाममृतादियुतामन्त्रा स्वच्छन्दसङ्ग्रहोक्ता दृश्यन्ते।

42. विभिन्नग्रन्थेष्वेवं ध्यानान्युपलभ्यन्ते, यथा–ज्ञानार्णवे (14.104-105) ''रक्तश्वेतहरिद्वर्णपाण्डुचित्रासितान्स्मरेत्। पिशङ्गपिङ्गलौ बभ्रूकर्बुरासित-धूम्रकान्।।'' इति; श्रीविद्यार्णवे षष्ठे श्वासे, ''रक्तं श्वेतं हरिद्वर्णं पाण्डुं चित्रं सितं स्मरेत्। पिशङ्गकपिलौ कद्रुकर्बुरारुणधूमलान्।।'' इति; नित्योत्सवे (पृ. 83) च–''रक्तश्वेतहरित्पाण्डुचित्र-कृष्णपिशङ्गकान्। कपिशबभ्रुकिर्म्मीरकृष्णधूम्रान् क्रमात् स्मरेत्।।'' इति।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अथ पीठन्यासः। तत्र ध्यानम्–

सितासितारुणश्यामहरित्पीतान्यनुक्रमात्।
पुनः क्रमेण देवेशि पञ्चाशत्पीठसञ्चयः॥

इति भावयित्वा, मातृकाभिः समं पूर्वोक्तेषु तासां स्थानेषु पीठानि क्रमेण विन्यसेत्। यथा–

''ऐं ह्रीं श्रीं अं कामरूपाय नमः– शिरसि। ३ आं वाराणस्यै नमः– मुखवृत्ते। ३ इं नेपालाय नमः– दक्षनेत्रे। ३ ईं पौण्ड्रवर्धनाय नमः– वामनेत्रे। ३ उं पुरस्थिराय नमः– दक्षकर्णे। ३ ऊं कान्यकुब्जाय नमः– वामकर्णे। ३ ऋं पूर्णशैलाय नमः– दक्षनासापुटे। ३ ॠं अर्बुदाय नमः– वामनासापुटे। ३ लृं आम्रातकेश्वराय नमः– दक्षगण्डे। ३ ॡं एकाम्राय नमः– वामगण्डे। ३ एं त्रिस्रोतसे नमः– ऊर्ध्वोष्ठे। ३ ऐं कामकोटकाय नमः– अधरोष्ठे। ३ ओं कैलाशाय नमः– ऊर्ध्वदन्तपङ्क्तौ। ३ औं भृगुनगराय नमः– अधोदन्तपङ्क्तौ। ३ अं केदाराय नमः– जिह्वाग्रे। ३ अः पूर्णचन्द्रकाय नमः– कण्ठे। ३ कं श्रीपीठाय नमः– दक्षबाहुमूले। ३ खं ओंकारपीठाय नमः– दक्षकूर्परे। ३ गं जालन्धराय नमः– दक्षमणिबन्धे। ३ घं मालवाय नमः– दक्षकराङ्गुलिमूले। ३ ङं कुलान्तकाय नमः – दक्षकराङ्गुलिमूले। ३ चं देवीकोट्टाय नमः– वामबाहुमूले। ३ छं गोकर्णाय नमः– वामकूर्परे। ३ जं मारुतेश्वराय नमः– वाममणिबन्धे। ३ झं अट्टहासाय नमः– वामकराङ्गुलिमूले। ३ ञं विरजायै नमः– वामकराङ्गुल्यग्रे। ३ टं राजगेहाय नमः– दक्षोरुमूले। ३ ठं महापथाय नमः– दक्षजानुनि। ३ डं कोलापुराय नमः– दक्षगुल्फे। ३ ढं एलापुराय नमः– दक्षपादाङ्गुलिमूले। ३ णं कालेशाय नमः– दक्षपादाङ्गुल्यग्रे। ३ तं जयन्तिकायै नमः– वामोरुमूले। ३ थं उज्जयिन्यै नमः– वामजानुनि। ३ दं चित्रायै नमः– वामगुल्फे। ३ धं क्षीरकाय

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नमः– वामपादाङ्गुलिमूले। ३ नं हस्तिनापुराय नमः– वामपादाङ्गुल्यग्रे। ३ पं ओड्डीशाय नमः– दक्षपार्श्वे। ३ फं प्रयागाय नमः– वामपार्श्वे। ३ बं षष्ठ्यै नमः– पृष्ठे। ३ भं मायापुर्यै नमः– नाभौ। ३ मं जलेशाय नमः– जठरे। ३ यं मलयाय नमः– हृदये। ३ रं श्रीशैलाय नमः– दक्षस्कन्धे। ३ लं मेरवे नमः– गलपृष्ठे। ३ वं गिरिवराय नमः– वामस्कन्धे। ३ शं महेन्द्राय नमः– हृदयादिदक्षकराङ्गुल्यन्तम्। ३ षं वामनाय नमः– हृदयादिवामकराङ्गुल्यन्तम्। ३ सं हिरण्यपुराय नमः– हृदयादिदक्षपादाङ्गुल्यन्तम्। ३ हं महालक्ष्मीपुराय नमः– हृदयादिवामपादाङ्गुल्यन्तम्। ३ ळं ओड्याणाय नमः– हृदयादिगुह्यान्तम्। ३ क्षं छायाछत्राय नमः–हृदयादिमूर्धान्तम्'' इति मातृकास्थानेषु न्यसेत्।

अत्र पीठनामानि योगिनीहृदयोक्तानि[43] दर्शितानि। देवतैक्यापादनेनात्मशोधकस्यैव तस्य नान्तरीयकफलं दर्शितं तत्रैव।

षोढान्यासस्तु यः प्रोक्तः सर्वत्रैवाऽपराजिताः।
एवं यो न्यस्तगात्रस्तु स पूज्यः सर्वयोगिभिः॥

नाऽस्त्यस्य पूज्यो लोकेषु पितृमातृमुखो जनः।
स एव पूज्यः सर्वेषां स स्वयं परमेश्वरः॥

षोढान्यासविहीनं यं प्रणमेदेष पार्वति।
सोऽचिरान्मृत्युमाप्नोति नरकं च प्रपद्यते॥

(यो.हृ. 3.10–13)

इति षोढान्यासः सम्पूर्णः।

---

43. योगिनीहृदये पूजासङ्केतप्रकरणे–''पीठानि विन्यसेद् देवि'' इत्यारभ्य ''मातृकारूपकाः स्थिताः'' (श्लो. 33–40) इत्यन्तमष्टौ श्लोकाः।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ततश्चक्रन्यासं कुर्यात्। स च त्रिविधः– सृष्टिस्थिति-संहारभेदात्। तत्र गृहस्थैः स्थित्यन्त एव न्यासः कर्तव्य इति संहारसृष्टिस्थितिक्रमेण न्यासाः प्रदृश्यन्ते। यद्यपि योगिनीहृदये **"षोढान्यासेऽणिमाद्याश्च मूलदेव्यादिकं प्रिये। करशुद्ध्यादि-कम्"** (3.87–88) इत्यादिना चक्रन्यासेषु संहारसृष्टिरेव दर्शितौ तथाऽपि सम्प्रदायानुसारेण मेरुतन्त्रोक्तस्थितिन्यासोऽपि लिख्यत[44] इति बोद्धव्यम्। मूलमन्त्रऋष्यादिकरषडङ्गध्यानान्ते,

शरीरं चिन्तयेदादौ निजं श्रीचक्ररूपकम्।
त्वागाद्याकारनिर्मुक्तं ज्वलत्कालाग्निसन्निभम्।।

इति विभाव्य, "३ समस्तप्रकटगुप्तगुप्ततरसम्प्रदायकुलकौलनिगर्भ-रहस्यपरापररहस्यपरापरातिरहस्ययोगिनीगणश्रीचक्राय नमः" इति शिर आदि पादान्तं व्यापकं विन्यसेत्। पद्धतिकारास्तु तादृक् "श्रीचक्रपादुकां पूजयामि नमः" इति सप्ताक्षरीमपि योजयन्ति। तन्त्रराजे सप्ताक्षर्याः पूजायां विनियोगदर्शनान्न्यासे सर्वत्राऽपि नमःपदमेव योज्यम्।[45]

ततः "ऐं ह्रीं श्रीं आद्यचतुरस्त्ररेखायै नमः" इति दक्षांसपृष्ठादि वक्ष्यमाणतद्गतदेव्तास्थानेषु व्यापकं विन्यस्य अणिमासिद्धिं न्यसेत्। यथा–

"३ अणिमासिद्ध्यै नमः– दक्षांसपृष्ठे। ३ लघिमासिद्ध्यै नमः– तत्पाण्यग्रे। ३ महिमासिद्ध्यै नमः– तत्स्फिजि। ३ ईशित्वसिद्ध्यै नमः– तत्पादाङ्गुलिषु। ३ वशित्वसिद्ध्यै नमः– वामपादाङ्गुलिषु। ३ प्राकाम्यसिद्ध्यै नमः– वामस्फिजि। ३ भुक्तिसिद्ध्यै नमः– तत्पाण्यग्रे। ३ इच्छासिद्ध्यै नमः– तदंसपृष्ठे।

---

44. मेरुतन्त्रे (5.295–296) स्थितिन्यासो निर्दिष्टः।
45. तन्त्रराजतन्त्रे (2.13–17) पञ्चभिः श्लोकैः सप्ताक्षरो मन्त्रो दृश्यते।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

३ प्राप्तिसिद्ध्यै नमः— चूडापदे। ३ सर्वकामसिद्ध्यै नमः— पादतलयोः।"

ततः, "३ चतुरस्रमध्यरेखायै नमः" प्राग्वद् व्यापकं विन्यस्य, "३ आं ब्रह्माण्यै नमः— पादाङ्गुष्ठयोः। ३ ईं माहेश्वर्यै नमः— दक्षपार्श्वे। ३ ऊं कौमार्यै नमः— मूर्ध्नि। ३ ॠं वैष्णव्यै नमः— वामपार्श्वे। ३ ॡं वाराह्यै नमः— दक्षजानुनि। ३ ऐं माहेन्द्र्यै नमः — वामजानुनि। ३ औं चामुण्डायै नमः— दक्षांसे। ३ अः महालक्ष्म्यै नमः— वामांसे।"

ततः, "३ चतुरस्रान्त्यरेखायै नमः" इति व्यापकं कृत्वा, "३ द्रां सर्वसंक्षोभिणीमुद्रायै नमः— पादाङ्गुष्ठद्वये। ३ द्रीं सर्वविद्राविणीमुद्रायै नमः— दक्षपार्श्वे। ३ क्लीं सर्वाकर्षिणीमुद्रायै नमः— मूर्ध्नि। ३ ब्लूं सर्ववशंकरिणी मुद्रायै नमः— वामपार्श्वे। ३ सः सर्वोन्मादिनीमुद्रायै नमः— दक्षजानुनि। ३ क्रों सर्वमहाङ्कुशामुद्रायै नमः— वामजानुनि। ३ ह् स् ख् फ्रें सर्वखेचरीमुद्रायै नमः— दक्षांसे। ३ अं आं सौः त्रिखण्डामुद्रायै नमः— वामांसे। ३ ह्सौं सर्वबीजमुद्रायै नमः— ब्रह्मरन्ध्रे। ३ ऐं सर्वयोनिमुद्रायै नमः— पादाङ्गुष्ठे" इति न्यसेत्।[46]

ततः, "षोडशदलपद्माय नमः" इति वक्ष्यमाणस्थानेषु व्यापकं विन्यस्य, "३ अं कामाकर्षिणीनित्याकलायै नमः— दक्षकर्णपृष्ठे।

---

46. अत्र सर्वयोनिमुद्रानन्तरमेव सर्वत्रिखण्डामुद्राया न्यास उचितः प्रतिभाति। प्रपञ्चसारसंग्रहे (पृ. 188) तथादर्शनात्। तथैव योगिनीहृदयेऽपि (1.57–71)। अत्र मूलग्रन्थे सर्वत्रिखण्डया सह यानि बीजानि, तान्यपि प्रथमावरणाधिष्ठात्र्या त्रिपुरादेव्या एव, न तु त्रिखण्डायाः। सर्वत्रिखण्डाया बीजानि "ह्स्रैं हसक्लरीं ह्स्रौः" इति।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

३ आं बुद्ध्याकर्षिणीनित्याकलायै नमः– दक्षांसे। ३ इं अहङ्काराकर्षिणी-नित्याकलायै नमः– दक्षकूर्परे। ३ ईं शब्दाकर्षिणीनित्याकलायै नमः– दक्षकरपृष्ठे। ३ उं स्पर्शाऽऽकर्षिणीनित्याकलायै नमः– दक्षोरौ। ३ ऊं रूपाकर्षिणीनित्याकलायै नमः– दक्षजानुनि। ३ ऋं रसाकर्षिणी-नित्याकलायै नमः– दक्षगुल्फे। ३ ॠं गन्धाकर्षिणीनित्याकलायै नमः– दक्षपादे। ३ लृं चित्ताकर्षिणीनित्याकलायै नमः– वामपादे। ३ ॡं धैर्याकर्षिणीनित्याकलायै नमः– वामगुल्फे। ३ एं स्मृत्या-कर्षिणीनित्याकलायै नमः– वामजानुनि। ३ ऐं नामाकर्षिणी-नित्याकलायै नमः– वामोरौ। ३ ओं बीजाकर्षिणीनित्याकलायै नमः– वामकरपृष्ठे। ३ औं आत्माकर्षिणीनित्याकलायै नमः– वामकूर्परे। ३ अं अमृताकर्षिणीनित्याकलायै नमः– वामांसे। ३ अः शरीराकर्षिणीनित्याकलायै नमः– वामकरपृष्ठे'' [इत्येवं] न्यसेत्।

ततः, ''३ अष्टदलपद्माय नम'' इति व्यापकं वक्ष्यमाणस्थानेषु विन्यस्य, ''३ कं खं गं घं ङं अनङ्गकुसुमायै नमः– दक्षशङ्खे। ३ चं छं जं झं ञं अनङ्गमेखलायै नमः– दक्षजानुनि। ३ टं ठं डं ढं णं अनङ्गमदनायै नमः– दक्षोरौ। ३ तं थं दं धं नं अनङ्गमदनातुरायै नमः– दक्षगुल्फे। ३ पं फं बं भं मं अनङ्गवेगिन्यै नमः– वामोरौ। ३ शं षं सं हं अनङ्गाङ्कुशायै नमः– वामजानुनि। ३ ळं क्षं अनङ्गमालिन्यै नमः– वामशङ्खे'' इति न्यसेत्।

ततः, ''३ चतुर्दशारचक्राय नमः'' इति प्राग्वद् व्याप्य, ''३ कं सर्वसंक्षोभिणीशक्त्यै नमः– ललाटमध्ये। ३ खं सर्वविद्राविणीशक्त्यै नमः– ललाटदक्षपार्श्वे। ३ गं सर्वाकर्षिणीशक्त्यै नमः– दक्षगण्डे। ३ घं सर्वाह्लादिनीशक्त्यै नमः– दक्षांसे। ३ ङं सर्वसम्मोहिनीशक्त्यै नमः– दक्षपार्श्वे। ३ चं सर्वस्तम्भिनी शक्त्यै नमः– दक्षोरौ। ३ छं सर्वजृम्भिणीशक्त्यै नमः– दक्षजङ्घायाम्। ३ जं सर्ववशङ्करीशक्त्यै

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नमः— वामजङ्घायाम्। ३ झं सर्वरञ्जिनीशक्त्यै नमः— वामोरौ। ३ ञं सर्वोन्मादिनीशक्त्यै नमः— वामपार्श्वे। ३ टं सर्वार्थसाधिनीशक्त्यै नमः— वामांसे। ३ ठं सर्वसम्पत्तिपूरिणीशक्त्यै नमः— वामगण्डे। ३ डं सर्वमन्त्रमयीशक्त्यै नमः— ललाटवामपार्श्वे। ३ ढं सर्वद्वन्द्वक्षयङ्करीशक्त्यै [नमः] ललाटपृष्ठाख्यशिखापदे'' इति न्यसेत्।

[ततः], ''३ बहिर्दशारचक्राय नमः'' इति प्राग्वद् व्याप्य, ''३ णं सर्वसिद्धिप्रदादेव्यै नमः— दक्षनेत्रे। ३ तं सर्वसम्पत्प्रदादेव्यै नमः— नासामूले। ३ थं सर्वप्रियङ्करीदेव्यै नमः— वामनेत्रे। ३ दं सर्वमङ्गलकारिणीदेव्यै नमः — वामदोर्मूले। ३ धं सर्वकामप्रदादेव्यै नमः— वामकटिमूले। ३ नं सर्वदुःखविमोचिनीदेव्यै नमः— दक्षिणजानुनि। ३ पं सर्वमृत्युप्रशमनीदेव्यै नमः— वामजानुनि। ३ फं सर्वविघ्ननिवारिणीदेव्यै नमः— गुदे। ३ बं सर्वाङ्गसुन्दरीदेव्यै नमः— दक्षकटिमूले। ३ भं सर्वसौभाग्यदायिनीदेव्यै नमः— दक्षदोर्मूले'' इति न्यसेत्।

ततः, ''३ अन्तर्दशारचक्राय नमः'' इति पूर्ववद् व्याप्य, ''३ मं सर्वज्ञादेव्यै नमः— दक्षनासापुटे। ३ यं सर्वशक्तिप्रदादेव्यै नमः— दक्षसृक्किणि। ३ रं सर्वैश्वर्यप्रदादेव्यै नमः— दक्षस्तने। ३ लं सर्वज्ञानमयीदेव्यै नमः— दक्षमुष्के। ३ वं सर्वव्याधिविनाशिनीदेव्यै नमः— सीविन्याम्। ३ शं सर्वाधारस्वरूपिणीदेव्यै नमः—वाममुष्के। ३ षं सर्वपापहरादेव्यै नमः— वामस्तने। ३ सं सर्वानन्दमयीदेव्यै नमः— वामसृक्किणि। ३ हं सर्वरक्षास्वरूपिणीदेव्यै नमः— वामनासापुटे। ३ क्षं सर्वेप्सितफलप्रदादेव्यै नमः— नासाग्रे'' इति न्यसेत्।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ततः, "३ अष्टकोणाय नमः" इति प्राग्वद् व्याप्य, "३ अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः ब्लूँ वशिनीवाग्देवतायै नमः— दक्षचिबुके। ३ कवर्गः सबिन्दुः[47] क्ल्ह्रीं कामेश्वरीवाग्देवतायै नमः— दक्षकर्णे। ३ चं छं जं झं ञं क्लीं(न्ब्लीं) मोदिनीवाग्देवतायै नमः— दक्षहृदये। ३ टं ठं डं ढं णं य्लूं विमलावाग्देवतायै नमः— दक्षनाभिदेशे। ३ तं थं दं धं नं ज्म्रीं अरुणावाग्देवतायै नमः— नाभिवामभागे। ३ पं फं बं भं मं हस्ल्व्यूं जयिनीवाग्देवतायै नमः— वामहृदये। ३ यं रं लं वं झ्म्र्यूं सर्वेश्वरीवाग्देवतायै नमः— वामकर्णे। ३ शं षं सं हं ळं क्षं कौलिनीवाग्देवतायै नमः— चिबुके" इति न्यसेत्।

ततः, "३ सान्तरालत्रिकोणाय नमः" इति हृदये व्यापकं विन्यस्य हृदयस्थत्रिकोणचतुर्दिक्षु अष्टकोणत्रिकोणान्तराले, "३ द्रां द्रीं क्लीं ब्लूं सः यां रां लां वां सां सर्वजम्भनेभ्यः कामेश्वरबाणेभ्यो नमः - हृदयोपरि।" अत्र कामेश्वरेत्यनेन पुमान् स्त्रियेत्येकशेषेण कामेश्वरकामेश्वर्यौ गृह्येते। एवमुपर्यपि ध्येयम्। "३ थं धं सर्वमोहनाभ्यां कामेश्वरचापाभ्यां नमः - दक्षपार्श्वे। ३ आं ह्रीं सर्ववशंकराभ्यां कामेश्वरपाशाभ्यां नमः - हृदयादधः। ३ क्रों क्रों सर्वस्तम्भनाभ्यां कामेश्वराङ्कुशाभ्यां नमः - वामपार्श्वे" इति न्यसेत्।

[48]ततः, "३ वाग्भवकूटं अग्निचक्रे कामाख्यगिर्यालये मित्रेशनाथात्मिके जाग्रद्दशाधिष्ठायिके इच्छाशक्त्यात्मकरुद्रात्म-कशक्तिकामेश्वरीदेव्यै नमः— हृदयात्मकत्रिकोणाग्रे हृदयादधः प्रदेशे। ३ कामराजकूटं सूर्यचक्रे जालन्धरपीठे षष्ठीशनाथात्मिके

---

47. "कवर्गः सबिन्दुः" इत्यस्य तात्पर्यं "कं खं गं घं ङं" इति।
48. कामेश्वर्यादिदेवीनां न्यासोऽयं प्रपञ्चसारसंग्रहे (पृ. 183), योगिनीहृदये दीपिकायां च किञ्चिन्न्यूनाधिकरूपेणोपलभ्यते।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

स्वप्नदशाधिष्ठायिके ज्ञानशक्त्यात्मकविष्ण्वात्मकशक्तिवज्रे-श्वरीदेव्यै नमः— दक्षस्तनान्तरे। ३ शक्तिकूटं सोमचक्रे पूर्णगिरिपीठे उड्डीशनाथात्मिके सुषुप्तिदशाधिष्ठायिके क्रियाशक्त्यात्मक-ब्रह्मात्मकशक्तिश्रीभगमालिनीदेव्यैः नमः— वामस्तनान्तरे" इति न्यसेत्।

ततः, "३ श्रीबिन्दुचक्राय नमः" इति हृदयमध्ये व्यापकं कृत्वा, "३ कूटत्रयं ब्रह्मचक्रे महोड्ड्यानपीठे श्रीचर्यानाथात्मिके तुर्यदशाधिष्ठायिके जाग्रत्स्वप्नसुषुप्तितुर्यतुर्यातीतेच्छाज्ञान-क्रियाशान्तिशान्तातीतपरब्रह्मस्वरूपशक्तिश्रीमहात्रिपुरसुन्दर्यै नमः" इति हृदयमध्ये न्यसेत्।

अत्र कामेश्वर्यादिन्यासे अग्निचक्र इत्यादिमन्त्रस्सम्प्रदाया-नुरोधेन लिखितः। त्रैलोक्यमोहनचक्रादिन्यासेषु पद्धतिषु दर्शिताश्चक्रेश्वरीन्यासादयः आका(क)रेषु पूजायामेव दर्शितत्वा-दुपेक्षिताः। इति संहारन्यासः।

अथ सृष्टिन्यासादयः। ब्रह्मरन्ध्रे- "३ मूलं सर्वानन्दमयचक्राय बैन्दवाय नमः" इति व्याप्य, "३ मूलं ब्रह्मचक्रे महोड्ड्यानपीठे श्रीचर्यानाथात्मिके तुर्यदशाधिष्ठायिके जाग्रत्स्वप्नसुषुप्ति-तुर्यतुर्यातीतेच्छाज्ञानक्रियाशान्तिशान्तातीतपरब्रह्मस्वरूपशक्ति-श्रीमहात्रिपुरसुदरीदेव्यै नमः।" तत्रैव परितः शिरोमध्यबिन्दुरूपत्रिकोणे — "३ सर्वसिद्धिप्रदचक्राय त्रिकोणाय नमः" इति व्याप्याग्रे कोणे— "३ वाग्भवं अग्निचक्रे कामाख्यगिर्यालये मित्रेशनाथात्मिके जाग्रद्दशाधिष्ठायिके इच्छाशक्त्यात्मकरुद्रात्मशक्तिश्रीकामेश्वरीदेव्यै नमः।" दक्षकोणे— "३ कामराजकूटं सूर्यचक्रे जालन्धरपीठे षष्ठीशनाथात्मिके स्वप्नदशाधिष्ठायिके ज्ञानशक्त्यात्मविष्ण्वात्म-शक्तिश्रीवज्रेश्वरीदेव्यै नमः।" वामकोणे— "३ शक्तिकूटं सोमचक्रे पूर्णगिरिपीठे उड्डीशनाथात्मिके सुषुप्तिदशाधिष्ठायिके क्रिया-

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

शक्त्यात्मब्रह्मात्मशक्तिश्रीभगमालिनीदेव्यै नमः" [इति प्रथमः]।

इति त्रिकोणन्यासं कृत्वा आयुधन्यासं कुर्यात्। यथा–

"दक्षनेत्रे– ३ कामेश्वरबाणेभ्यो नमः। वामनेत्रे– ३ कामेश्वरीबाणेभ्यो नमः। दक्षभुजि– ३ कामेश्वरचापाय नमः। वामभुजि– ३ कामेश्वरीचापाय नमः। दक्षकर्णे– ३ कामेश्वरपाशाय नमः। वामकर्णे– ३ कामेश्वरीपाशाय नमः। दक्षनासापुटे– कामेश्वराङ्कुशाय नमः। वामनासापुटे– ३ कामेश्वर्यङ्कुशाय नमः।" इति [द्वितीयः]।

अथ वाग्देवताष्टकं शिरसि मुण्डमालाकारेण न्यसेत्। तत्प्रकारः– "३ सर्वरोगहरचक्रायाष्टकोणाय नमः" इति शिरसि वेष्टनक्रमेण व्याप्य, "शिरसः प्राग्देशे ललाटे तिलकस्थाने– ३ अं अः (16) ब्लूँ वशिनीवाग्देवतायै नमः। तदाग्नेये– ३ कवर्गः कल्ह्रीं कामेश्वरीवाग्देवतायै नमः। तद्दक्षिणे– ३ चवर्गः न्व्लीं मोदिनीवाग्देवतायै नमः। तन्नैर्ऋत्ये– ३ टवर्गः य्लूं विमलावाग्देवतायै नमः। तत्पश्चिमे– ३ तवर्गः ज्म्रीं अरुणावाग्देवतायै नमः। तद्वायव्ये– ३ पवर्गः हस्ल्व्यूं जयिनीवाग्देवतायै नमः। तदुत्तरतः– ३ यं रं लं वं झ्म्र्यूँ सर्वेश्वरीवाग्देवतायै नमः। तदीशाने– ३ शं षं सं हं ळं क्षं क्ष्म्रीं कौलिनीवाग्देवतायै नमः।" इति [तृतीयः]।

अथान्तर्दशारन्यासः ललाटादिस्थानेषु– "३ सर्वरक्षाकरचक्रायान्तर्दशाराय नमः" इति व्याप्य, ललाटे– ३ मं सर्वज्ञादेव्यै नमः। दक्षनेत्रमूले– ३ यं सर्वशक्तिप्रदादेव्यै नमः। दक्षापाङ्गे– ३ रं सर्वैश्वर्यप्रदादेव्यै नमः। दक्षकर्णमूले– ३ लं सर्वज्ञानमयीदेव्यै नमः। दक्षकर्णपृष्ठे– ३ वं सर्वव्याधिविनाशिनीदेव्यै नमः। चूडापदे– ३ शं सर्वाधारस्वरूपिणीदेव्यै नमः। वामकर्णपृष्ठे– ३ षं सर्वपापहरादेव्यै नमः। वामकर्णमूले–३ सं सर्वानन्दमयीदेव्यै नमः। वामापाङ्गे–३

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

हं सर्वरक्षास्वरूपिणीदेव्यै नमः। वामनेत्रमूले- ३ ळं क्षं सर्वेप्सितफलप्रदादेव्यै नमः।" इति चतुर्थः।

अथ बहिर्दशारचक्रन्यासः। कण्ठे प्रादक्षिण्येन, "३ सर्वार्थसाधकचक्राय बहिर्दशाराय नमः" इति व्याप्य, "३ णं सर्वसिद्धिप्रदादेव्यै नमः- कण्ठकूपे। ३ तं सर्वसम्पत्प्रदादेव्यै नमः- तदाग्नेये। ३ थं सर्वप्रियङ्करीदेव्यै नमः- तद्दक्षिणतः। ३ दं सर्वमङ्गलकारिणीदेव्यै नमः- तन्नैर्ऋते। ३ धं सर्वकामप्रदादेव्यै नमः- तत्पश्चिमे। ३ नं सर्वदुःखविमोचिनीदेव्यै नमः- पुनश्च तत्पश्चिमे। ३ पं सर्वमृत्युप्रशमनीदेव्यै नमः- तद्वायव्ये। ३ फं सर्वविघ्नविनाशिनीदेव्यै नमः- तदुत्तरे। ३ बं सर्वाङ्गसुन्दरीदेव्यै नमः- तदीशाने। ३ भं सर्वसौभाग्यदायिनीदेव्यै नमः- कण्ठकूपे" एवम्। इति पञ्चमः।

ततश्चतुर्दशारन्यासः। हृदयादिपृष्ठवंशान्तं सप्तस्थानानि, पृष्ठवंशादिहृदन्तं सप्तस्थानानि परिकल्प्य तेषु स्थानेषु वक्ष्यमाणचतुर्दशशक्तीर्न्यसेत्। "३ सर्वसौभाग्यदायकचक्राय चतुर्दशाराय नमः" इति तेषु व्याप्य, "३ कं सर्वसंक्षोभिणीशक्त्यै नमः। ३ खं सर्वविद्राविण्यै शक्त्यै नमः। ३ गं सर्वाकर्षिण्यै शक्त्यै नमः। ३ घं सर्वाह्लादिन्यै शक्त्यै नमः। ३ ङं सर्वसम्मोहिन्यै शक्त्यै नमः। ३ चं सर्वस्तम्भिन्यै शक्त्यै नमः। ३ छं सर्वजम्भिन्यै शक्त्यै नमः" इति हृदयादिपृष्ठवंशान्तं प्रादक्षिण्येन सप्त न्यसेत्। "३ जं सर्ववशङ्कर्यै शक्त्यै नमः। ३ झं सर्वरञ्जिन्यै शक्त्यै नमः। ३ ञं सर्वोन्मादिन्यै शक्त्यै नमः। ३ टं सर्वार्थसाधिन्यै शक्त्यै नमः। ३ ठं सर्वसम्पत्तिपूरिण्यै शक्त्यै नमः। ३ डं सर्वमन्त्रमय्यै शक्त्यै नमः। ३ ढं सर्वद्वन्द्वक्षयङ्कर्यै शक्त्यै नमः" इति पृष्ठवंशादिहृदन्तं न्यसेत्। इति षष्ठः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अथाष्टदलन्यासः। पृष्ठवंशादिषु "३ सर्वसंक्षोभणाय अष्टदलपद्माय नमः" इति व्याप्य, "३ कवर्गः सबिन्दुक अनङ्गकुसुमायै नमः– पृष्ठवंशे। ३ चवर्ग अनङ्गमेखलायै नमः– वामपार्श्वे। ३ टवर्ग अनङ्गमदनायै नमः– नाभौ। ३ तवर्ग अनङ्गमदनातुरायै नमः– दक्षपार्श्वे। ३ पवर्ग अनङ्गरेखायै नमः– पृष्ठवंशवामपार्श्वान्तराले। ३ यं रं लं वं अनङ्गवेगिन्यै नमः– वामपार्श्वनाभ्यन्तराले। ३ शं षं सं हं अनङ्गमहाङ्कुशायै नमः– नाभिदक्षपार्श्वान्तराले। ३ ळं क्षं अनङ्गमालिन्यै [नमः]– दक्षपार्श्वपृष्ठवंशान्तराले।" इति सप्तमः।

अथ षोडशदलपद्मन्यासः। स्वाधिष्ठानदेशे "३ सर्वाशापरिपूरकचक्राय षोडशदलपद्माय नमः" इति व्याप्य, स्वस्य पूर्वभागे लिङ्गाधः समारभ्य वामवर्तक्रमेण दक्षिणभागावधि प्रतिदिशं चतस्रः कामाकर्षिण्यादिशक्तीर्न्यसेत्। यथा–

"३ अं कामाकर्षिणीनित्याकलायै नमः। ३ आं बुद्ध्याकर्षिणी-नित्याकलायै नमः। ३ इं अहङ्काराकर्षिणीनित्याकलायै नमः। ३ ईं शब्दाकर्षिणीनित्याकलायै नमः। ३ उं स्पर्शाकर्षिणीनित्याकलायै नमः। ३ ऊं रूपाकर्षिणीनित्याकलायै नमः। ३ ऋं रसाकर्षिणी-नित्याकलायै नमः। ३ ॠं गन्धाकर्षिणीनित्याकलायै नमः। ३ लृं चित्ताकर्षिणीनित्याकलायै नमः। ३ ॡं धैर्याकर्षिणीनित्याकलायै नमः। ३ एं स्मृत्याकर्षिणीनित्याकलायै नमः। ३ ऐं नामाकर्षिणीनित्याकलायै नमः। ३ ओं बीजाकर्षिणीनित्याकलायै नमः। ३ औं आत्माकर्षिणीनित्याकलायै नमः। ३ अं अमृताकर्षिणी-नित्याकलायै नमः। ३ अः शरीरकर्षिणीनित्याकलायै नमः।" इत्यष्टमः।

अथ मुद्रान्तरन्यासः। मूलाधारोपलक्षितबहिःप्रदेशे, "३ त्रैलोक्यमोहनचक्राय चतुरस्रत्रयाय नमः" इति कट्यादिपादान्तं व्याप्य, "मूलाधारोपलक्षितस्वबहिःपश्चाद् भागे– ३ द्रां सर्वसंक्षोभिणीमुद्रायै

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नमः। मूलाधारादुत्तरतः– ३ द्रीं सर्वविद्राविणीमुद्रायै नमः। मूलाधारपूर्वभागे– ३ क्लीं सर्वाकर्षिणीमुद्रायै नमः। तद्दक्षिणे– ३ ब्लूं सर्ववशङ्करीमुद्रायै नमः। तद्वायव्ये– ३ सः सर्वोन्मादिनीमुद्रायै नमः। तदीशाने– ३ क्रौं सर्वमहाङ्कुशामुद्रायै नमः। तदाग्नेये– ३ ह्स्ख्फ्रें सर्वखेचरीमुद्रायै नमः। तन्नैर्ऋते– ३ अं आं सौः सर्वत्रिखण्डिनीमुद्रायै नमः। इन्द्रेशानयोर्मध्ये–३ ह्सौं सर्वबीजमुद्रायै नमः। निर्ऋतिवरुणयोर्मध्ये– ३ ऐं सर्वयोनिमुद्रायै नमः।"[49]

अथ ब्राह्म्यादिन्यासः। दक्षजङ्घायां वामक्रमेण पश्चिमादिमहादिक्षु वायव्यादिविदिक्षु च ब्राह्म्यादि न्यसेत्। यथा– "३ आं ब्राह्म्यै नमः। ३ ईं माहेश्वर्यै नमः। ३ ऊं कौमार्यै नमः। ३ ॠं वैष्णव्यै नमः। ३ ॡं वाराह्यै नमः। ३ ऐं इन्द्राण्यै नमः। ३ औं चामुण्डायै नमः। ३ अः महालक्ष्म्यै नमः" इति।

अथाणिमादिन्यासः। वामजङ्घायां वामक्रमेण पश्चिमादिमहादिक्षु वायव्याद्यवान्तरदिक्षु च अणिमाद्यष्टकं न्यसेत्– "३ अणिमासिद्ध्यै नमः। ३ लघिमासिद्ध्यै नमः। ३ महिमासिद्ध्यै नमः। ३ ईशित्वसिद्ध्यै नमः। ३ वशित्वसिद्ध्यै नमः। ३ प्राप्तिसिद्ध्यै नमः। ३ प्राकाम्यसिद्ध्यै नमः। ३ भुक्तिसिद्ध्यै नमः। ३ इच्छासिद्ध्यै नमः– दक्षपादतले। ३ सर्वकामसिद्ध्यै नमः– वामपादतले।" इत्यणिमादिन्यासः।

एवं श्रीचक्रन्यासं कृत्वा श्रीचक्राभिन्नमात्मानं ध्यात्वा श्रीचक्राभिन्नदेव्यात्मनाप्यात्मानं ध्यायेत्।

अथ चक्रेश्वरीनवकन्यासः– "३ अं आं सौः त्रिपुरायै नमः– पादाग्रे। ३ ऐं क्लीं सौः त्रिपुरेश्वर्यै नमः– जङ्घायाम्। ३ ह्रीं

49. अत्र मुद्राक्रमविषये सर्वखेचर्या अन्ते नियोग इति प्रस्तुते ग्रन्थे (पृ. 37) टिप्पण्यां स्फुटीकृतम्।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

क्लीं सौः त्रिपुरसुन्दर्यै नमः– जान्वोः। ३ हैं हक्लीं ह्सौः त्रिपुरवासिन्यै नमः– ऊर्वोः। ३ ह्सैं ह्स्क्लीं ह्सौः त्रिपुराश्रियै नमः– गुदे। ३ ह्रीं क्लीं ब्लें त्रिपुरमालिन्यै नमः– लिङ्गाग्रे। ३ ह्रीं श्रीं सौः त्रिपुरासिद्धेश्वर्यै नमः– मूलाधारे। ३ हसौं हस्क्लरीं हस्रौः श्रीत्रिपुराम्बिकायै नमः– तस्यां मूर्तौ। ३ मूलमुच्चार्य श्रीमहात्रिपुरसुन्दर्यै नम इति मूर्धादिपादान्तं व्यापयेत्।" इति चक्रेश्वरी न्यासः। अयमेव स्थितिन्यास इत्युच्यते।

अथान्तरभावनालक्षणश्रीचक्रन्यासः। अकुलविषुवमूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धिलम्बिकाज्ञाख्येषु सर्वानन्दमयान्तानि नवचक्राणि स्थूलरूपेण भावनीयानि। मूलाधारादधः कन्दस्थानगतत्रिकोणमध्यरूढसुषुम्नामूले सहस्रदलकमलमस्ति। तदकुलमित्युच्यते। तदुपरि संवित्समाष्टदलं रक्तवर्णं पद्ममस्ति। तदुपरि मूलाधारपङ्कजं चतुर्दलम्, तदुपरि स्वाधिष्ठानं षड्दलम्, तदुपरि मणिपूरकं दशपत्रम्, ततः अनाहतदशदलपत्रम्, ततः विशुद्धिपद्मं षोडशदलकमलम्, तदुपरि लम्बिकाख्यं कण्ठोर्ध्वचतुरङ्गुलाष्टदलपद्मम्, आज्ञाद्विपत्रम्, इति नवस्थानानि तेषु नवचक्राणि स्थूलरूपेण ध्यात्वा, पुनर्बिन्द्वर्धचन्द्रनिरोधिनीनादनादान्तशक्तिव्यापिकासमनोन्मन्याख्येषु आज्ञादिब्रह्मरन्ध्रान्तमुपर्युपरि विद्यमानेषु स्थानेषु तान्येव नवचक्राणि सूक्ष्मरूपतया विभावनीयानि। तदुपरि उन्मन्यन्तमहाबिन्दुस्थाने नवचक्रसमष्ट्यात्मकं महाचक्रं शुद्धसंविदात्मना सूक्ष्मरूपेण विभावयेत्। तत्राऽयं प्रयोगः। अकुले "३ अं आं सौः त्रिपुराधिष्ठिताय त्रैलोक्यमोहनचक्राय नमः" इत्यादि तत्तच्चक्रमन्त्रेण चक्रं सम्पूज्य, "३ अं आं सौः त्रिपुरायै नमः" इत्यादि तत्तच्चक्रेश्वरीमन्त्रेण तत्तच्चक्रेश्वरीं गन्धादिभिर्मनसाऽभ्यर्च्य, पुनस्तत्तच्चक्रस्था अणिमादिशक्तीरपि तत्तन्नाममन्त्रेणार्चयेत्। अशक्तश्चेद् अणिमादिसहितेत्यादि–

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

विशेषणं तत्तच्चक्रेश्वरीमन्त्र एवं योजनीयम्।

अथ करशुद्धिन्यासः। तत्रादौ मूलमन्त्रस्य ऋष्यादि षडङ्गं न्यासं कृत्वा प्रथमं करशुद्धिन्यासं कुर्यात्। यथा– "३ अं नमः– मध्यमयोः। ३ आं नमः– अनामिकयोः। ३ सौः नमः– कनिष्ठिकयोः। ३ अं नमः– तर्जन्योः। ३ आं नमः– अङ्गुष्ठयोः। ३ सौः नमः– करतलकरपृष्ठयोः। ३ अं आं सौः इति करयोः"[इति]मार्जनं कुर्यात्।

"३ क ए ई ल ह्रीं [नमः] – मूर्ध्नि। ३ ह स क ह ल ह्रीं नमः– गुह्ये। ३ स क ल ह्रीं नमः– हृदये। ३ क ए ई ल ह्रीं नमः– दक्षनेत्रे। ३ ह स क ह ल ह्रीं नमः– वामनेत्रे। ३ स क ल ह्रीं नमः– ललाटे। ३ क ए ई ल ह्रीं नमः–दक्षश्रोत्रे। ३ ह स क ह ल ह्रीं नमः– वामश्रोत्रे। ३ स क ल ह्रीं नमः– मुखे। ३ क ए ई ल ह्रीं नमः– दक्षभुजे। ३ ह स क ह ल ह्रीं नमः– वामभुजे। ३ स क ल ह्रीं नमः– पृष्ठे। ३ क ए ई ल ह्रीं नमः– दक्षिणजानुनि। ३ ह स क ह ल ह्रीं नमः– वामजानुनि। ३ स क ल ह्रीं नमः– नाभौ।" इति पञ्चविद्यान्यासः।[50] तत्र पुनरपि पूर्ववदेव।

अथ आसनन्यासः। "३ ह्रीं क्लीं सौः देव्याः पद्मासनाय नमः–पादयोः। ३ हैं ह्क्लीं ह्सौः सर्वचक्रासनाय नमः– जङ्घयोः। ३ ह्सैं ह्स्क्लीं ह्सौः सर्वमन्त्रासनाय नमः– जान्वोः। ३ ह्रीं क्लीं ब्लें साध्यसिद्धासनाय नमः– मूलाधारे।"[51]

अथ षडङ्गन्यासः। "ऐं ह्रीं श्रीं ऐं क ए ई ल ह्रीं सर्वज्ञशक्त्यै श्रीमहात्रिपुरसुन्दर्यै हृदयाय नम इत्यङ्गुष्ठयोः। ३ क्लीं ह स क ह ल ह्रीं नित्यतृप्तायै शक्त्यै श्रीमहात्रिपुरसुन्दर्यै नमः शिरसे स्वाहा–

50. अयमेव मूलविद्यामन्त्रन्यास इत्युच्यते।
51. अयमेव चतुरासनन्यास इत्युच्यते।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तर्जन्योः। ३ सौः स क ल ह्रीं अनादिबोधताशक्त्यै श्रीमहात्रिपुरसुन्दर्यै नमः शिखायै वषट्– मध्यमयोः। ३ ऐं क ए ई ल ह्रीं स्वतन्त्रताशक्त्यै श्रीमहात्रिपुरसुन्दर्यै नमः कवचाय – अनामिकयोः। ३ क्लीं ह स क ह ल ह्रीं [नित्यम्]अलुप्तताशक्त्यै श्रीमहात्रिपुरसुन्दर्यै नमः नेत्रत्रयाय इति कनिष्ठिकयोः। ३ सौः स क ल ह्रीं अनन्तताशक्त्यै श्रीमहात्रिपुरसुन्दर्यै नम अस्त्राय फट् इति करतलपृष्ठयोः।" एवमेव हृदयादिषु यथालिङ्गं न्यसेत्। केचित्– "ॐ ऐं सर्वज्ञायै हृत्,क्लीं नित्यतृप्तायै" इत्यादि हृदयादिष्वेव न्यासमिच्छन्ति।

अथ श्रीकण्ठन्यासः।[52] दक्षिणामूर्ति ऋषिः गायत्री छन्दः अर्द्धनारीश्वरो देवता श्रीविद्याङ्गत्वेन न्यासे विनियोगः।

"३ अं कं खं गं घं ङं आं ह्स्त्रां– हृत्। ३ इं चं छं जं झं ञं ईं ह्स्त्रीं– शिरः। ३ [उं] टं ठं डं ढं णं [ऊं] ह्स्त्रूं– शिखा। ३ ऋं तं थं दं धं नं ॠं ह्स्त्रैं –कवचम्। ३ ओं पं फं बं भं मं औं ह्स्त्रौं– नेत्रम्। ३ अं यं रं लं वं शं षं सं हं ळं क्षं अः ह्स्त्रः– अस्त्रम्। भूर्भुवःस्वरोमिति दिग्बन्धः।"

बन्धूककाञ्चननिभं रुचिराक्षमालां
पाशाङ्कुशौ च वरदं निजबाहुदण्डैः।
विभ्राणमिन्दुशकलाभरणं त्रिनेत्र-
मर्धाम्बिकेशमनिशं वयमाश्रयामः॥

दक्षाधःकरमारभ्य वामाधःकरपर्यन्तमायुधध्यानम्।

३ अं ह्स्त्रौः श्रीकण्ठेशाय पूर्णोदर्यै नमः। ३ आं ह्स्त्रौः अनन्तेशाय विरजायै नमः। ३ इं ह्स्त्रौः सूक्ष्मेशाय शाल्मल्यै नमः। ३

52. श्रीकण्ठन्यासोऽयं श्रीविद्यार्णवे तृतीये श्वासे, प्रपञ्चसारे (3.39–52), प्रपञ्चसारसंग्रहे (पृ. 107–109) चोपलभ्यते।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ईं ह्स्त्रौः त्रिमूर्तीशाय लोलाक्ष्यै नमः। ३ उं ह्स्त्रौः अमरेशाय वर्तुलाक्ष्यै नमः। ३ ऊं [ह्स्त्रौः] अर्घीशाय दीर्घघोणायै नमः। ३ ऋं ह्स्त्रौः भारभूतीशाय सुदीर्घमुख्यै नमः। ३ ॠं [ह्स्त्रौः] तिथीशाय गोमुख्यै नमः। ३ ऌं ह्स्त्रौः स्थाण्वीशाय दीर्घजिह्वायै नमः। ३ ॡं [ह्स्त्रौः] हरेशाय कुण्डोदर्यै नमः। ३ एं ह्स्त्रौः झिण्टीशाय ऊर्ध्वकेश्यै नमः। ३ ऐं ह्स्त्रौः भौतिकाय विकृतमुख्यै नमः। ३ ओं ह्स्त्रौः सद्योजाताय ज्वालामुख्यै नमः। ३ औं ह्स्त्रौः अनुग्रहेशाय उल्कामुख्यै नमः। ३ अं ह्स्त्रौः अक्रूरेशाय श्रीमुख्यै नमः। ३ अः ह्स्त्रौः महासनेशाय विद्यामुख्यै नमः। ३ कं ह्स्त्रौः क्रोधीशाय महाकाल्यै नमः। ३ खं ह्स्त्रौः चण्डीशाय सरस्वत्यै नमः। ३ गं ह्स्त्रौः पञ्चान्तकेशाय सर्वसिद्ध्यै नमः। ३ घं ह्स्त्रौः शिवोत्तमेशाय गौर्यै नमः। ३ ङं ह्स्त्रौः एकरुद्रेशाय त्रैलोक्यविद्यायै नमः। ३ चं ह्स्त्रौः कूर्मेशाय मन्त्रशक्त्यै नमः। ३ छं ह्स्त्रौः एकनेत्रेशाय आत्मशक्त्यै नमः। ३ जं ह्स्त्रौः चतुराननेशाय भूतमात्रे नमः। ३ झं ह्स्त्रौः अजेशाय लम्बोदर्यै नमः। ३ ञं ह्स्त्रौः सर्वेशाय द्राविण्यै नमः। ३ टं ह्स्त्रौः सोमेशाय नागर्यै नमः। ३ ठं ह्स्त्रौः लाङ्गलीशाय खेचर्यै नमः। ३ डं ह्स्त्रौः दारुकेशाय मञ्जर्यै नमः। ३ ढं ह्स्त्रौः अर्द्धनारीश्वराय रूपिण्यै नमः। ३ णं ह्स्त्रौः उमाकान्तेशाय वीरिण्यै नमः। ३ तं ह्स्त्रौः आषाढीशाय काकोदर्यै नमः। ३ थं ह्स्त्रौः दण्डीशाय पूतनायै नमः। ३ दं ह्स्त्रौः अत्रीशाय भद्रकाल्यै नमः। ३ धं ह्स्त्रौः मीनेशाय योगिन्यै नमः। ३ नं ह्स्त्रौः मेषेशाय शङ्खिन्यै नमः। ३ पं ह्स्त्रौः लोहितेशाय गर्जिन्यै नमः। ३ फं ह्स्त्रौः शिखीशाय कालरात्र्यै नमः। ३ बं ह्स्त्रौः छगलाण्डेशाय कुर्द्दिन्यै नमः। ३ भं ह्स्त्रौः द्विरण्डेशाय कपर्दिन्यै नमः। ३ मं ह्स्त्रौः महाकालेशाय [महा]वज्रायै नमः। ३ यं ह्स्त्रौः त्वगात्मने [क]पालीशाय जयायै नमः। ३ [रं] ह्स्त्रौः

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

असृक्तत्त्वात्मने भुजङ्गेशाय सुमुख्यै नमः। ३ लं ह्स्रौः मांसतत्त्वात्मने पिनाकीशाय रेवत्यै नमः। ३ वं ह्स्रौः मेदस्तत्त्वात्मने खड्गीशाय माधव्यै नमः। ३ शं ह्स्रौः अस्थितत्त्वात्मने वकेशाय वारुण्यै नमः। ३ षं ह्स्रौः मज्जातत्त्वात्मने श्वेतेशाय वायव्यै नमः। ३ सं ह्स्रौः शुक्रतत्त्वात्मने भृग्वीशाय रक्षोविदारिण्यै नमः। ३ हं ह्स्रौः प्राणतत्त्वात्मने लगुडीशाय सहजालक्ष्म्यै नमः। ३ ळं ह्स्रौः शक्तितत्त्वात्मने शिवेशाय व्यापिन्यै नमः। ऐं ह्रीं श्रीं क्षं ह्स्रौः परमतत्त्वात्मने संवर्तेशाय महामायायै नमः। ह्स्रौः इति सर्वत्र योजनीयम्।[53]

अत्र रुद्रा स्मृता रक्ता धृतशूलकपालकाः।
शक्तयो योगपीठस्थास्सिन्दूरारुणविग्रहाः।
रक्तोत्पलकपालाभ्यामलङ्कृतकराम्बुजाः॥

इति शक्तीनां ध्यानम्।

अथ वाग्देवतान्यासः। ३ अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः ब्लूँ वशिनीवाग्देवतायै नमः– मूर्ध्नि। ३ कवर्गः क्ल्ह्रीं कामेश्वरीवाग्देवतायै नमः– ललाटे। ३ चवर्गः न्बलीं मोदिनीवाग्देवतायै नमः– भ्रूमध्ये। ३ टवर्गः य्लूं विमलावाग्देवतायै नमः– कण्ठे। ३ तवर्गः ज्म्रीं अरुणावाग्देवतायै नमः– हृदि। ३ पवर्गः ह्स्ल्व्यूं जयिनीवाग्देवतायै नमः– नाभौ। ३ यं रं लं वं झ्म्र्यूं सर्वेश्वरीवाग्देवतायै नमः– मूलाधारे। ३ शं षं सं हं ळं क्षं क्ष्म्रीं कौलिनीवाग्देवतायै नमः– मूलाधारादिगुल्फान्तम्, मूलाधार एव च।

अथ कामेश्वर्यादिन्यासः। ३ क ए ई ल ह्रीं अग्निचक्रे कामगिर्यालये मित्रेशनाथात्मिके श्रीकामेश्वरीदेवि ब्रह्मशक्तिश्रीपादुकां

53. अत्र श्रीकण्ठन्यासे सर्वत्र मातृकास्थानेषु शुद्धमातृकान्यासोक्तस्थानानि स्पृशेदिति सम्प्रदायः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पूजयामि– आधारे। ३ ह स क ह ल ह्रीं सूर्यचक्रे जालन्धरपीठे षष्ठीशनाथात्मिके श्रीवज्रेश्वरीदेवि विष्णवात्मशक्तिश्रीपादुकां पूजयामि– हृदि। ३ स क ल ह्रीं सोमचक्रे पूर्णगिरिगह्वरपीठे उड्डीशनाथाम्बिके श्रीभगमालिनीदेवि रुद्रात्मशक्तिश्रीपादुकां पूजयामि-- ब्रह्मरन्ध्रे। मूलाधारादुपलक्षितागन्यादिचक्रस्थकामगिर्यादिपीठेषु मित्रीशनाथात्मिके ब्रह्मादिशक्तिकामेश्वर्यादि उमाशिव-सामरस्यमापन्ना पूजयामीति मन्त्रार्थः। अत्र न्यासे नमःपदस्थाने पादुकां पूजयामीति योजनं सम्प्रदाय इति योगिनीहृदये व्याख्याया-मुक्तम्।[54]

अथ तत्त्वत्रयन्यासः। ३ क ए ई ल ह्रीं आत्मतत्त्वाय नमः– पादादिनाभ्यन्तम्। ३ ह स क ह ल ह्रीं विद्यातत्त्वाय नमः– नाभ्यादिगलान्तम्। ३ स क ल ह्रीं शिवतत्त्वाय नमः– गलादिशिरोन्तम्। ३ क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं सर्वतत्त्वाय नमः– पादादिशिरोन्तं व्यापयेत्।

ततः पराऽहन्ताभावनं कुर्यात्। कोऽर्थः। परंतेजो मायावशात् स्वभिन्नमिव प्रतीयमानं स्वाभेदेन विचिन्तयेत्। करशुद्ध्यादिन्यास-सामर्थ्यान्मायापगमे त्रिपुरसुन्दरी स्वात्मतया भाव्येत्यर्थः।

तत अमृतप्लावनं कुर्यात्। कोऽर्थः। ब्रह्मरन्ध्राधो-मुखसहस्रदलकमलकर्णिकामध्यगतपूर्णसोममण्या(ण्डल)मध्य-स्थत्रिकोणान्तरस्थानर्च्चिकसकारात्मकानुत्तरमूलाधारचतुर्दल[कमल]-कर्णिकामध्यगताग्निमण्डलमध्यगतत्रिकोणान्तस्थानर्चिकान्तरात्म-सपरार्धकलारूपात्मनोरमृतानलकुण्डलिनीरूपयोरधऊर्ध्वप्रसरयो-

---

54. व्याख्याशब्देनात्र अमृतानन्दकृता दीपिकाटीका सूचिता।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

योनिलिङ्गाकारयोः सामरस्यात् क्षरदमृतद्रवैर्हृदयस्थदेवीमाप्लावये-दित्यर्थः। अयमेव परान्यास इति पद्धतिषु च लिख्यते।[55]

षोढान्यासोऽणिमाद्याश्च मूलदेव्यादिकं प्रिये।
करशुद्ध्यादिकं चैव साधकेनाशुसिद्धये।
एवं चतुर्विधो न्यासः कर्तव्यो वीरवन्दिते॥

(3, 87-88)

इति योगिनीहृदयप्रतिपादिताश्चतुर्विधा न्यासा लिखिताः। तेषां कालभेदैः कर्त्तव्यता च तत्रैव प्रदर्शिता **"प्रातःकालम्(ले)"**(3. 88)इत्यादिन(ना)। अयमर्थः–प्रातःकाले षोढान्यासः, पूजाकाले अणिमादिन्यासः, होमकाले मूलदेव्यादि[क]न्यासः, जपकाले करशुद्धिन्यासश्च कर्तव्यः। यद्वा सर्वेऽपि पूजाकाले कर्तव्या इति।[56]

आवश्यकत्वान्मूलविद्यान्यासोऽत्र लिख्यते[57]–

"कं नमः– मूर्ध्नि। एं नमः– मूलाधारे। ईं नमः– हृदये। लं नमः– दक्षनेत्रे। ह्रीं नमः– वामनेत्रे। हं नमः– भ्रूमध्ये। सं नमः– दक्षिणकर्णे। कं नमः– वामकर्णे। हं नमः– मुखे। लं नमः– दक्षस्कन्धे। ह्रीं नमः– वामस्कन्धे। सं नमः– पृष्ठे। कं नमः– नाभौ। लं नमः– दक्षपादे। ह्रीं नमः– वामपादे।"

केचित्तु– "कं नमः– दक्षजानुनि। लं नमः– वामजानुनि। ह्रीं नमः– नाभौ" इत्यादि वर्णयन्ति।

---

55. 'तत अमृतप्लावनं....पद्धतिषु च लिख्यते' इत्यंशो योगिनीहृदय-दीपिकायां तृतीये पटले (पृ. 273-274) दृश्यते।
56. इयं योगिनीहृदये तृतीयपटलस्य 'प्रातःकाले.' (श्लो. 3.88)इति सार्द्धश्लोकस्यैव व्याख्या।
57. अयं मूलविद्यावर्णन्यास इत्युच्यते।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

एवं न्यासससामर्थ्यविशीर्यमाणपाशजालस्सन् भाविबाह्यपूजायाः पूर्वमान्तरपूजां कुर्यात्। यथा–

आदौ, क ए ई ल ह्रीं नमः– कन्दस्थाने। ह स क ह ल ह्रीं नमः– हृदये। स क ल ह्रीं नमः– ललाटे। क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं– ब्रह्मरन्ध्रे।

इति पिण्डपदरूपग्रन्थिमोदकन्यासेनान्तरविघ्ननिरासं कृत्वा[58] स्वशरीरं क्षित्यादिषट्त्रं(त्रिं)शत्तत्त्वात्मकं श्रीचक्रं विभाव्य, "समस्तप्रकटगुप्त-गुप्ततरसम्प्रदायकुलकौलनिगर्भरहस्यपरापरातिरहस्यश्रीपादुकेभ्यो नमः" इति स्वशिरसि पुष्पं विकीर्य, स्वहृदये बिन्दुपीठे देवीं सपरिवारां ध्यात्वा, पञ्चोपचारैः पूजयेत्। यथा– स्वहृदये भाविताया: देव्याः पुरतो जीवात्मानं पुष्पपूराञ्जलिनिविष्टं ध्यात्वा, अणिमाद्या-वरणादिक्रमेण तत्तत्पूजामन्त्रैस्तेन पूजितानि तत्तत्समर्पणमन्त्रैस्समर्पणं च ध्यात्वा, महात्रिपुरसुन्दर्यै तत्तच्चक्रावयवसहितायावरणानि विलीनानि भाव्य, मध्यत्र्यश्राग्रे निविष्टो जीवात्मा देवीपादमूले स्वाञ्जलिगतकुसुमैस्सम्पूज्याकुलेन्दुगलितामृतधारारूपिणीश्चन्दनकु-सुमदीपादिनैवेद्यानि शालीकरकमलापीतासितश्यामरक्तशुक्लवर्णा धरणीवियदनिलानलजललक्षणः पञ्चभूतमयीस्सर्वावयवसुन्दरीः पञ्चदेवता देव्यग्रे संस्मृताभिश्चन्दनाद्युपहाराः देव्यै समर्पिता इति स्मारं स्मारं पञ्चोपचारमन्त्रान् तत्तन्मुद्रां बद्ध्वा समुच्चरेत्।

यथा– श्रीमूलवाग्भवमुच्चार्य श्रीमहात्रिपुरसुन्दरि स्थूलं गन्धमिमं गृहाण। ॐ तत्सत् श्रीमूलकामराजमुच्चार्य श्रीमहात्रिपुरसुन्दरि सूक्ष्मं गन्धमिमं गृहाण। ॐ तत्सत् श्रीमूलं तार्त्तीयमुच्चार्य

58. अत्र पिण्डपदरूपादिशब्दाः पारिभाषिकाः स्थानविशेषसूचका इति योगिनीहृदये (३.91) वर्णिताः।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

श्रीमहात्रिपुरसुन्दरि परं गन्धमिमं गृहाण। ॐ तत्सत् श्रीमूलमुच्चार्य समस्तं श्रीमहात्रिपुरसुन्दरि परात्परं गन्धमिमं गृहाण। ॐ तत्सत् इति गन्धमन्त्रः। एवमेव पुष्पादिमन्त्राः। गन्धपदस्थाने पुष्पादि-तत्तदुपचारपदमूहनीयमिति विशेषः। गन्धादिमुद्राश्च प्रदर्शयेत्। कनिष्ठामध्यपर्वाङ्गुष्ठयोगो गन्धमुद्रा। अङ्गुष्ठमध्यपर्वतर्जन्यग्रयोगो पुष्पमुद्रा। तर्जनीमध्यपर्वाङ्गुष्ठयोगो धूपमुद्रा। मध्यमामध्यपर्वाङ्गुष्ठयोगो दीपमुद्रा। अनामिकामध्यपर्वाङ्गुष्ठयोगो नैवेद्यमुद्रा। एताश्च मुद्राः करद्वयेन प्रदर्शनीयाः।

ततः पूर्वोक्ताः पञ्चभूतदेवताश्च तस्यां महात्रिपुरसुन्दर्यां तत्तत्स्थानेषु विलीना इति भावयेत्। गन्धदेवतायाः नासा, पुष्पदेवतायाः श्रोत्रम्, धूपदेवतायाः नाभिः, दीपदेवतायाः नयनम्, निवेद्यदेवतायाः जिह्वा इति तत्तस्थानानि तन्त्रसमुच्चये (7.109-110) तत्प्रकारो दर्शितः। यथा-

देवे युनक्तु सकले जलगन्धपुष्प-
धूपानि दीपकनिवेद्यगतान् रसांशान्।।
तोयोर्व्यनन्तपवनानलवारिसारान्
जिह्वानसोः श्रवणनाभिदृगाननेषु।।
तत्तत्समर्पणविधौ निजभूतशक्तिः
साक्षादुदेत्य विमलाञ्जलिगं स्वसारम्।
देवैतदक्षभवशक्तिकरे समर्प्य
तादात्म्यमेति तरसेत्यनुसन्दधीत।।

इति स्पष्टम्। तत्र श्रीमूलमुच्चार्य, जीवात्मानं देवीपादारविन्दे मूले विलीनं भावयित्वा, हृदयगतदेवीरूपं मध्यत्र्यश्रसहितं तत्रैव केवलं ज्योतिर्मयतामापन्नं ध्यात्वा, पुनर्यथापूर्वं देवीरूपमात्मानं च ध्यायन् संक्षोभादिनवमुद्रास्तत्तन्मन्त्रैः प्रदर्शयेत्। तल्लक्षणानि च वक्ष्यते

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तत्तन्मन्त्राश्च न्यासे द्रष्टव्याः।

अथ वैश्यदेवं कुर्यात्। यथा—मूलाधारे बालाग्निमात्रमनादिवासनारूपेन्धनप्रज्वलितं कुण्डलिन्यधिष्ठितं चिदग्निमण्डलं ध्यात्वा "ऐं ह्रीं श्रीं कुण्डलिन्यधिष्ठितचिदानन्दाग्निमण्डलाय नमः" इति संपूज्य, मूलविद्यान्ते पुण्यं जुहोमि स्वाहा। मूलं पापं जुहोमि स्वाहा। मूलं कृत्यं जुहोमि स्वाहा। मूलमकृत्यं जुहोमि स्वाहा। मूलं संकल्पं जुहोमि स्वाहा। मूलं विकल्पं जुहोमि स्वाहा। मूलं धर्मं जुहोमि स्वाहा।

धर्माधर्मकलास्नेहमात्माग्नौ मनसा स्रुचा।
सुषुम्नावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहम्।।[59]

"अधर्मं जुहोमि वौषट्"[60] इति पूर्णाहुतिं हुत्वा, मूलम् ओमितःपूर्वं "प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं स्वाहा" इति। "सर्वं परदेवतायै समर्पितमस्तु स्वाहा नमः" इति निरस्ताखिलदोषस्सन् क्षणं न किञ्चिदपि चिन्तयेत्। पुनः प्रकृतिमालम्ब्य देव्या प्रेरितमानसः स्वहृदये मूलविद्यान्ते "श्रीमहात्रिपुरसुन्दर्यमृतमूर्तिं कल्पयामि नमः" इति मूर्तिं परिकल्प्य, प्रसन्नां देवीं ध्यायन् वक्ष्यमाणकामकलारूपमात्मानं ध्यात्वा मूलविद्यां यथाशक्ति जपित्वा—

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे येन त्वत् प्रसादात् त्वयि स्थिते।।

---

59. योगिनीहृदयदीपिकायां (पृ. 296) श्लोकस्यास्य प्रथमे पादे 'धर्माधर्महविर्दीप्ते' इति पाठः।
60. 'मूलमधर्मं जुहोमि स्वाहा' इति श्लोकात्पूर्वमेव प्रयोक्तव्यमित्युचितं प्रतिभाति।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

इति जपं समर्प्य, क्षमापनं कृत्वा, योनिमुद्रया प्रणम्य, तदाज्ञां गृहीत्वा, बाह्यपूजां कुर्यात्। यथा–

अपसर्पन्तु ते भूता ये भूता दिवि संस्थिताः।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया॥

'ह्रः अस्त्राय फट्' इति मन्त्रेण यागगृहान्निर्गच्छतां विघ्नानां निजवामाङ्गसङ्कोचेनावकाशं दिशन् पार्ष्णिघाततालत्रयतिग्म-दृष्ट्यवलोकनैर्भौमान्तरिक्षदिव्यविघ्नानुत्सारयेत्। ततस्सर्वतस्फुरितशुद्ध-संवित्प्रकाशेन निर्गतानां विघ्नानां पुनरप्रवेशाय वह्निप्राकारं भावयेत्। ततो विमर्शात्मकशक्तिसहितप्रकाशात्मकपरमशिवाहंभावनालक्षणं योगिनीहृदयव्याकर्त्रभिमतां मार्तण्डपूजां निर्वर्त्य[61], निर्माल्यमपनीय, मूलेनाभिषिक्तं श्रीचक्रं पुरतः पीठे निधाय, तस्मिन् समस्त-प्रकटेत्यादियोगिनीमूलमन्त्रेण पुष्पाञ्जलिं कुर्यात्। पुष्पाभावे विलोममूलविद्यया योगिनीमूलमन्त्रेण वा मणिमुक्ताप्रवालादिभिः सर्वथा चक्रमशून्यं कुर्यात्।

ततः कलशादिप्रतिष्ठां कुर्यात्। यथा–देव्या दक्षिणभागे त्रिकोणवृत्तचतुरस्रं कृत्वा 'श्रीमहात्रिपुरसुन्दरी कलशाधाराय नमः' इत्यभ्यर्च्य तत्र शुद्धजलादिपूरितं कलशं निधाय, गन्धादि-भिरभ्यर्च्यालङ्कृत्य, मूलमन्त्रेण दशवारमभिमन्त्र्य, धेनुमुद्रां प्रदर्श्य,

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥
कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा।
ऋग्वेदोऽथ यजुर्वेदस्सामवेदोऽप्यथर्वणः॥

---

61. योगिनीहृदयदीपिकोक्तप्रकारोऽयं तत्रैव 280-281पृष्ठयोर्द्रष्टव्यः।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अङ्गैश्च सहितास्सर्वे कलशाम्बुसमाश्रिताः।
गङ्गे च यमुने देवि गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेस्मिन् सन्निधिं कुरु।।

इति कलशमभिमन्त्रयेत्।

ततः सामान्यार्घ्यस्थापनं कुर्यात्। तत्प्रकारः। तत्रादौ स्ववामभागे सामान्यार्घ्यं स्थापयेत्। सौरित्यस्त्रमन्त्रेण साधारशङ्खं प्रक्षाल्य, त्रिकोणवृत्तचतुरस्त्रमण्डले सुविभाविते प्रतिष्ठाप्य, "ऐं हृदयाय नमः" इति बिन्द्वतीतचिच्चन्द्रगलितामृतस्वरूपाम्भसापूर्य, प्रणवेन गन्धपुष्पं निक्षिप्य, षडङ्गैरभ्यर्च्य, शङ्खधेनुयोनिमुद्राः प्रदर्शयेत्।

अथ विशेषार्घ्यं स्थापयेत्। यथा— सामान्यार्घ्यजलेन तत्समीपे स्वसन्मुख एव त्रिकोणवृत्तषट्कोणचतुरस्त्रमण्डलं मत्स्यमुद्रया विधाय, "ऐं ह्रीं श्रीं ह्रीं महात्रिपुरसुन्दर्या विशेषार्घ्यपात्राधारमण्डलाय नमः" इति गन्धादिभिरभ्यर्च्य, त्रिकोणमध्ये, "ऐं ह्रीं श्रीं सौः क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं नमः" इति पूजयेत्। ततोऽग्रकोणे— ३ ऐं क ए ई ल ह्रीं नमः। दक्षिणकोणे— ३ क्लीं ह स क ह ल ह्रीं नमः। वामकोणे— ३ सौः स क ल ह्रीं नम इत्यभ्यर्च्य(र्च)येत्। अथ षट्कोणेषु स्वाग्रकोणादारभ्य प्रादक्षिण्येन "३ ऐं कादि नमः, ३ क्लीं हादि नमः, ३ सौः सादि नमः"। एवमेवावशिष्टकोणेषु अर्चयेत्।

अथ तत्रैव षडङ्गानि पूजयेत्। अग्नीशासुरवायुकोणेषु मध्ये दिक्षु च क्रमाद्यथा अग्निकोणे— ३ ऐं हृदयाय नमः। ईशाने— ३ क्लीं शिरसे स्वाहा। नैर्ऋते— ३ सौः शिखायै वषट्। वायव्ये— ३ ऐं कवचाय हुं नमः। मध्ये— ३ क्लीं नेत्रत्रयाय वौषट् नमः। पूर्वादिचतुर्दिक्षु— ३ सौः अस्त्राय फट् नम इति षडङ्गपूजा।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अथ पञ्चरत्नं पूजयेत्। ३ ग्लूं गगनरत्नाय नमः– पूर्वस्मिन्। ३ स्लूं स्वर्गरत्नाय नमः– दक्षिणे। ३ म्लूं मर्त्यरत्नाय नम इति पश्चिमे। ३ प्लूं पातालरत्नाय नम इत्युत्तरे। ३ न्लूं नागरत्नाय नम इति मध्येऽर्चयेत्।

ततस्तत्र बालया मूलेन च क्षालितमाधारं स्थापयित्वा पूजयेत्। "३ ऐं कादि वह्निमण्डलाय धर्मप्रददशकलात्मने श्रीमहात्रिपुरसुन्दर्या विशेषार्घ्यपात्राधाराय नमः" इति संपूज्य, तत्र वृत्ताकारप्रादक्षिण्येन वह्नेः दशकलाः पूजयेत्–

३ यं धूम्रार्चिषे नमः। ३ रं ऊष्मायै नमः। ३ लं ज्वलिन्यै नमः। ३ वं ज्वालिन्यै नमः। ३ शं विस्फुलिङ्गिन्यै नमः। ३ षं सुश्रियै नमः। ३ सं सुरूपायै नमः। ३ हं कपिलायै नमः। ३ ळं हव्यवाहायै नमः। ३ क्षं कव्यवाहायै नम इति संपूज्य पूर्ववत् पञ्चरत्नानि पूजयेत्।

ततः "सौः अस्त्राय फट्" इति मन्त्रेण प्रक्षालितं स्वर्णादिपात्रं तस्मिन्नाधारे स्थापयित्वा पूजयेत्। "३ क्लीं हादि अर्कमण्डलाय वसुप्रदद्वादशकलात्मने श्रीमहात्रिपुरसुन्दर्या विशेषार्घ्यपात्राय नमः" इति संपूज्य, तत्र प्रादक्षिण्येन भानोर्द्वादशकलाः समर्चयेत्–

३ कं भं तपिन्यै नमः। ३ खं बं तापिन्यै नमः। ३ गं फं धूम्रायै नमः। ३ घं पं मरीच्यै नमः। ३ ङं नं ज्वालिन्यै नमः। ३ चं धं रुच्यै नमः। ३ छं दं सुषुम्नायै नमः। ३ जं थं भोगदायै नमः। ३ झं तं विश्वायै नमः। ३ ञं णं बोधिन्यै नमः। ३ टं ढं धारिण्यै नमः। ३ ठं डं क्षमायै नमः। तन्मध्ये पूर्ववत् पञ्चरत्नानि पूजयेत्।

ततस्तत्र पूर्ववत् त्रिकोणषट्कोणचतुरस्रमण्डलं रक्तचन्दनेनालिख्य, कुङ्कुमेन वा मूलेन समस्तेन व्यस्तेन च त्रिकोणमध्ये

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कोणेषु चाभ्यर्च्य, द्विरावृत्तमूलखण्डत्रयेण षट्कोणान्यर्च्चयित्वा, पूर्ववत् षडङ्गैरभ्यर्च्य, ततो विलोममातृकान्ते विद्यां विलोममुच्चार्य शर्करायुक्तदुग्धेन घृतेन माक्षिकेण शुद्धजलेन वा तात्पात्रं पूरयेत्। तदुक्तं वामकेश्वरतन्त्रे **"शर्करायुक्तपयसा घृतेन मधुनापि वा"** इति, **''स्थापयेदर्घ्यमम्बुना''** (5.30) इति तन्त्रराजवचनमपि।

एवं पूरितं तज्जलं, ''ऐं'' इत्यङ्गुष्ठानामिकाभ्यां पुष्पेणालोड्य, क्लीमिति कर्पूरगन्धपङ्किलं पुष्पं निक्षिप्य, सौरिति गालिनीमुद्रां प्रदर्श्य, ''३ सौः स क ल ह्रीं उं सोममण्डलाय कामप्रदषोडश-कलात्मने श्रीमहात्रिपुरसुन्दर्या विशेषार्घ्यामृताय नमः'' इति संपूज्य, सोमस्य षोडशकलावृत्ताकारेण प्रादक्षिण्येन पूजयेत्–

३ अं अमृतायै नमः। ३ आं मानन्दायै नमः। ३ इं पूषायै नमः। ३ ईं तुष्ट्यै नमः। ३ उं पुष्ट्यै नमः। ३ ऊं रत्यै नमः। ३ ऋं धृत्यै नमः। ३ ॠं शशिन्यै नमः। ३ लृं चन्द्रिकायै नमः। ३ ॡं कान्त्यै नमः। ३ एं ज्योत्स्नायै नमः। ३ ऐं श्रियै नमः। ३ ओं प्रीत्यै नमः। ३ औं अङ्गदायै नमः। ३ अं पूर्णायै नमः। ३ अः पूर्णामृतायै नम इति। मध्ये पूर्ववत् पञ्चरत्नानि पूजयित्वा, ततः पूर्ववत् त्रिकोणवृत्तषट्कोणचतुरस्रमण्डलं विलिख्य, त्रिकोणस्यान्तरेखां षोडशस्वरात्मिकां नैर्ऋत्यादिवायव्यान्तां कादितान्तषोडशवर्णात्मिकां वायव्यादिप्रागान्तां थादिसान्तषोडशवर्णात्मिकां विचिन्त्य, पूर्ववत् त्रिकोणवृत्तषट्कोणान्यभ्यर्च्य, मूलाधारात् कुण्डलिनीमुत्थाप्य, सहस्रारकमलस्थचिच्चन्द्रमण्डलात् कारणामृतं स्रावयित्वा, नेत्रद्वारा सपुष्पे योनिमुद्रोल्लसितकरे समानीय, मूलविद्यामुच्चार्य, ''ऐं अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावय स्रावय ॐ जूं सः स्वाहा'' इत्यमृतेश्वरीविद्याम्,

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ॐ ब्रह्माण्डखण्डसंभूतविशेषामृतसंभृतम्।
आपूरितं महापात्रं कामं पीयूषमावह॥[62]

इति समयश्लोकं च पठित्वा, तदर्घ्यामृते करस्थपुष्पाञ्जलिप्रक्षेपेण तदमृतं संयोज्य धेनुमुद्रां प्रदर्शयेदित्यमृतेश्वरीमावाह्य "ॐ ह्रीं हंसः सोऽहं स्वाहा" इत्यष्टाक्षरं परमात्ममन्त्रमुच्चार्य, "आत्मशक्तिश्रीपादुकां पूजयामि नमः" इति तत्र संपूज्य, "३ ह स क्ष म ल व र यूं आनन्दभैरवाय वौषट् आनन्दभैरवश्रीपादुकां पूजयामि नमः। ३ ह स क्ष म ल व र यूं[63] सुधादेव्यै वौषट् सुधादेव्यम्बाश्रीपादुकां पूजयामि नमः" इत्याभ्यामानन्दभैरवीं च तत्र संपूज्य, ताभ्यां मन्त्राभ्यां त्रिरभिमन्त्र्य, तं तां च "तर्पयामि नमः" इत्यन्ताभ्यां तद्विद्याभ्यामर्घ्यामृतबिन्दुभिः तत्रैवाङ्गुष्ठानामिकाभ्यां त्रिस्तर्पयेत्। ततो मूलविद्यया सप्तवारमभिमन्त्र्य, तत्र मूलदेवीमावाह्य, प्राणान् प्रतिष्ठाप्य, ध्यात्वा, त्रिस्संपूज्य, तर्पयित्वा, षडङ्गैरभ्यर्च्य, अस्त्रेण दशदिग्बन्धनं कृत्वा, गन्धादिपञ्चोपचारान् प्रदर्शयेत्। नवमुद्राः प्रदर्शयेदिति विशेषार्घ्यविधिः।

ततः प्रोक्षणीपात्रं दक्षिणे स्थापयित्वा, जलेनापूर्य, विशेषार्घ्यजलबिन्दुं निक्षिप्य, तेनोदकेनात्मानं पूजोपकरणानि च मूलेनाभ्युक्षेत्। इति प्रोक्षणीपात्रासादनविधिः।

ततः पञ्चायतनक्रमी चेत्।[64] प्रोक्षिण्याः पुरोभागे सामान्यार्घ्यं पूर्वोक्तसामान्यार्घ्यविधिना स्थापयेत्। ततो विशेषार्घ्यादुत्तरतः

---

62. विशेषार्घ्यस्थापने कारणमन्त्रोऽयं पठ्यते।
63. अस्मिन् स्थाने '३ स ह क्ष म ल व र यीं' इत्युचितं प्रतिभाति।
64. अत्र निबन्धकारेण स्वक्रमानुसारं पञ्चायतनपूजाऽपि योजिता इति विशेषः।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सामान्यार्घ्यस्य दक्षिणे स्ववाम एव पाद्यादिचतुष्टयं स्थापयेत्। पाद्यार्घ्याचमनीयार्घ्यमधुपर्कार्थमेव च पात्राण्याधारयुक्तानि स्वर्णादिरचितानि च स्थापयेत्। पुरतस्तानि **"पूरयेत् शास्त्रवर्त्मना"** इति सामान्यार्घ्यविधिना पाद्यादिपात्रचतुष्टयं स्थापयेत्।[65] संपूज्य, सुगन्धिजलेनापूर्य तत्तद्द्रव्यं तत्र निक्षिपेत्। पाद्यद्रव्याणि **"[पाद्यं] श्यामाकदूर्वाब्जविष्णुक्रान्तादलैः स्मृतम्"** इति वचनोक्तानि। द्रव्यालाभे **"पादार्धमुदकं पाद्यं केवलं तोयमेव हि"** कालिकापुराणोक्तरीत्या केवलमुदकं वा ग्राह्यम्।

गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपाः।
पद्मं दूर्वाक्रमादर्घ्यं द्रव्याष्टकमुदीरितम्।।[66]

इत्यर्घ्यद्रव्याणि। **"जातीलवङ्गकक्कोलचूर्णैराचमनीयकम्"** इत्याचमनीयद्रव्याणि। **"आज्यं दधिमधून्मिश्रं मधुपर्कस्समीरितः।"** अशक्तौ तु,

एकस्मिन्नथवा पात्रे पाद्यादीनि प्रकल्पयेत्।।

द्रव्याभावे प्रदातव्याः क्षालितास्तन्दुलाः शुभाः।
सर्वोपचारवस्तूनामभावे भावयेद्धिया।।[67]

इति फेत्कारिणीतन्त्रोक्तप्रकारो ग्राह्यः।[68] इत्थं पूरयित्वा, सम्पूज्य, मूलेनाष्टवारमभिमन्त्र्य, मत्स्यमुद्रयाऽऽच्छादयेत्।

अथात्मपूजा। यथा– तत्रादौ स्वदेहं गन्धादिभिरलङ्कृत्य स्वेष्टदेवतारूपं सञ्चिन्त्य, मूर्ध्नि गुरुपादुकामन्त्रेण गुरुं संपूज्य,

65. कल्पसूत्रक्रमेण पाद्यार्घ्ययोः पात्रद्वयमेव।
66. प्रपञ्चसारे (6.45) श्लोकस्यास्य तृतीये पादे 'दूर्वा चेति क्रमादर्घ्यम्' इति पाठान्तरम्।
67. श्लोकार्धोऽयं मेरुतन्त्रेऽपि (5.517) दृश्यते।
68. प्रकाशिते फेत्कारिणीतन्त्रे इमौ श्लोकौ नोपलभ्येते।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मूलाधारे "ॐ गं गणपतये नमः" इति संपूज्य, पीठन्यासक्रमेण तत्तत्स्थानेषु तत्तन्मन्त्रैः पूजयित्वा, मूलाधारे हृदये भ्रूमध्ये मूलविद्याया कूटत्रयं ध्यात्वा, तत्तेजस्त्रितयमेकीभूतं तडिल्लताभं ब्रह्मरन्ध्रपर्यन्तं ध्यात्वा, ब्रह्मरन्ध्रान्नासिकारन्ध्रेण स्वकराञ्जलौ निर्गमय्य, मूलमुच्चार्य, तेन तेजसा व्याप्तमात्मानमानन्दघनदेवतारूपं ध्यात्वा, मूलमुच्चार्य, "श्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि" इति गन्धाक्षत-कुसुमाञ्जलित्रयेण हृदि संपूज्य, प्रोक्षिण्यामृतेन त्रिस्सन्तर्प्य, गन्धादिपञ्चोपचारान् कल्पयेत्। नैवेद्यमाघ्राय पुरतः स्थापयेत्। दीपान्तानुपचारान् कल्पयेद्वा, ततस्तत्राशक्तचेत् श्रीचक्रन्यासक्रमेण स्वदेहे पूजयेत्। प्रोक्षिण्यामृतेन तर्पयेत्। ततो मूलमुच्चार्य श्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामीति विशेषः। शिरसि हृदये मूलाधारे पादयोः सर्वाङ्गं चेति अङ्गपञ्चके पुष्पाञ्जलिं निक्षिपेत्। अशक्तस्तु देवतारूपमात्मानं ध्यात्वा पञ्चोपचारान् कुर्यात्।

अथ करशुद्धिं कृत्वा[69] कल्पसूक्त(त्र)मार्गेण पीठार्चनं[70] कुर्यात्–

ऐं ह्रीं श्रीं अमृताम्भोधये नमः। ३ रत्नद्वीपाय नमः। ३ नानावृक्षमहोद्यानाय नमः। ३ सन्तानवाटिकायै नमः। ३ कल्पवाटिकायै नमः। ३ हरिचन्दनवाटिकायै नमः। ३ मन्दारवाटिकायै नमः। ३ पारिजातवाटिकायै नमः। ३ कदम्ब[वन]वाटिकायै नमः। ३ बिल्ववनवाटिकायै नमः। ३ पुष्परागरत्नप्राकाराय नमः। ३ पद्मरागरत्नप्राकाराय नमः। ३ गोमेदकरत्नप्राकाराय नमः। ३ वज्ररत्नप्राकाराय नमः। ३ वैडू(दू)र्यरत्नप्राकाराय नमः। ३ इन्द्रनीलरत्नप्राकाराय नमः। ३ मुक्ताफलरत्नप्राकाराय नमः। ३

69. 'करशुद्धिन्यासं कृत्वा' इत्यत्र तात्पर्यम्।
70. विवरणमिदं परशुरामकल्पसूत्रे (पृ. 98) श्रीक्रमे एवमेव निर्दिष्टम्। प्रपञ्चसारसङ्ग्रहेऽपि (पृ. 153) कल्पसूत्रानुसारमिदं प्राप्यते।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मरकतरत्नप्राकाराय नमः। ३ विद्रुमरत्नप्राकाराय नमः। ३ माणिक्यमण्डपाय नमः। ३ सहस्रस्तम्भमण्डपाय नमः। ३ अमृतवापिकायै नमः। ३ आनन्दवापिकायै नमः। ३ विमर्शवापिकायै नमः। ३ बालातपोद्गाराय नमः। ३ चन्द्रिकोद्गाराय नमः। ३ महा-शृङ्गारपरिखायै नमः। ३ महापद्माटव्यै नमः। ३ चिन्तामणिगृहराजाय नमः। ३ पूर्वाम्नायमयपूर्वद्वाराय नमः। ३ दक्षिणाम्नायमयदक्षिणद्वाराय नमः। ३ पश्चिमाम्नायमयपश्चिमद्वाराय नमः। ३ उत्तराम्नायम-योत्तरद्वाराय नमः। ३ महामणि[मय]वेदिकायै नमः। ३ रत्नप्रदीपवलयाय नमः। ३ महासिंहासनाय नमः। ३ ब्रह्ममयैकमञ्चपादाय नमः। ३ विष्णुमयैकमञ्चपादाय नमः। ३ रुद्रमयैकमञ्चपादाय नमः। ३ ईश्वरमयैकमञ्चपादाय नमः। ३ सदाशिवमयफलकाय नमः। ३ हंसतूलिकायै नमः। ३ हंसतूलमहोपधानाय नमः। ३ कौसुम्भास्तरणाय नमः।

३ विभूत्यै नमः। ३ उन्नत्यै नमः। ३ कान्त्यै नमः। ३ हृद्यै(ष्ट्यै) नमः। ३ कीर्त्यै नमः। ३ सन्नत्यै नमः। ३ तुष्ट्यै नमः। ३ उत्कृष्ट्यै नमः। ३ ऋद्ध्यै नमः। एता नवशक्तयः।[71] ऐं ह्रीं श्रीमिति उक्तसर्वमन्त्रादौ योज्यम्।

पुर्नमध्ये– "महात्रिपुरसुन्दर्यासनाय नमः। ३ ऐं सर्वशक्तिकमलासनाय नमः" इत्यर्चयित्वा "ॐ ह्रीं श्रीं सौः श्रीमहात्रिपुरसुन्दर्याः कामेश्वरकामेश्वरीमूर्तये नमः" इति श्रीचक्रबिन्दुपीठे पुष्पाञ्जलिक्षेपेण देवीमूर्तिं कल्पयित्वा, मूलविद्यामुच्चार्य, "श्रीमहात्रिपुरसुन्दरीमूर्तिश्रीपादुकां पूजयामि" इति

71. एता नवशक्तयस्तन्त्रान्तराद् गृहीता इति प्रतिभाति। प्रपञ्चसारसंग्रहे (पृ. 154) एता नवशक्तयः पीठार्चने योजिताः।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पुष्पाञ्जलिं क्षिपेत्। इति पीठार्चनक्रमः।

अथ पञ्चायतनक्रमी चेत् तदा योगपीठान् निर्ऋतिवायव्यईशानाग्निकोणेषु गणेशसूर्यविष्णुशिवान् देव्याः पुरुषरूपविभूतीस्तत्पीठेषु पूजयेत्। गणेशादीनां तदुपसर्जनत्वेन पूजनं युक्तमेव। तदुक्तं दक्षिणामूर्तिसंहितायाम्–

ये मन्त्रास्तन्मयी देवी ज्ञानशक्तिरुदीरिता।
ततस्संसेव्यते देवी चतुरायतनैस्सदा।।[72]

इति तेषां दिग्विशेषेण पूजयेत्।

नैर्ऋतायां गणेशानः सूर्यो वायव्यकोणके।
ऐशान्ये विष्णुराग्नेये पूजनीयो महेश्वरः।।

इति देव्यागमवचनं प्रमाणम्। तत्र प्राचीनिर्णयो रुद्रयामले–

यत्रैव भास्वानुदयं प्रयाति
प्राचीमिमां वेदविदो वदन्ति।
मध्ये तथा पूजकपूज्ययोश्च
सदागमज्ञाः प्रवदन्ति तां तु।।[73]

इति तदनुसारेण चाग्नेयादिकोणान् विभाव्य तेषु क्रमेणैतान् पूजयेत्। तेषां पूजनेषु संग्रहविस्तारात्मकाः प्रयोगास्तत् तत् कल्पेषु द्रष्टव्याः। ग्रन्थविस्तरभयान्न लिख्यते। दक्षिणभागस्थापितसामान्यार्घ्यजलेन तेषां

---

72. श्लोकोऽयं दक्षिणामूर्तिसंहितायां (39.5–6) किञ्चित्पाठान्तरेण लभ्यते। यथा–

मनसस्तन्मयी देवी ज्ञानशक्तिरितीरिता।
अतः संसेव्यते देवी चतुरायतनैः सदा।। इति।

73. श्लोकोऽयं प्रपञ्चसारसंग्रहेऽपि (पृ. 71) दृश्यते।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पूजनमिति विशेषः।

ततो मध्ये श्रीचक्रराजे मूलदेवीमावाह्य सावरणां पूजयेत्। यथा– "स्ववामाङ्गे–गुं गुरुभ्यो नमः। दक्षिणे–गं गणपतये नमः। पुरतः श्रीमहात्रिपुरसुन्दर्यै नमः" इति प्रणम्य, मूलेन प्राणायामत्रयं कृत्वा, ऋष्यादिन्यासान् विधाय, त्रिखण्डामुद्रां बध्वा, पुष्पमादाय, मूलाधारात् कुण्डलिनीमुत्थाय, शिरस्थसहस्रदलकमलगतस्फुरत्ता–रूपया स्वसंवित्कलया संयोज्य, शिवशक्तिसामरस्यं ध्यायन् मानसैरुपचार्य, तदेव प्रकाशविमर्शात्मकं **"सूर्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम्"** तेजोवहन्नासापुटेन श्वासवशात् त्रिखण्डापुष्पेषु निस्सार्य, "ॐ ह्स्रैं ह्स्क्ल्रीं ह्स्रौः श्रीमहात्रिपुरसुन्दरि–

महापद्मवनान्तःस्थे कारणानन्दविग्रहे।
सर्वभूतहिते मातरेह्येहि परमेश्वरि।।"

इत्युच्चार्य, श्रीपीठान्तः पुष्पप्रक्षेपेण पूर्वकल्पिते बिन्दुमध्यगत–मूलदेवीमूर्तौ ब्रह्मरन्ध्रमार्गेण तत्तेजः प्रविष्टं ध्यायन् पुनरावाहनी–विद्यामुच्चार्य, पुनः सपुष्पत्रिखण्डां बध्वा, "भगवति श्रीमहात्रिपुरसुन्दरि इहागच्छागच्छ" इति पूर्ववदावाह्य, आवाहनस्थापनसन्निरोधनसम्मुखी–करणप्रसादनमुद्राः प्रदर्श्य, देवीमूर्तौ षडङ्गन्यासेन सकलीकरणं कृत्वा, अवगुण्ठनमुद्रयावगुण्ठ्य प्राणप्रतिष्ठां कुर्यात्। यथा–

देव्या हृदि हस्तं निधाय प्राणप्रतिष्ठामन्त्रं त्रिर्जपेत्। प्राणप्रतिष्ठामन्त्रः पूर्वोक्त एव। तत्रामुष्यपदात् पूर्वं साध्यनामनिर्देशः कार्य इत्युपदेशः। अतः **'ततः पद्मनिभाम्'** (नि.षो.का 1.130) इत्यादि पूर्वोक्तप्रकारेण ध्यात्वा, त[त्त]द्बीजोच्चारणपूर्वकं नवमुद्राः प्रदर्श्य, मूलान्ते श्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामीति उक्त्वा,

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

गन्धपुष्पाक्षतैस्त्रिरभ्यर्च्य, पुनः मूलान्ते श्रीमहात्रिपुरसुन्दरीश्रीपादुकां तर्पयामीति त्रिस्तत्त्वमुद्रया तर्पयेत्। तर्पणं च देवतामुख एव। तत्प्रकारस्तु–

अङ्गुष्ठानामिकाभ्यां तु नखैर्निःशब्दमुद्धृतम्।
अपारस्पन्दमस्पन्दं विधिवत्तर्पयेत् प्रिये॥

इति मूलविद्यया षोडशोपचारान् कुर्यात्।[74] ते च–

आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्।
मधुपर्काचमनस्नानवसनाभरणानि च॥
सुगन्धं सुमनो धूपं दीपं नैवैद्यवन्दनम्।
प्रयोजयेत् पूजकस्तानुपचारान् तु षोडश॥

(प्र.सा. 6.41–42)

इत्युपलक्षणं चैतत्। यथासम्भवमुपचाराः कर्तव्याः। प्रयोगस्तु मूलान्ते "श्रीमहात्रिपुरसुन्दरि एतत्ते आसनं नमः" इत्यादिरुह्यः, तत्र पाद्यं पादयोर्दद्यात्। अर्घ्यं स्वाहेति शिरसि, आचमनीयं स्वधेति मुखे, मधुपर्कं स्वधा, पुनराचमनीयं स्वधेति मुख एव। सर्वत्र स्नानाङ्गाच-मनीयमादावपि स्वधान्तता मुखस्थानता च नियता। पुष्पाणि वौषडिति दद्यात्। अन्येषामुपचाराणां नमोन्तता सर्वत्र त्रितारादित्वमिति विशेषः।

मूलदेव्याः पुष्पान्तानुपचारान् कृत्वा तदुपसर्जनश्यामलादिपूजां सामान्यार्घ्यजलेन कुर्यात्। तेषामपि पुष्पान्तमेव पूजनं दीपादि तन्त्रेणेत्युपदेशः। ततो लयाङ्गत्वेन देव्यङ्गे षडङ्गानि पूजयित्वा, पुनर्नवमुद्राश्च प्रदर्श्य, पुनस्तत्त्वमुद्रया त्रिस्सन्तर्प्य, सहस्रं शतं तदर्द्धं वा तर्पयेत्।

---

74. कल्पसूत्रे तु चतुष्षष्ट्युपचाराः सूचिताः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

अथावरणपूजा। तत्रादौ पुष्पाञ्जलिं गृहीत्वा,

ॐ संविन्मये महादेवि परामृतरुचिप्रिये।
अनुज्ञां त्रिपुरे देहि परिवारार्चनाय मे।।

इत्यनुज्ञां गृहीत्वा तिथिनित्याः समर्चयेत्।

तत्र मध्यत्रिकोणस्य दक्षिणरेखायामकारादिपञ्चस्वरान् विचिन्त्य, पृष्ठरेखायामूकारादिपञ्चस्वरान् विचिन्त्य, वामरेखायामेकारादि-पञ्चस्वरान् विचिन्त्य, मध्ये बिन्दूपरि विसर्गं चिन्तयेत्। तत्र अकाराद्यनुस्वरान्तेषु पञ्चदशस्वरेषु कामेश्वर्यादिचित्रान्ताः पञ्चदशनित्याः पूजयेत्। विसर्गे षोडशीत्रिपुरानित्यां पूजयेदिति क्रमः। तत्र मायालक्ष्मीबीजं युग्मद्वितारं वाग्भवबीजादि तदेव त्रितारं वा सर्वपूजामन्त्राणामादौ योज्यम्, अन्ते च सप्ताक्षरी योज्येति ज्ञानार्णवादिमतम्।[75] सप्ताक्षरी नाम "पादुकां पूजयामि" इति मन्त्रः। सप्ताक्षर्यादौ श्रीपदमपि योज्यमिति सम्प्रदायः। तर्पणे तु पूजयामीति पदस्थाने तपर्यामीत्यूह्यं तन्त्रेण पूजातर्पणयोः करणे पूजयामि तर्पयामीत्यूहः। केचित् सर्वत्रान्ते नमःपदं योजयन्ति।

तत्र प्रथमं तद्दिनतिथिनित्यां पूजयित्वा नित्यामण्डलं पूजादौ पूजान्ते च पूजयेदिति नियमः। अथ ऐं ह्रीं श्रीं अः क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं श्रीमहात्रिपुरसुन्दरीनित्याश्रीपादुकां पूजयामीति तर्पयामीति बिन्दुपीठे त्रिःसम्पूज्य, सन्तर्प्य, तत्तत्तिथिनित्यामेतत्काले स्वकाले वा त्रिः पूजयेत् तर्पयेच्च।

अथ "३ अं ऐं स क ल ह्रीं नित्यक्लिन्ने मदद्रवे सौः कामेश्वरीनित्याश्रीपादुकां पूजयामि तर्पयामि। ३ आं ऐं भगभुगे भगिनि भगोदरि भगमाले भगावहे भगगुह्ये भगयोनि भगनिपातिनि

75. सम्प्रत्युपलब्धे ज्ञानार्णवे(16.130) सप्ताक्षरीयोजनाया उल्लेखो दृश्यते।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सर्वभगवशंकरि भगरूपे भगक्लिन्ने भगस्वरूपे सर्वाणि भगानि मे ह्यानय वरदे रेते सुरेते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय अमोघे भगविच्चे क्षुभःक्षोभय सर्वसत्त्वान् भगेश्वरि ऐं ब्लू जं ब्लूं भें ब्लूं मों ब्लूं हें ब्लूं हें क्लिन्ने सर्वाणि भगानि मे वशमानय स्त्रीं हरब्लें ह्रीं भगमालिनीनित्याश्रीपादुकां पूजयामि तर्पयामि। ३ इं ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा नित्यक्लिन्नानित्याश्रीपादुकां पूजयामि तर्पयामि। ३ ईं ॐ क्रों भ्रों क्रौं झ्रौं ज्रौं स्वाहा भेरुण्डानित्याश्रीपादुकां पूजयामि तर्पयामि। ३ उं ॐ ह्रीं वह्निवासिन्यै नमः वह्निवासिनीनित्याश्रीपादुकां पूजयामि तर्पयामि। ३ ऊं ह्रीं क्लिन्ने ऐं क्रों नित्यमदद्रवे ह्रीं महाविद्येश्वरीनित्याश्रीपादुकां पूजयामि तर्पयामि। ३ ऋं ह्रीं शिवदूत्यै नमः शिवदूतीनित्याश्रीपादुकां पूजयामि तर्पयामि। ३ ॠं ॐ ह्रीं हुं खे च छे क्षः स्त्रीं हुं क्षें ह्रीं फट् त्वरितानित्याश्रीपादुकां पूजयामि तर्पयामि। ३ लृं ऐं क्लीं सौं कुलसुन्दरीनित्याश्रीपादुकां तर्पयामि। ३ ॡं ह स क ल र डैं ह स क ल र डीं ह स क ल र डौः नित्यानित्याश्रीपादुकां पूजयामि तर्पयामि। ३ एं ह्रीं फ्रें स्रूं क्रों आं क्लीं ऐं ब्लूं नित्यमदद्रवे हुं फ्रें ह्रीं नीलपताकानित्याश्रीपादुकां पूजयामि तर्पयामि। ३ ऐं भ्म्र्य्यूं विजयानित्याश्रीपादुकां पूजयामि तर्पयामि। ३ ओं स्वौं सर्वमङ्गलानित्याश्रीपादुकां पूजयामि तर्पयामि। ३ औं ॐ नमो भगवति ज्वालामालिनि देवदेवि सर्वभूतसंहारकारिके जातवेदसि ज्वलन्ति ज्वल ज्वल प्रज्वल प्रज्वल ह्रां ह्रीं ह्रूं र र र र र र र ज्वालामालिनि हुं फट् स्वाहा ज्वालामालिनीनित्या-श्रीपादुकां पूजयामि तर्पयामि। ३ अं च्क्रौं चित्रानित्याश्रीपादुकां पूजयामि तर्पयामि।" इति गन्धाक्षतकुसुमैस्त्रिकोणाग्रमारभ्य वामक्रमेण अकाराद्यानुस्वरान्तेषु स्वरेषु दक्षिणाग्रे कामेश्वरी, वामरेखाग्रे चित्रा यथा भवति तथा नित्या अर्चयेत्। विशेषार्घ्यजलैस्तर्पयेच्च। ततो

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मध्ये पूर्ववद्विसर्जयेत्[76], षोडशीं पूजयेत् तर्पयेच्च। अत्र विशेषः–

मूलमन्त्रेण मध्यस्थां त्रिधा देवीं समर्चयेत्।
तर्पणानि पुनर्दद्यात् त्रिवारं मूलविद्यया।।

तत्तत्तिथिमयीनित्यां समयेऽस्मिन् त्रिधाऽर्च्चयेत्।
प्रतिपत्प्रभृतौ देवीं पौर्णमास्यन्तिके क्रमात्।।

व्युत्क्रमात् कृष्णप्रतिपदामावास्यान्तिके क्रमात्।[77]
एकैकां पूजयेद् यो हि स सौभाग्यमवाप्नुयात्।।

इति शुक्लपक्षे प्रतिपदादिपौर्णमास्यान्तं कामेश्वर्यादिचित्रान्तानित्याः। प्रतिपदि कामेशीं, द्वितीयायां भगमालिनीमित्यादिक्रमेण। कृष्णपक्षे तु प्रतिपदि चित्रा, द्वितीयायां ज्वालामालिनीत्यादिव्युत्क्रमेण पूजयेदित्यर्थः।[78] यस्यास्तिथेरुदयद्वयद्वयव्यापित्वात् तिथिनित्यां पूर्वतिथिनित्यां च पूजादिने पूजयेदिति नित्यापूजाविधिः।

अत्र श्रीचक्रस्थास्सर्वावरणदेवताः कामेश्वराङ्कस्थितिमात्र–वर्जिता मूलदेवी समानवर्णाभरणा वा तत्तदावरणप्रकारेण वक्ष्यमाणा–युधवर्णाभरणा वा ध्येयाः।

---

76. अत्र 'पूर्ववद्विसर्जयेत्' इति पदं भ्रमेण लिखितं प्रतिभाति।
77. 'व्युत्क्रमात् कृष्णप्रतिपदामावास्यान्तिके क्रमात्' इति श्लोकार्ध अक्षरविन्यासदृष्ट्या न सङ्गच्छते। न च प्रकाशिते ज्ञानार्णवे दृश्यते। किन्तु–'कृष्णपक्षे महेशानि पूजयेत्तिथिमण्डलम्। विचित्राद्या वरारोहे यावत्कामेश्वरी भवेत्।। पूजनीया विलोमेन भक्त्या तु परमेश्वरी। (ज्ञाना. 16.41–42) इति तत्र सार्धैकः श्लोकः।
78. अत्र शुक्लपक्षे कामेश्वर्यादिचित्रान्ता नित्याः, कृष्णपक्षे च व्युत्क्रमेण चित्रादिकामेश्वर्यान्ताः पूजयेदिति भावः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ततोः गुरुपङ्क्तिं पूजयेत्। यथा– त्रिकोण एव देव्याः पृष्ठवाम-दक्षिणभागेषु मण्डलेषु नाथान्ताः श्रीचक्रशक्तिशेखरा इति तन्त्रराजवचनेन[79] दिव्यौघादीन् शक्त्यन्तान् पूजयेत् प्रादक्षिण्येन। यथा– पृष्ठभागे ह्रीं श्रीं प्रकाशानन्दशक्तिपादुकां पूजयामि तर्पयामि नमः। ह्रीं श्रीं विमर्शानन्दशक्तिपादुकां पूजयामि तर्पयामि नमः। ह्रीं श्रीं आनन्दानन्दशक्तिश्रीपादुकां पूजयामि तर्पयामीति दिव्यौघः। तत्रैव ह्रीं श्रीं ज्ञानानन्दशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः। ह्रीं श्रीं श्रीसत्यानन्दशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः। ह्रीं श्रीं पूर्णानन्दशक्तिश्रीपादुकां पूजयामि तर्पयामीति सिद्धौघः। तत्रैव ह्रीं श्रीं स्वभावानन्दशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः। ह्रीं श्रीं प्रतिभानन्दशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः। ह्रीं श्रीं सुभगानन्दशक्तिश्रीपादुकां पूजयामि तर्पयामीति। ओघत्रयपूजायां सर्वत्रादौ मायालक्ष्मीबीजद्वयं योज्यम्। देवीपुरतः गुरुपङ्क्तित्रयं यजेत्। यथा स्वगुरोः पूर्वनवमगुरुमारभ्य स्वगुरुपर्यन्तं त्रितारादि तत्तन्नामभिः गुरुन् पूजयेत्। तदज्ञाने, "३ परमेष्ठिगुरुश्रीपादुकां पूजयामि। ३ परमगुरुश्रीपादुकां पूजयामि। ३ स्वगुरुश्रीपादुकां पूजयामि"इत्यनेनैव क्रमेण तर्पयेच्च। इति गुरुपङ्क्तिपूजा।

इति त्रिकोणाष्टकोणयोरन्तराले अग्नीशासुरवायुकोणेषु मध्ये दिक्षु च षडङ्गयुवतीरर्च्चयेत्। यथा–ऐं ह्रीं श्रीं ऐं क्लीं सौः श्रीमहात्रिपुरसुन्दरि ह्रीं सर्वज्ञायै ह्रां हृदयाय नमः सर्वज्ञताशक्ति-श्रीपादुकां पूजयामि तर्पयामि नमः। ऐमादि ह्रीं ह्रीमन्तमुक्त्वा,

---

79. अत्र गुरुपङ्क्तित्रयपूजने तन्त्रराजतन्त्रानुसारं (2.3-10) गुरुनामसु प्रथमं श्रीपदं, ततश्च गुरुसंज्ञा, ततश्च आनन्दनाथशक्तीति नामयोजना सङ्गता प्रतिभाति। एवं ह्रीं श्रीं श्रीप्रकाशानन्दनाथशक्तिश्रीपादुकां पूजयामीति प्रयोगः समीचीनः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ह्रीं नित्यतृप्तायै ह्रीं शिरसे स्वाहा नित्यतृप्तताशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः। ऐं ह्रीं श्रीं ऐं क्लीं सौः महात्रिपुरसुन्दरि ह्रीं अनादिबोधायै ह्रूं शिखायै वषट् अनादिबोधशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः। ऐं ह्रीं श्रीं ऐं क्लीं सौः महात्रिपुरसुन्दरि ह्रीं स्वतन्त्रायै ह्रैं कवचाय हुं स्वतन्त्रताशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः। ऐं ह्रीं श्रीं ऐं क्लीं सौः महात्रिपुरसुन्दरि ह्रीं [नित्यम्]-अलुप्तशक्तये ह्रौं नेत्रत्रयाय वौषट् [नित्यम्]अलुप्तशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः। ऐं ह्रीं श्रीं ऐं क्लीं सौः महात्रिपुरसुन्दरि ह्रीं अनन्तशक्तये ह्रः अस्त्राय फट् अनन्तशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः। इति षडङ्गयुवतीपूजा।

आवरणपूजायाः स्थितिक्रमेण कर्तव्यत्वात्[80] बैन्दवपूजानन्तरं प्रकटयोगिनीपूजा लिख्यते। "३ समस्तप्रकटगुप्तगुप्ततरसम्प्रदायकुल-कौलनिगर्भरहस्यपरापररहस्यपरापरातिरहस्ययोगिनीगणश्रीपादुकां पूजयामि" इति श्रीचक्रं समष्टिविद्ययाऽभ्यर्च्य, "३ त्रैलोक्यमोहन-चक्राय चतुरस्रत्रयाय नमः" इति चतुरस्ररेखात्रयेऽभ्यर्च्य, संहारक्रमेण प्रथमरेखाद्वारेषु कोणेषु च अणिमादिसिद्धीः पूर्वोक्तमूलदेवीसमान-रूपतया वा,

तास्तु रक्ततरा वर्णैर्वराभयकरास्थिताः(स्तथा)।
धृतचिन्तामहारत्ना मनीषितफलप्रदाः॥

(यो.हृ. 3.115-116)

इति योगिनीहृदयोक्तप्रकारेण वा ध्यात्वाऽर्चयेत्। यथा–

पश्चिमद्वारे– ३ अणिमासिद्धिश्रीपादुकां पूजयामि तर्पयामि नमः। उत्तरद्वारे– ३ लघिमासिद्धिश्रीपादुकां पूजयामि तर्पयामि नमः।

80. अत्र 'स्थितिक्रमेण कर्तव्यत्वात्' इति निर्देशेऽपि पूजाक्रमस्तु संहारक्रमेणैवोपदर्शितः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पूर्वद्वारे– ३ महिमासिद्धिश्रीपादुकां पूजयामि तर्पयामि नमः। दक्षिणद्वारे– ३ ईशित्वसिद्धिश्रीपादुकां पूजयामि तर्पयामि नमः। वायव्यकोणे– ३ वशित्वसिद्धिश्रीपादुकां पूजयामि तर्पयामि नमः। ईशान्ये– ३ प्राकाम्यसिद्धिश्रीपादुकां पूजयामि तर्पयामि नमः। आग्नेये– ३ भुक्तिसिद्धिश्रीपादुकां पूजयामि तर्पयामि नमः। नैर्ऋत्ये– ३ इच्छासिद्धिश्रीपादुकां पूजयामि तर्पयामि नमः। निर्ऋतिवरुणयोर्मध्ये– ३ प्राप्तिसिद्धिश्रीपादुकां पूजयामि तर्पयामि नमः। इन्द्रेशानयोर्मध्ये– ३ सर्वकामसिद्धिश्रीपादुकां पूजया[मि तर्पया]मीत्यर्चयेत्।

ततश्चतुरस्रमध्यरेखायां पूर्वोक्तप्रकारेण वा,

ब्रह्माणी पीतवर्णा च चतुर्भिः शोभिता मुखैः।
वरदाभयहस्ता च कुण्डिकाक्षस्रगुज्ज्वला॥

माहेश्वरी पीतवर्णा त्रिनेत्रा शूलधारिणी।
कपालमेणं कस्तूरीगन्धानापाणिभिः प्रिये॥

कौमारी पीतवर्णा च शक्तितोमरधारिणी।
वरदाभयहस्ता च ध्यातव्या परमेश्वरी॥

वैष्णवी श्यामवर्णा च शङ्खचक्रवराभयान्।
हस्तपद्मैस्तु बिभ्राणा भूषिता दिव्यभूषणैः॥

वाराही श्यामलच्छाया पोत्रिवक्त्रसमुज्ज्वला।
हलं च मुसलं खड्गं खेटकं दधती भुजैः॥

ऐन्द्री श्यामलवर्णा च वज्रज्वालालसत्करा।
चामुण्डा कृष्णवर्णा च शूलं डमरुकं तथा॥

खड्गं वेतालकं चैव दधाना दक्षिणैः करैः।
नागखेटकघण्टाख्यान् दधानान्यैः कपालकम्॥

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

महालक्ष्मीस्तु पीताभा पद्मं दर्पणमेव च।
मातुलुङ्गफलं चैव दधाना परमेश्वरी॥

(यो.हृ. 3.117-124)

इति प्रत्येकं वा ध्यात्वा ब्रह्मादिशक्तीरर्चयेत्। यथा–

पश्चिमद्वारे– ३ आं ब्राह्मीश्रीपादुकां पूजयामि तर्पयामि नमः। उत्तरद्वारे– ३ ईं माहेश्वरीश्रीपादुकां पूजयामि तर्पयामि नमः। पूर्वद्वारे– ३ ऊं कौमारीश्रीपादुकां पूजयामि तर्पयामि नमः। दक्षिणद्वारे– ३ ॠं वैष्णवीश्रीपादुकां पूजयामि तर्पयामि नमः। वायव्ये– ३ ॡं वाराहीश्रीपादुकां पूजयामि तर्पयामि नमः। ईशान्ये– ३ ऐं माहेन्द्रीश्रीपादुकां पूजयामि तर्पयामि नमः। आग्नेये– ३ औं चामुण्डाश्रीपादुकां पूजयामि तर्पयामि नमः। नैर्ऋत्ये– ३ अः महालक्ष्मीश्रीपादुकां पूजयामि तर्पयामि नमः। इति चतुरस्रान्त्यरेखायां पूर्वोक्तप्रकारेण वा।

मुद्रादेव्यः प्रसीदन्तु वराभयकराम्बुजाः।
भक्तानुग्रहसन्धानदेवतामोदहेतवः(वे)॥[81]

इति ध्यात्वा, मुद्रादशकमर्चयेत्। यथा -

पश्चिमद्वारे– ३ द्रां सर्वसंक्षोभिणीमुद्राश्रीपादुकां पूजयामि तर्पयामि नमः। उत्तरद्वारे– ३ द्रीं सर्वविद्राविणीमुद्राश्रीपादुकां पूजयामि तर्पयामि नमः। पूर्वद्वारे– ३ क्लीं सर्वाकर्षिणीमुद्राश्रीपादुकां पूजयामि तर्पयामि नमः। दक्षिणद्वारे– ३ ब्लूं सर्ववशङ्करीमुद्राश्रीपादुकां पूजयामि तर्पयामि नमः। वायव्ये– ३ सः सर्वोन्मादिनीमुद्राश्रीपादुकां पूजयामि तर्पयामि नमः। ईशान्ये– ३ क्रों सर्वमहाङ्कुशामुद्राश्रीपादुकां पूजयामि तर्पयामि

---

81. श्लोकोऽयं श्रीविद्यार्णवे (पृ. 128) रुद्रयामलवचनत्वेन निर्दिष्टः।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नमः। आग्नेये– ३ अं आं सौः सर्वत्रिखण्डामुद्राश्रीपादुकां पूजयामि तर्पयामि नमः। नैर्ऋत्ये– ३ ह्सौः सर्वबीजमुद्राश्रीपादुकां पूजयामि तर्पयामि नमः। इन्द्रेशानयोर्मध्ये– ३ ह्स्ख्फ्रें सर्वखेचरीमुद्राश्रीपादुकां पूजयामि तर्पयामि नमः। निर्ऋतिवरुणयोर्मध्ये– ३ ऐं सर्वयोनिमुद्राश्रीपादुकां पूजयामि तर्पयामीति अणिमासिद्धिपुरतः चक्रेश्वरीं पूजयेत्।[82]

३ अं आं सौः त्रिपुराचक्रेश्वरीश्रीपादुकां पूजयामि तर्पयामि नमः। तस्याः वामे– ३ द्रां सर्वसंक्षोभिणीमुद्रा(यै?)श्रीपादुकां पूजयामि तर्पयामि नमः। ३ अणिमासिद्धिश्रीपादुकां पूजयामि तर्पयामि नमः। ततो द्रामित्युच्चार्य सर्वसंक्षोभिणीमुद्रां मूलदेव्यै दर्शयित्वा चक्रेशीहस्ते चक्रपूजां समर्पयेत्।

३ एताः प्रकटयोगिन्यः त्रैलोक्यमोहनचक्रे "समुद्राः ससिद्धयः सायुधाः सवाहनाः सपरिवाराः सर्वोपचारैः पूजिताः तर्पितास्सन्तु" इति सामान्यार्घ्योदकाक्षतकुसुमैश्चक्रेश्वरीहस्ते प्रथमचक्रपूजां समर्प्य, हस्तं प्रक्षाल्य, पुष्पाञ्जलिं गृहीत्वा, मूलान्ते श्रीमहात्रिपुरसुन्दरि–

अभीष्टसिद्धिं मे देहि शरणागतवत्सले।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्॥

इत्युच्चार्य, मूलदेव्याः शिरसि पुष्पाञ्जलिक्षेपेण पूजां देव्यै समर्प्य, "प्रकटयोगिनीरूपायै श्रीमहात्रिपुरसुन्दर्यै नमः" इति योनिमुद्रया देवीं प्रणमेदिति प्रथमावरणम्।

अथ षोडशारे, "३ सर्वाशापरिपूरकचक्राय षोडलदलपद्माय नमः" इति पुष्पाणि निक्षिप्य, **'पाशाङ्कुशधरा ह्येता रक्ता रक्ताम्बरावृताः'** (यो.हृ. 3.129) इति भूतेन्द्रियमनोमयी–

82. अत्र सर्वत्रिखण्डामुद्राविषये मन्त्रबीजानि तत्क्रमश्च पूर्वनिर्दिष्ट एव (पृ. 37) ग्राह्यः।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

कामाकर्षिण्याद्या ध्यात्वा, पश्चाद्दलं समारभ्य वामावर्तेन ताः पूजयेत्। यथा–

३ अं कामाकर्षिणीनित्याकलाश्रीपादुकां पूजयामि तर्पयामि नमः। ३ आं बुद्ध्याकर्षिणीनित्याकलाश्रीपादुकां पूजयामि तर्पयामि नमः। ३ इं अहङ्काराकर्षिणीनित्याकलाश्रीपादुकां पूजयामि तर्पयामि नमः। ३ ईं शब्दाकर्षिणीनित्याकलाश्रीपादुकां पूजयामि तर्पयामि नमः। ३ उं स्पर्शाकर्षिणीनित्याकलाश्रीपादुकां पूजयामि तर्पयामि नमः। ३ ऊं रूपाकर्षिणीनित्याकलाश्रीपादुकां पूजयामि तर्पयामि नमः। ३ ऋं रसाकर्षिणीनित्याकलाश्रीपादुकां पूजयामि तर्पयामि नमः। ३ ॠं गन्धाकर्षिणीनित्याकलाश्रीपादुकां पूजयामि तर्पयामि नमः। ३ ऌं चित्ताकर्षिणीनित्याकलाश्रीपादुकां पूजयामि तर्पयामि नमः। ३ ॡं धैर्याकर्षिणीनित्याकलाश्रीपादुकां पूजयामि तर्पयामि नमः। ३ एं स्मृत्याकर्षिणीनित्याकलाश्रीपादुकां पूजयामि तर्पयामि नमः। ३ ऐं नामाकर्षिणीनित्याकलाश्रीपादुकां पूजयामि तर्पयामि नमः। ३ ओं बीजाकर्षिणीनित्याकलाश्रीपादुकां पूजयामि तर्पयामि नमः। ३ औं आत्माकर्षिणीनित्याकलाश्रीपादुकां पूजयामि तर्पयामि नमः। ३ अं अमृताकर्षिणीनित्याकलाश्रीपादुकां पूजयामि तर्पयामि नमः। ३ अः शरीराकर्षिणीनित्याकलाश्रीपादुकां पूजयामि तर्पयामि नम इति संपूज्य,

कामाकर्षिण्यग्रे "३ ऐं क्लीं सौः त्रिपुरेश्वरी चक्रेश्वरीश्रीपादुकां पूजयामि तर्पयामि नमः" इति चक्रेशीं संपूज्य, तस्या वामे– द्रीं सर्वविद्राविणीमुद्राश्रीपादुकां पूजयामि तर्पयामि नमः। दक्षिणे– ३ लघिमासिद्धिश्रीपादुकां पूजयामि तर्पयामि नमः। ततः द्रीमिति सर्वविद्राविणीमुद्रां दर्शयित्वा,

"३ एता गुप्तयोगिन्यः सर्वाशापरिपूरकचक्रे "समुद्रा०" इत्यादि पूर्ववत् सामान्यार्घ्यजलेन चक्रेशीहस्ते पूजां समर्प्य, मूलदेव्यै

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"**अभीष्टसिद्धिं मे देहि॰ द्वितीयावरणार्चनम्**" इति समर्प्य, "गुप्तयोगिनीरूपायै श्रीमहात्रिपुरसुन्दर्यै नमः" इति योनिमुद्रया देवीं प्रणमेदिति द्वितीयम्।

ततोऽष्टदले पद्मे "सर्वसंक्षोभणचक्रायाष्टदलपद्माय नमः" इति पुष्पं निक्षिप्य, अनङ्गकुसुमाद्या शक्तीः पूर्वोक्तप्रकारेण वा,

अनङ्गकुसुमाद्यास्तु रक्तकञ्चुकशोभिताः।
वेणीकृतलसत्केशाश्चापबाणधराः शुभाः॥

(यो.हृ. 3.132--133)

इति वा ध्यात्वा, प्रागादिदिक्षु वह्न्यादिविदिक्षु च प्रादक्षिण्येन पूजयेत्। यथा–

प्राग्दले– ३ अनङ्गकुसुमाश्रीपादुकां पूजयामि तर्पयामि नमः। दक्षिणदले– ३ अनङ्गमेखलाश्रीपादुकां पूजयामि तर्पयामि नमः। पश्चिमदले– ३ अनङ्गमदनाश्रीपादुकां पूजयामि तर्पयामि नमः। उत्तरदले– ३ अनङ्गमदनातुराश्रीपादुकां पूजयामि तर्पयामि नमः। आग्नेये दले– ३ अनङ्गरेखाश्रीपादुकां पूजयामि तर्पयामि नमः। नैर्ऋत्ये दले– ३ अनङ्गवेगिनीश्रीपादुकां पूजयामि तर्पयामि नमः। वायव्ये– ३ अनङ्गाङ्कुशाश्रीपादुकां पूजयामि तर्पयामि नमः। ईशान्ये– ३ अनङ्गमालिनीश्रीपादुकां पूजयामि तर्पयामि नम इति संपूज्य, संतर्प्य,

अनङ्गकुसुमाग्रे– "३ ऐं क्लीं सौः त्रिपुरसुन्दरीचक्रेश्वरी–श्रीपादुकां पूजयामि तर्पयामि नमः"। तस्या वामे– ३ क्लीं सर्वा–कर्षिणीमुद्राश्रीपादुकां पूजयामि तर्पयामि नमः। दक्षिणे– ३ महिमासिद्धिश्रीपादुकां पूजयामि तर्पयामि नमः। ततः क्लीमिति सर्वाकर्षिणीमुद्रां दर्शयित्वा,

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"३ एता गुप्ततरयोगिन्यः सर्वसंक्षोभणचक्रे समुद्रा०" इत्यादि सामान्यार्घ्यजलेन चक्रेशीहस्ते पूजां समर्प्य, पूर्ववत् **"अभीष्ट० तृतीयावरणार्चनम्"** इति। तदावरणपूजां मूलदेव्यै समर्प्य "३ गुप्ततरयोगिनीरूपायै श्रीपादुकां पूजयामि तर्पयामि नमः" इति योनिमुद्रया मूलदेवीं प्रणमेदिति तृतीयम्।

अथ चतुर्दशारे "३ सर्वसौभाग्यदायकचक्राय चतुर्दशाराय नमः" इति पुष्पं निक्षिप्य, पश्चिमकोणाख्यपृष्ठकोणमारभ्य वामावर्तेन पश्चिमादेव दक्षिणं गृहीत्वेति चतुश्शतीशास्त्रोक्तरीत्या सर्वसंक्षोभिण्याद्याः–

तास्तु रक्ततरा वर्णैर्वराभयकरास्थिता:(स्तथा)।
धृतचिन्तामहारत्ना मनीषितफलप्रदाः॥

(यो.हृ. 3.115–116)

इति पूर्वोक्ताणिमादिवत् वा ध्यात्वा समर्चयेत्।

३ कं सर्वसंक्षोभणीशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः। ३ खं सर्वविद्राविणीशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः।
३ गं सर्वाकर्षिणीशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः।
३ घं सर्वाह्लादिनीशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः।
३ ङं सर्वसंमोहिनीशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः।
३ चं सर्वस्तम्भिनीशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः।
३ छं सर्वजृम्भिणीशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः।
३ जं सर्ववशंकरीशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः।
३ झं सर्वरञ्जिनीशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः।
३ ञं सर्वोन्मादिनीशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः।
३ टं सर्वार्थसाधिनीशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

३ ठं सर्वसम्पत्तिपूरिणीशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः।
३ डं सर्वमन्त्रमयीशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः।
३ ढं सर्वद्वन्द्वक्षयङ्करीशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः।

ततः सर्वसंक्षोभिण्यग्रे– हैं ह्क्लीं ह्सौः त्रिपुरवासिनी–चक्रेश्वरीश्रीपादुकां पूजयामि तर्पयामि नमः। तस्य वामे– ३ ब्लूं सर्ववशंकरीमुद्राश्रीपादुकां पूजयामि तर्पयामि नमः। दक्षिणे– ३ ईशित्वसिद्धिश्रीपादुकां पूजयामि तर्पयामि नमः। ततः ब्लूमिति सर्ववशङ्करीमुद्रां प्रदर्श्य, मूलदेव्यै "३ एतास्सम्प्रदाययोगिन्यः सर्वसौभाग्यदायकचक्रे समुद्राः॰" इत्यादि। एतत्तच्चक्रमारभ्य विशेषार्घ्योदकेन[83] पूजासमर्पणमपि पूर्ववच्चतुर्थावरणार्चनं "सम्प्रदाययोगिनीरूपायै श्रीमहात्रिपुरसुन्दर्यै नमः" इति मूलदेवीं प्रणमेदिति चतुर्थावरणम्।

अथ बाह्यदशारे "३ (बाह्यदशारे?) सर्वार्थसाधकचक्राय बाह्यदशाराय नमः" इति पुष्पं निक्षिप्य, पश्चिमादेव दक्षिणमपि पूर्वोक्तवामावर्तक्रमेण पृष्ठकोणमारभ्य सर्वसिद्धिप्रदाद्याः

"श्वेता वराभयकराः श्वेताभरणभूषिताः" (यो.हृ.3.144)

इति ध्यात्वा देवीं सप्ताक्षरीयुतां पूजयेत्।

३ सर्वसिद्धिप्रदादेवीश्रीपादुकां पूजयामि तर्पयामि नमः।
३ सर्वसंपत्प्रदादेवीश्रीपादुकां पूजयामि तर्पयामि नमः।
३ सर्वप्रियङ्करीदेवीश्रीपादुकां पूजयामि तर्पयामि नमः।
३ सर्वमङ्गलकारिणीदेवीश्रीपादुकां पूजयामि तर्पयामि नमः।
३ सर्वकामप्रदादेवीश्रीपादुकां पूजयामि तर्पयामि नमः।

---

83. अत्र 'विशेषार्घ्योदकेन' इति स्थाने 'सामान्यार्घ्योदकेन' इति पाठः पूर्वापरसम्बन्धात् समुचितः।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

३ सर्वदुःखविमोचिनीदेवीश्रीपादुकां पूजयामि तर्पयामि नमः।
३ सर्वमृत्युप्रशमनीदेवीश्रीपादुकां पूजयामि तर्पयामि नमः।
३ सर्वविघ्नविनाशिनीदेवीश्रीपादुकां पूजयामि तर्पयामि नमः।
३ सर्वाङ्गसुन्दरीदेवीश्रीपादुकां पूजयामि तर्पयामि नमः।
३ सर्वसौभाग्यदायिनीदेवीश्रीपादुकां पूजयामि तर्पयामि नमः।

सर्वसिद्धिप्रदाग्रे– ३ ह्सैं ह्स्क्लीं ह्सौः त्रिपुरा-श्रीचक्रेश्वरीदेवीश्रीपादुकां पूजयामि तर्पयामि नमः। तस्या वामे– ३ सः सर्वोन्मादिनीमुद्राश्रीपादुकां पूजयामि तर्पयामि नमः। दक्षिणे–वशित्वसिद्धिश्रीपादुकां पूजयामि तर्पयामि नमः। ततः सर्वोन्मादिनीमुद्रां मूलदेव्यै प्रदर्श्य, "३ एताः कुलकौलयोगिन्यः सर्वार्थसाधकचक्रे समुद्रा०" इत्यादि विशेषा(सामान्या)र्घ्यजलेन पञ्चमावरणार्चनमिति मूलदेव्यै समर्प्य, "३ कुलकौलयोगिनीरूपायै श्रीमहात्रिपुरसुन्दर्यै नमः" इति योनिमुद्रया देवीं प्रणमेदिति पञ्चमावरणम्।

अथ अन्तर्दशारे "३ सर्वरक्षाकरचक्राय अन्तर्दशाराय नमः" इति संपूज्य पूर्ववद् वामावर्तेन पश्चिमाद्याः–

अन्तर्दशारदेव्यस्तु पुस्तकाक्षालिपाणयः।
देव्यः स्फटिकसंकाशास्सर्वज्ञाद्यास्तु देवताः॥[84]

इति ध्यात्वा पूर्ववद् देवीं सप्ताक्षरीयुतां पूजयेत्।

३ सर्वज्ञादेवीश्रीपादुकां पूजयामि तर्पयामि नमः। ३ सर्व-शक्तिप्रदादेवीश्रीपादुकां पूजयामि तर्पयामि नमः। ३ सर्वैश्वर्य-प्रदादेवीश्रीपादुकां पूजयामि तर्पयामि नमः। ३ सर्वज्ञानमयी-

---

84. योगिनीहृदये (3.149) त्वयं पाठः–'सर्वज्ञाद्याः स्थिता एताः सह पुस्ताक्षमालिकाः' इति। श्रीविद्यार्णवे (पृ. 130) रुद्रयामलवचनत्वेन 'अन्तर्दशारवासिन्यः प्रसीदन्तु ममानिशम्। देव्यः स्फटिकसङ्काशाः पुस्तकाक्षालिबाहवः॥' इति।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

देवीश्रीपादुकां पूजयामि तर्पयामि नमः। ३ सर्वव्याधि-विनाशिनीदेवीश्रीपादुकां पूजयामि तर्पयामि नमः। ३ सर्वाधारस्वरूपिणीदेवीश्रीपादुकां पूजयामि तर्पयामि नमः। ३ सर्वपापहरादेवीश्रीपादुकां पूजयामि तर्पयामि नमः। ३ सर्वानन्दमयीदेवीश्रीपादुकां पूजयामि तर्पयामि नमः। ३ सर्वरक्षास्वरूपिणीश्रीपादुकां पूजयामि तर्पयामि नमः। ३ सर्वेप्सित-फलप्रदादेवीश्रीपादुकां पूजयामि तर्पयामि नमः।

ततः सर्वज्ञाग्रे– ३ ह्रीं क्लीं ब्लें त्रिपुरमालिनीचक्रेशीश्रीपादुकां पूजयामि तर्पयामि नमः। तस्या वामे– ३ क्रों सर्वमहाङ्कुशा-मुद्राश्रीपादुकां पूजयामि तर्पयामि नमः। दक्षिणे– ३ प्राकाम्यसिद्धि-श्रीपादुकां पूजयामि तर्पयामि नमः। ततः क्रोमिति महाङ्कुशामुद्रां मूलदेव्यै प्रदर्श्य, "३ एता निगर्भयोगिन्यः सर्वरक्षाकरचक्रे समुद्राः°" इत्यादि सामान्यार्घ्योदकेन चक्रेशीहस्ते पूजां समर्प्य, पूर्ववत् षष्ठावरणार्चनमिति पुष्पाञ्जलिनावरणपूजां मूलदेव्यै समर्प्य, "३ निगर्भयोगिनीरूपायै श्रीमहात्रिपुरसुन्दर्यै नमः" इति योन्या प्रणमेदिति षष्ठावरणम्।

अथाष्टारे "३ सर्वरोगहरचक्रायाष्टकोणाय नमः' इत्यभ्यर्च्य, पश्चिमकोणाद्याप्रादक्षिण्येन वशिन्यादि-

वशिन्याद्याः प्रसीदन्तु सिन्दूरसदृशत्विषः।
पुस्तकाक्षालिविलसत् वरदाभीतिपाणयः॥[85]

इति ध्यात्वा पूजयेत्। ३ अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः इति स्वरानुच्चार्य, ३ ब्लूँ वशिनीवाग्देवताश्रीपादुकां

85. श्लोकोऽयं योगिनीहृदये (3.154-155) 'वशिन्याद्या रक्तवर्णा वरदाभयमुद्रिताः। पुस्तकं जपमालां च दधानाः सिद्धयोगिनीः॥' इत्येव लभ्यते।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पूजयामि तर्पयामि नमः। ३ कवर्गः क्ल्ह्रीं कामेश्वरीवाग्देवताश्रीपादुकां पूजयामि तर्पयामि नमः। ३ चवर्गः न्ब्लीं मोदिनीवाग्देवताश्रीपादुकां पूजयामि तर्पयामि नमः। ३ टवर्गः य्लूं विमलावाग्देवताश्रीपादुकां पूजयामि तर्पयामि नमः। ३ तवर्गः ज्म्रीं अरुणावाग्देवताश्रीपादुकां पूजयामि तर्पयामि नमः। ३ पवर्गः ह्स्ल्व्यूं जयिनीवाग्देवताश्रीपादुकां पूजयामि तर्पयामि नमः। ३ यं रं लं वं झ्म्र्यूं सर्वेश्वरीवाग्देवताश्रीपादुकां पूजयामि तर्पयामि नमः। ३ शं षं सं हं ळं क्षं क्ष्म्रीं कौलिनीवाग्देवताश्रीपादुकां पूजयामि तर्पयामि नमः।

ततो वशिन्यग्रे– ३ ह्रीं श्रीं सौः त्रिपुरासिद्धेश्वरीचक्रेश्वरीश्रीपादुकां पूजयामि तर्पयामि नमः। तस्या वामे– ३ ह्स्ख्फ्रें सर्वखेचरीमुद्राश्रीपादुकां पूजयामि तर्पयामि नमः। दक्षिणे– ३ भुक्तिसिद्धिश्रीपादुकां पूजयामि तर्पयामि नमः। ततः ३ ह्स्ख्फ्रें खेचरीमुद्रां प्रदर्श्य, मूलदेव्यै "३ एता रहस्ययोगिन्यः सर्वरोगहरचक्रे समुद्रा०" इत्यादि चक्रेशीहस्ते पूर्ववत् समर्प्य, सप्तमावरणार्चनमिति मूलदेव्यै समर्प्य "३ रहस्ययोगिनीरूपायै श्रीमहात्रिपुरसुन्दर्यै नमः" इति पूर्ववत् प्रणमेदिति सप्तमावरणम्।

अथ त्रिकोणे "३ सर्वसिद्धिप्रदचक्राय सान्तरालाय महात्रिकोणाय नमः" इति संपूज्य, तत्राष्टकोणत्रिकोणान्तराले पश्चिमादिप्रादक्षिण्येन कामेश्वरीकामेश्वरयोरायुधानि–

आयुधास्त्वतिरक्ताभाः स्वायुधोज्ज्वलमस्तकाः।
वरदाभयहस्ताश्च पूज्या व्रतफलप्रदाः।
त्वदीयाश्च मदीयाश्च पुंस्त्रीवश्यविधायिनः॥

(यो.हृ. 3.159–160)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

इति ध्यात्वा, तत्तत् बीजपूर्वकं नमोन्तं तत्तन्नामभिरर्चयेत्। अत्र पूजायामपि नामानि **"नमोन्तानि महेश्वरी"** (4.89) इति तन्त्रराजवचनात् नमोन्तता इति ध्येयम्। तद्यथा देव्यग्रे– ३ द्रां द्रीं क्लीं ब्लूं सः जम्भनेभ्य कामेश्वरबाणेभ्यो नमः। देव्या वामे – ३ यां रां लां वां सां जम्भनेभ्य कामेश्वरीबाणेभ्यो नमः। ३ थं मोहनाय कामेश्वरचापाय नमः। ३ धं मोहनाय कामेश्वरीचापाय नमः। ३ आं वशीकरणाय कामेश्वरपाशाय नमः, ३ ह्रीं वशीकरणाय कामेश्वरीपाशाय नमः। देव्या दक्षिणे– ३ क्रों स्तम्भनाय कामेश्वराङ्कुशाय नमः। ३ क्रों स्तम्भनाय कामेश्वर्यङ्कुशाय नम इत्यभ्यर्च्य,

ततो त्रिकोणस्याग्रकोणे– ३ वाग्भवकूटमुच्चार्य अग्निचक्रे कामाख्यगिर्यालये मित्रेशनाथात्मिके जाग्रद्दशाधिष्ठायिके इच्छाश-क्त्यात्मकरुद्रात्मशक्तिश्रीकामेश्वरीदेवीश्रीपादुकां पूजयामि तर्पयामि नमः। देव्या दक्षिणकोणे– ३ कामराजकूटमुच्चार्य, ३ सूर्यचक्रे जालन्धरपीठे षष्ठीशनाथात्मिके स्वप्नदशाधिष्ठायिके ज्ञानशक्त्या-त्मकविष्ण्वात्मकशक्तिश्रीवज्रेश्वरीदेवीश्रीपादुकां पूजयामि तर्पयामि नमः। देव्या वामकोणे– ३ शक्तिकूटमुच्चार्य सोमचक्रे पूर्णगिरिगह्वरे उड्डीशनाथात्मिके सुषुप्तिदशाधिष्ठायिके क्रियाशक्त्यात्मक-ब्रह्मात्मशक्तिश्रीभगमालिनीदेवीश्रीपादुकां पूजयामि तर्पयामि नमः। कामेश्वर्यग्रे– ३ ह्स्त्रैं ह्स्क्ल्रीं ह्स्त्रौं त्रिपुराम्बिकाचक्रेश्वरीश्रीपादुकां पूजयामि तर्पयामि नमः। तस्या वामे– ३ हसौः बीजमुद्राश्रीपादुकां पूजयामि तर्पयामि नमः। दक्षिणे– ३ इच्छासिद्धिश्रीपादुकां पूजयामि तर्पयामि नमः। ततः ३ हसौं इति बीजमुद्रां मूलदेव्यै प्रदर्श्य, "३ एताः परापरहस्ययोगिनीसर्वसिद्धिप्रदे चक्रे समुद्राः०" इत्यादि चक्रेशीहस्ते पूजां समर्प्य, अष्टमावरणार्चनमिति मूलदेव्यै समर्प्य,

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

"३ परापररहस्यरूपायै श्रीमहात्रिपुरसुन्दर्यै नमः" [इति] योनिमुद्रया देवीं प्रणमेदिति अष्टमावरणम्।

अथ बैन्दवे "३ सर्वानन्दमयाय बिन्दुचक्राय नमः" इति पुष्पं निक्षिप्य गन्धाक्षतकुसुमैर्मूलदेवीं पूजयेत्। तद्यथा– सप्रणवमुच्चार्य, ३ ब्रह्मचक्रे महोड्यानपीठे श्रीचर्यानाथात्मिके तुर्यदशाधिष्ठायिके जाग्रत्स्वप्नसुषुप्तितुर्यतुर्यातीतावस्थे इच्छाज्ञानक्रियाशान्तातीत-परब्रह्मस्वरूपशक्तिश्रीमहात्रिपुरसुन्दरीदेवीश्रीपादुकां पूजयामिति रक्तपुष्पगन्धाक्षताञ्जलिना त्रिःपूजयित्वा तर्पयामिति विशेषार्घ्यामृत-बिन्दुना तत्त्वमुद्रया त्रिस्तर्पयेत्। ततस्तामेव चक्रेश्वरीत्वेन पूजयेत्।

३ मूलविद्यामुच्चार्य श्रीमहात्रिपुरसुन्दरीचक्रेश्वरीश्रीपादुकां पूजयामि तर्पयामि इति त्रिस्संपूज्य संतर्प्य, तस्या वामे–३ ॐ ह्रीं श्री ऐं योनिमुद्राश्रीपादुकां पूजयामि तर्पयामि। दक्षिणे– ३ प्राप्तिसिद्धिश्रीपादुकां पूजयामि तर्पयामि नमः। ततः ३ ऐमिति योनिमुद्रां बध्वा मूलदेव्याः प्रदर्श्य, "३ एताः परापररहस्ययोगिन्यः सर्वानन्दमयचक्रे बैन्दवे परब्रह्मस्वरूपिणी ससिद्धयस्सायुधास्सवाहना-स्सपरिवारास्सर्वोपचारैः पूजितास्तर्पितास्सन्तु"[86] इति विशेषार्घ्यजलेन[87] नवचक्रेश्वरीहस्ते चक्रपूजां समर्प्य, पुष्पाञ्जलिं गृहीत्वा, मूलमुच्चार्य श्रीमहात्रिपुरसुन्दरि–

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले।
भक्त्या समर्पये तुभ्यं नवमावरणार्चनम्॥

---

86. अत्र बिन्दुचक्रे नवमावरणे एकस्या एव देवतायाः सत्त्वात् अन्ते 'परब्रह्मस्वरूपिणी ससिद्धयस्सायुधास्सवाहनाः सपरिवाराः सर्वोपचारैः पूजितास्तर्पिताः सन्तु नमः' इत्येव प्रयोगः कल्पसूत्रादिदर्शनात् समीचीनः।

87. अत्र 'विशेषार्घ्यजलेन' इति स्थाने 'सामान्यार्घ्यजलेन' इति योजनीयम्।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

इति नवमचक्रेश्वर्याः शिरसि पुष्पाञ्जलिं निक्षिप्यावरणपूजां समर्प्य, "३ परापररहस्ययोगिनीरूपायै श्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि" इति योनिमुद्रया प्रणमेत्। पुनः पूर्ववत् त्रिकोणादौ नित्यामण्डलादीन् पूजयेदिति केचित्। ततः सर्वचक्रमेकरूपेण ध्यायन् सर्वचक्रनायिकायै तस्यै नवमुद्राः प्रदर्श्य, हेतिमुद्राचतुष्टयं प्रदर्शयेदित्युपदेशः। इति नवमावरणम्।

अत्र केचिच्चतुर्दशारादिचक्रार्चने मातृकायोगं कुर्वन्ति। योगिनीहृदयादावदृष्टत्वात् अस्माभिः मातृकायोगो न प्रदर्शितः।

अथ मूलदेवीं पञ्चविंशतिनामभिरभ्यर्च्य[88] धूपदीपादिसमर्पणं कुर्यात्। यथा– साङ्गारं गुग्गुल्वादिधूपपात्रं पुरो निधाय, अङ्गुष्ठा-नामिकाभ्यां स्पृष्ट्वा, मूलेन चक्षुषा निरीक्षमाणो ज्ञानक्रियेच्छात्मकैरपि वह्निसोमनेत्रैश्शोषणदाहनामृतप्लावनानि विभाव्य, अस्त्रमन्त्रेण प्रोक्ष्य, अस्त्रमन्त्रेणैव मध्याङ्गुल्या संताड्य, वौषडन्तकवचेन सामान्यार्घ्यजलेन विशेषार्घ्यजलेन वा प्रोक्षणं कुर्वन्, मध्याङ्गुलिताडितात् धूपपात्रदाहनात् पाषाणात् स्फुलिङ्गानामिव चिच्छक्तिकणानामुत्पत्तिं विभाव्य, गन्धपुष्पैरभ्यर्च्य, धूपमुद्रां प्रदर्श्य, वामेन घण्टां वादयन्, पात्रमुद्धृत्य, देव्या घ्राणसमीपे प्रदर्श्य, नीचैः त्रिःप्रदक्षिणं परिभ्रमय्य, "धूपसूक्ष्मांशं रसं सकलै रसभोक्तरि प्रसन्ने विनिवेश्यो हि रसे यथोक्तदेशे" इत्युक्तरीत्या यथोपदेशं (शा?) यथास्थानं देव्यै मूलं "श्रीमहात्रिपुर-

88. एतानि नामानि ब्रह्माण्डपुराणान्तर्गते ललितोपाख्याने (3.4.18.14–17) सन्ति, यथा–'सिंहासनेशी ललिता महाराज्ञी वराङ्कुशा। चापिनी त्रिपुरा चैव महात्रिपुरसुन्दरी।। सुन्दरी चक्रनाथा च साम्राज्ञी चक्रिणी तथा। चक्रेश्वरी महादेवी कामेशी परमेश्वरी। कामराजप्रिया कामकोटिका चक्रवर्तिनी। महाविद्या शिवाऽनङ्गवल्लभा सर्वपाटला।। कुलनाथाऽऽम्नायनाथा सर्वाम्नायनिवासिनी। शृङ्गारनायिका चेति पञ्चविंशति नामभिः।।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सुन्दर्यै धूपः स्वाहा''इति मन्त्रेण समर्प्य, वामाग्रतो वा तत्पात्रं स्थापयेत्। ततस्तूष्णीं जलं दत्वा धूपदीपादिसमर्पणं कुर्यात्। नेत्रेषु प्रदर्शनं धूपपदस्थाने दीपपदमिति विशेषः। समर्पणान्ते दीपपात्रं स्थापनं च घृतपूर्णत्वे दक्षिणतस्तैलपूर्णत्वे वामत इति ध्येयम्।

अथ निवेद्यसमर्पणम्। देव्याः पाद्यमाचमनीयमर्घ्यं च दत्वा, देव्याः पुरतो गोमयेन कल्पिते पिष्टादिचूर्णैरलङ्कृते चतुरस्रमण्डले देव्याः परिवारदेवतानां च पृथक् पृथक् पात्रेष्वेकस्मिन् वा पात्रे निवेद्यमानीय, देव्याः पुरतः स्थापयित्वा, निवेद्योपरि बिल्वदलाद्यारभ्य तत्पत्रं निक्षिप्य, तां हृदयेन प्रोक्ष्य, तालत्रया दिग्बन्धनावगुण्ठनधेनुमुद्राः प्रदर्शयेत्। तालत्रयेण मन्त्रः दिग्बन्धने भूर्भुवस्स्वरोमिति मन्त्रः। अस्त्रमन्त्रेण वाऽवगुण्ठने कवचं धेनुमुद्रया ''३ अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं स्रावय स्रावय स्वाहा'' इति मन्त्रः। ततोऽन्नमुद्रां पर्वतमुद्रां च प्रदर्श्य, पूर्ववन्निक्षिप्तं पात्रमुद्धृत्य, अस्त्रेण परिषिच्य, हृदयेन प्रत्येकमापोशानं दत्त्वा, सपुष्पया मृगीमुद्रया पूर्वं गणपतये निवेद्य, तत्पुष्पं विसृज्य, हस्तं प्रक्षाल्य, मूलं ''श्रीमहात्रिपुरसुन्दर्यै स्वाहा''इति शिवायै निवेद्य, पञ्चवारं त्रिवार-मेकवारं वा निवेद्यदानाभिनयवत्या सपुष्पया मृगमुद्रया निवेद्यं दत्वा, पानीयं च प्रदाय, तत्पुष्पं विसृज्य, हस्तं प्रक्षाल्य, परिवारदेवताभ्यो पृथक् पृथक् निवेद्यं दद्यात्। ततः शिवयोस्सुगन्धिपानीयं दत्वा, नमोन्तमूलेन शिवयोश्शिरसि पुष्पं निक्षिप्य, समर्प्य, देवीं सपरिवारां भुञ्जानां ध्यात्वा नित्यहोमः कार्यः। तदशक्तौ नित्यजपदशांशद्विगुणजपः कर्त्तव्यः।

ततो वामभागस्थापिते पात्रे तत्त्वमुद्रया विशेषार्घ्यबिन्दुसहितं बलिं गृहीत्वा, ''३ ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं [फट्] स्वाहा'' इति षोडशाक्षरीबलिविद्यया सर्वभूतबलिं दत्वा, तदुपरि

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पुष्पं निक्षिप्य, "३ सर्वभूतेभ्यो नमः" इति मन्त्रेण प्रणम्य, तालत्रयं कृत्वा, तृप्तान् ध्यात्वा, तान् विसृजेत्।

ततो देव्यै पुष्पाञ्जलिं दत्वा, पूर्ववत् देव्यै रसं समर्प्य, देवीं सपरिवारां ध्यात्वा, स्वधान्तमूलेनाचमनं दत्वा, देव्यास्सव्यवामहस्तयोरुद्वर्तनार्थं कर्पूरादिगन्धं दत्वा, हस्तक्षालनगण्डूश(ष)-पादक्षालनानि भावयेत्। सर्वाणि च निर्माल्यभूता(त)निवेद्यान्युद्धृत्य, अस्त्रेण प्रोक्षिते स्थले पूर्वोद्धृतनिर्माल्यगन्धकुसुमाद्यैर्निवेद्यैकदेशेन च ईशान्यभागे निर्माल्यवासिनीं चण्डिकां पूजयेत्। अथ मुखवासताम्बूलं च निवेदयेत्। मुखवासन्नाम एलालवङ्गतत्को(कक्को)लजातीफल-कर्पूरचूर्णम्, मध्यमं केवललवङ्गम्, अधमं ताम्बूलं प्रसिद्धमेव।

ततो मूलमन्त्रेण विशेषार्घ्यं दत्वा, एकत्रिपञ्चसप्तनवावृत्तियुक्तं दीपं प्रदृश्य(दर्श्य), पञ्चफणनागचक्रपद्मपुरुषा(ष)मृगगजारूढ-देवेन्द्राद्याकृतिपात्रनिहितान् दीपानपि यथाविभवं प्रदृश्या(दर्श्य) आरात्रिकं कुर्यात्। तत्प्रकारः– सुवर्णाद्यन्यतमे वर्तुले पात्रे चतुर्विंशत्यङ्गुलिं तदर्धं तत्तृतीयांशाद्यन्यतमसा(स्था)नायामे सहजेषु शाली(लि) पिष्टादिकृतेषु नवसु पञ्चस्वेकस्मिन् वा दीपाधारेषु दीपानारोप्य, त्रिपाद्यां विन्यस्य, निरीक्षणादिभिः संस्कृत्य, नव चेन्मध्ये सूर्यम्, दिक्षु गुरुशुक्रबुधचन्द्रान्, विदिक्षु भौमशनिराहुकेतून्, पञ्च चेन्मध्ये वह्निम्, दिक्षु गगनवायुजलपृथिवीरेकश्चेत् वह्निं चाभ्यर्चयेत्। यद्वा नवपञ्चकदीपेषु वामादिशक्तिः(क्तीः), पञ्चब्रह्माणि, शिवं चार्चयेत्। एवं गन्धपुष्पधूपदीपैरभ्यर्च्य, दिग्बन्धनमस्त्रेण कृत्वा, सुरभिमुद्रां प्रदृश्य(दर्श्य), पाणिभ्यामुद्धृत्य, देव्याः शिरसि हृदये पादयोस्त्रिस्त्रिर्भ्रामयित्वा भूमौ स्थापयेत्। सुवर्णादिनिर्मितैर्वृत्ताकारै-श्चतुरस्राकारैर्वा समुकुलाग्रशालिनालयुक्तैः सहजशालिपिष्ट-कृताद्यन्यतरदीपासनयुक्तैर्दीपासना(न)निहितकर्पूरादिवर्तिष्वारोपित-

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

दीपैः नीराजनपात्रैर्नीराजनान्यपि निरीक्षणसंस्कृतान्यारात्रिकवत् भ्रामयित्वा भूमौ विन्यस्यास्त्रेण निर्वापयेत्।

अथ दर्पणछत्रचामरव्यजनतालवृन्तानि क्रमात् तत्तन्नाम-मन्त्रैः "दर्पणं नमः" इत्यादिभिः समर्प्य, मूलं "सुप्रसन्नश्रीमहात्रि-पुरसुन्दरीश्रीपादुकां पूजयामि" इति मन्त्रेण त्रिःपुष्पाञ्जलिं दत्वा, ततः पूजया सन्तुष्टां स्वाभिमुखकृताञ्जलिपुटसकलभोगाङ्ग-शक्तिचक्रसेव्यामम्बायागमन्दिरं द्वारबाह्यस्थब्रह्मोपेन्द्रमहेन्द्रचन्द्र-सूर्यादिस्तूयमानामपारकरुणामृतपूर्णां भक्तजनसकलाभीष्टप्रदां च देवीं ध्यात्वा, पूजासाद्गुण्यार्थं यथाशक्ति मूलं जपेत्। तदर्थं च ऋष्यादिषडङ्गन्यासान्ते कामकलाध्यानं कुर्यात्। तच्चावश्यकं तन्त्रराजादिषु नित्यतया विधानात्। तद्यथा–

शिवशक्तिरूपकुलाकुलकुण्डलिनीद्वयमेलनोदितप्रथम-बिन्दुदेवीस्वरूपतया ध्यातस्य स्वदेहस्य मुखं ध्यात्वा, "ऐं ह्रीं श्रीं क ए ई ल ह्रीं श्रीमहात्रिपुरसुन्दरीपरारूपचक्रश्रीपादुकां पूजयामि" इति चक्रे व्यापकं विन्यस्य, प्रथमबिन्दुस्पन्दरूपबिन्दुद्वयं कुचयुग्ममनुस्मृत्य, "ऐं ह्रीं श्रीं ह स क ह ल ह्रीं [श्री]महात्रिपुर-सुन्दरीकलापदवाच्य अग्निषोमात्मकस्तनयुगलश्रीपादुकां पूजयामि" इति स्तनयोर्व्यापकं विन्यस्य, हार्द्धकलां योनिं विचिन्त्य, "ऐं ह्रीं श्रीं श्रीमहात्रिपुरसुन्दरीसपरार्द्धकलाव्यञ्जकरेखात्मकश्च(स्व)-योनिश्रीपादुकां पूजयामि"[89] इति नाभेरधोभागे व्यापकतया विन्यस्य गुरुदेवतामन्त्रात्मनामैक्यं परिभावयेत्।

तत्र कामकला नाम "**कामः कमनीयतया कला च दहनेन्दुविग्रहौ बिन्दू**" (का.क.वि. श्लो.7) इत्यभियुक्तरीत्या शिवशक्तिसामरस्यं कामशब्दार्थः। तेषां च प्रसिद्धशुक्लशोणित-

89. मन्त्रेऽस्मिन् पूर्वसन्दर्भानुसारेण तृतीयकूटयोजनमावश्यकम्।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सामरस्यसदृशत्वात् कौलिकानां त्रिषु तेषु बिन्दुव्यवहारः। तदेव बिन्दुत्रयं कामकलाशब्दवाचाग्नीषोमात्मकशिवशक्तिसन्निधानजन्य-नामरूपात्मकं प्रपञ्चोत्पत्तिनिदानम्। नादब्रह्माङ्कुरो हार्द्धकलाशब्देन उच्यते। ततश्च बिन्दुत्रयं सपरार्द्धकला च देव्या निष्कलं रूपम्, स एव बिन्दुत्रयहार्द्धकलासमुदायः, बिन्दुत्रयवाचिनापि कामकलाशब्देन तत्प्रधानत्वाद् व्यपदिश्यते। ततश्च बिन्दुत्रयहार्द्धकलासमुदायस्य कामकलात्वमिति निष्कर्षः। तद्वाचकत्वादीकारस्य कामकलात्वं, तदभिव्यञ्जकत्वात्तल्लिपेरपि कामकलात्वं, तस्मादीकारलिपिरेव कामकलायास्सकलं रूपम्। तद्ध्यानप्रकारश्च तन्त्रराजादिषु दर्शितः। स एव पूर्वमस्माभिर्लिखितस्तत्र शिवशक्तिसम्मेलनजन्यबिन्दुमित्यादिना बिन्दुशब्दस्य श्लिष्टतया शिवशक्तिसामरस्यवाच्येव(च्यत्वेन) बिन्दुशब्दः लिप्यवयवबिन्दुद्वौ तत्सामरस्याभेदाद्य(ध्य)वसायेन व्यवह्रियत इति दिक(ग)र्थः।

अथ स्वदेहामृतवर्षप्लाविताशेषदिक्तटचन्द्रमण्डलद्वयमध्य-वर्त्तितया चिन्तनेनात्मरक्षां विधाय, अद्रुताविलम्बितनादान्तोच्चारित-मन्त्रार्थानुसन्धानरूपं मन्त्ररक्षासम्पादनपूर्वकं मातृकाक्षमालया मूलजपं कुर्यात्। यथा–

[90]ब्रह्मरन्ध्रे धवलाष्टदलं चतुरस्रयन्त्रपरिश्रितं पद्मं भावयित्वा, तस्य कर्णिकायां व्योम तत्पूर्ववर्णचतुर्दशस्वरविसर्जनीयसमुदायरूपं बीजं केसरेष्वष्टस्वरद्वन्द्वानि दलेषु मातृकाया अष्टवर्गां चतुरस्रस्य दिक्षु सुधाबीजं विदिक्षु च सप्तमं वर्णं च भावनीयम्। एवं रूपं

---

90. अथ 'ब्रह्मरन्ध्रे धवलाष्टदलम्' इत्यारभ्य 'मन्त्रः प्रदर्श्य इत्युपदेशः' (पृ. 90) इत्यन्तः सन्दर्भः शिवार्चनचन्द्रिकातः (पृ. 93) एव परिगृहीतः।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मातृकापद्मं[91] भावमात्रेण विश(ष)रोगमृत्युहरम्।

ततो गुदद्वाराकुञ्चनोद्गतवायुसंधुक्षितमूलाधाराग्निशिखया कुण्डलिनीशक्त्या सह सुषुम्नरन्ध्रं प्रविश्य, ब्रह्मरन्ध्रपर्यन्तमुद्गतया स्पृष्टात् तन्मातृकापद्मात् स्पन्दितां क्षकाराद्यकारपर्यन्तवर्णपङ्क्तिरूपामृतबिन्दुसन्ततिं ब्रह्मरन्ध्रप्रभृतिमूलाधारपर्यन्तं व्याप्यावतिष्ठमानां विभावयेत्।[92] या कुण्डलिनीशक्तिर्वह्निशिखासामरस्येन प्रकाशमाना सुषुम्नामार्गेण ब्रह्मरन्ध्रपर्यन्तमुद्गतया स्पृष्टात् तन्मातृकापद्मात् स्पन्दितां क्षकाराद्यकारपर्यन्तं वर्णपङ्क्तिरूपामृतबिन्दुसन्ततिं ब्रह्मरन्ध्रप्रभृतिमूलाधारपर्यन्तमुद्गता, सैव मातृकापद्मविद्रुतामृतबिन्दुस्पन्दसन्ततिसामरस्येनामृतायमाना परमानन्दरूपिणी मातृकाशक्तिरिति च भावयेत्। तदाहुः–

प्रकाशमानां प्रथमप्रयाणे प्रतिप्रयाणे त्वमृतायमानाम्।
अन्तःपदभ्यामनुसञ्चरन्तीमानन्दमुद्रामवलोकयामः ॥

इति एनामक्षरमालां हृत्पुण्डरीकमध्यगतदीपाकारपरमेश्वरप्रभारूपशब्दमयपराख्यशक्तिनिःसृतां च विभावयेत्। तदग्रे च मूलमन्त्रं नवरत्नमयकल्पलताग्रे पुष्पमिव निःसृतं विभाव्य, अकारं बिन्द्वन्तमुच्चार्य,

---

91. मातृकापद्मस्वरूपं नित्योत्सवे (पृ. 9) उद्धृतम्। यथा– 'व्योमेन्द्वौरसनार्णकर्णिकमचां द्वन्द्वैः स्फुरत्केसरं, पत्रान्तर्गतपञ्चवर्गयशळार्णादित्रिवर्गं क्रमात्। आशास्वश्रिषु लान्तलाङ्गलियुजा क्षोणीपुरेणावृतं, वर्णाब्जं शिरसि स्थितं विषगदप्रध्वंसि मृत्युञ्जयम्।। इति। अस्यार्थः–अस्य कर्णिकायां 'सौः' इति बीजम्। अं आं इत्यादि द्वन्द्वैः स्वरैः केसराण्यङ्कितानि। पत्रभागेषु कादिपञ्चवर्गः, यशळा इति त्रिवर्गश्च क्रमेणास्मिनष्टदले कमले। दिक्षु विदिक्षु च वं ठं इति बीजद्वयेनयुतं भूपुरम्। इदं मातृकायन्त्रमप्युच्यते।

92. इयमेवान्तमार्तृकान्यासभावना।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मूलमन्त्रजपं कुर्यात्। ततः अकारादिष्वपि उक्तक्रमेण मूलमन्त्रजपं कुर्वन् ळकारपर्यन्तं जपं कृत्वा, क्षकारमेरुं कृत्वा, ततः मूलमन्त्रमुच्चार्य ळकारं विसर्गान्तमुच्चरेत्। अनेनैव रूपेण अवरोहक्रमेण हकाराद्य-कारपर्यन्तं जपं कुर्यात्। एवं कृते मातृकासंपुटितः जपो भवति। तत्र च आरोहे मातृकावर्णानां बिन्द्वन्तानां मन्त्रात् पूर्वमुच्चारणमवरोहे च तेषां विसर्गान्तानां मन्त्रान्ते उच्चारणमिति विशेषः। एवं कृते जपस्य शतसंख्या भवति। पुनः स्वरादिवर्गाष्टकजपकृते अष्टोत्तरशतसंख्या भवति। अथ मातृकया जपः पुरश्चरणं विना मन्त्रः प्रदर्श्य इत्युपदेशः।

तत्र जपप्रकारः प्रदर्शितः योगिनीहृदये। यथा–

कूटत्रये महादेवि कुण्डलीत्रितयेऽपि च।
चक्राणां पूर्वपूर्वेषां नादरूपेण योजितम्॥

(यो.हृ. 3.169–170)

इति। अस्यार्थः[93]–[कूटत्रये] कूटानां वाग्भवकामराजशक्तिबीजा-[ख्या]नां त्रये। कुण्डलीत्रितये कुण्डलीनां त्रये। आधारहृदयभ्रूमध्येषु स्थितानां बीजत्रयशिखरवर्तिकामकलान्तर्गतसपरार्धकलारूपाणां वह्निसूर्यसोमकुण्डलीनां [त्रये] चक्राणां पूर्वपूर्वेषाम्। पूर्वं चक्रन्यासे अकुलादिबिन्द्वन्तेषु नवसु भावनीयत्वेनोक्तानां त्रैलोक्य-मोहनादिचक्राणामेकैकस्मिन् बीजे कुण्डलिन्यां च त्रिशो विभज्य योजितानां नादरूपेण योजितं योजनमित्यर्थः। ध्यानमिति यावत्। तथा च त्रैलोक्यमोहनादिचक्रत्रयस्याधारवह्निमण्डलस्थितवाग्भ-वशिखरवर्तिका[मक]लान्तर्गतहार्द्धकलारूपवह्निकुण्डलि-न्युत्थानोदितहृद्गतकामराज[बीज]पर्यन्तं व्यापिनादमयताभावनं

93. अत्र प्रायेण योगिनीहृदयदीपिकास्थितः सन्दर्भ एव (पृ. 358) सर्वोऽपि परिगृहीतः।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वाग्भवबीजजपः। सर्वसौभाग्यदायक[ादि]चक्रत्रयस्य हृदय-[स्थ]सूर्यमण्डलस्थितकामराजबीजशि[ख]रवर्तिकामकलान्तर्गत-हार्द्धकलारूपसूर्यकुण्डलिन्युत्थानोदितबिन्दुस्थानगतशक्तिबीजपर्यन्तं व्यापिनादमयताभावनं कामराजबीजजपः। सर्वरोगहरादिचक्रत्रयस्य बिन्दुस्थानेन्दुमण्डलगत(लान्तर्गत)शक्तिबीजशिखरवर्तिकामक-लान्त[र्गत]हार्द्धकलारूपसोमकुण्डलिन्युत्थानोदितेन ब्रह्मरन्ध्रो-परिस्थि[तशिव]तत्त्वातीतसमनासोमपर्यन्तव्यापिना नादेन सहोन्मन्यां लयभावनं शक्तिबीजजप इत्यर्थः।

ननु प्रतिबीजं हकारबीज[रेफ]ईकारबिन्द्वर्धचन्द्रनिरोधि-नादनादान्तशक्तिव्यापिनीसमनोन्मनाख्यद्वादशकलाः सन्ति। तत्र तृतीयबीजस्यैव उन्मनाकलान्तमुच्चारणम(णं)[वि]हितम्। प्रथमद्विती-[य]योस्तु नादान्तमेव उच्चारणमुक्तम्। किमत्र नियामकमिति चेदुच्यते— वाग्भवकामराजयोः सृष्टिस्थितिरूपत्वाद्विश्वातीतोन्मना-पर्यन्तमुच्चारणं [न] कर्तव्यमिति योगिनीहृदये अभिधानमेव नियामकमिति। अत्र द्वादशकलासु हकाररेफईकारबिन्दवः प्रसिद्धाः, अर्द्धचन्द्रादयोऽष्टकला अप्रसिद्धाः। ताः कुत आगताः? किं मात्राः? किमाकारलिप्याभिव्यङ्ग्या? इत्याकाङ्क्षायामर्द्धचन्द्रादिकलानां स्वरूपं विविच्यते।

मन्त्रजपो नाम मन्त्रोच्चारणम्। ततश्च जपोत्पन्नमन्त्रात्मक-शब्दस्य अतिसङ्कुचितविवरसुषुम्नानाडीगतत्वेन कदम्बमुकुलन्यायेनैव उपर्यधोभावेन उत्पत्तिरङ्गीकर्तव्या। तत्र च घण्टाक्वणस्यैव क्रमेण उत्पत्तिर्नादशब्दाः। अर्द्धचन्द्रादिनिश्शब्दैर्व्यवह्रियते। अन्तरुत्पन्नस्य शब्दस्य उन्मनीस्थाने लयः स्वीक्रियते। ततश्चार्द्धचन्द्रादय अष्टकला इति व्यवहाराः। तत्र बिन्दोरर्धमात्रत्वं प्रसिद्धम्। अर्द्धचन्द्रस्य तु पादमात्रा, निरोधिन अष्टमांशमात्रा, नादस्य षोडशांशमात्रा, नादान्तस्य

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

द्वात्रिंशांशमात्रा, शक्तेश्चतुष्षष्ट्यंशमात्रा, अष्टाविंशत्यधिकशतांश-मात्रा समनायाः, षट्पञ्चाशदधिकं द्विशतमात्रा उन्मन्यास्तु, मनोन्मन्यास्तु मनोगम्यसूक्ष्मत्वाद्विशिष्य ज्ञातुं न शक्यते।

बिन्द्वभिव्यञ्जका रेखा प्रसिद्धैव। अर्धार्धचन्द्रस्य ऊर्ध्वाग्रार्ध-वृत्ताकारः, निरोध ऊर्ध्वाग्रत्रिकोणाकारा, नादस्य बिन्दुद्वयमध्यगत-दण्डाकारा, नादान्तस्य दक्षिणपार्श्वस्थितबिन्दुसहितोर्ध्वाग्रदक्षिण-मुखहलाकारा, शक्तेः वामपार्श्वस्थितबिन्दुसहितोर्ध्वाग्रवा-ममुखहलाकारा, व्यापिन्या दक्षिणपार्श्वस्थितबिन्दुसहितोर्ध्वा-ग्रत्रिशूलाकारा, समनायाः बिन्दुद्वयान्तरालगतकुब्जरेखाद्वयमध्य-स्थितऋजुरेखाकारा, उन्मन्यायाः बिन्द्वधिष्ठानकोर्ध्वाग्रऋजुरेखाकारा, तासां कलानामुपासनार्थं वर्णभेदा अधिष्ठा[न]देवताश्च विस्तरभयान्न लिखिताः।

[94]एवं जपं कृत्वा स्वकृतस्य जपादृष्टस्य विस्मय(स्मरण)-संकीर्तनकर्मनाशाजलस्पर्शादिभिर्विनाशशङ्कया स(त)त्क्षणा(णं) देवताहस्ते निक्षेपरूपसमर्पणं कुर्यात्। यथा– वामकरतले अस्त्रकवच-हृदयान्युपर्युपरि विन्यस्य, तदुपरि जपकाले दक्षिणहस्तस्य कनिष्ठिकानामिकामध्ये धृतमेकपुष्पं निधाय, हृदयकवचास्त्रै-स्संपुटीकृत्य, अस्त्रेण संपुटीं कवचेनावगुण्ठ्य, दक्षिणहस्ते पुनर्गृहीत्वा, पूर्णचन्द्रोपमं जप(पं) तद्गतं ध्यायन् हृद्यप्रदेशे निधाय, भूतलनिवेशितदक्षिणजानुर्भूत्वा–

"ॐ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम्।
सिद्धिर्भवतु मे येन त्वत्प्रसादात् त्वयि स्थिते॥

94. 'एवं जपं कृत्वा' इति सन्दर्भादारभ्य ग्रन्थावसानं यावत् सर्वोऽपि विषयः शिवार्चनचन्द्रिकातः (पृ. 95-129) एव परिगृहीतः। यत्र तु देव्याः सन्दर्भास्तत्र पद्धत्यनुसारेण पाठभेदः स्वीकृतः।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ॐ शिवायै स्वाहा श्रीपरमशिवे त्वयि निक्षिपामि" इति जपार्घ्याम्बु-चुलुकोदकेन साक्षतकुशपुष्पेण शिवायाः हस्ते निवेदयेत्। मन्त्रश्लोकस्य अयमर्थः–

गुह्यादि(ति)गुह्यानां मन्त्रत्वादीनां गोप्त्री त्वमेव। अतः सर्वगोप्त्रीत्वादस्माकं जपमपि गृहाण! यस्मिन् जपे त्वयि स्थिते त्वत्प्रसादादस्माकं भुक्तिमुक्तिरूपा सिद्धिर्भवत्येव। तस्मान्मयि कृपया तद्गृहाणेति।

ततः स्वकृतकर्मसमर्पणपूर्वकं आत्मनिवेदनं कुर्यात्– "इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा। मां मदीयं च सकलं अस्मद् स्वामिन्यै श्रीमहात्रिपुरसुन्दर्यै नमः" इति सम्यगर्पयेत्।[95] "ॐ तत्सत्" इति मन्त्रेण प्रागुक्तरीत्या चुलुकोदकेन निवेदयेत्। अस्य च तवाहमस्मीत्य-नुसन्धानरूपस्यात्मनिवेदनस्याङ्गपञ्चकमाहुः–

"आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनम्।
रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा।।
अकार्पण्यां च"[96] इति।

---

95. एतद्विषये नीलकण्ठदीक्षितस्यानन्दसारस्तवस्य (श्लो. 33) पद्यमिदं तुलनार्हम्– 'किञ्चिन्मया श्रुतिषु किञ्चिदिवागमेषु, शास्त्रेषु किञ्चिदुपदेशपथेषु किञ्चित्। आघ्रातमस्ति यदतो भवतीं वरीतु, गोप्त्रीति काचिदुदपद्यत बुद्धिरेषा।।' इति।

96. 'आत्मनिक्षेपकार्पण्ये' इत्येवं लक्ष्मीतन्त्रे (17.60-61), ब्रह्माण्डपुराणे ललितोपाख्याने (3.4.41.76-77) च षड्विधा शरणागतिः प्रतिपाद्यते। अत्र तु आत्मनिवेदनस्य पञ्चाङ्गानि प्रतिपादितानि।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ततः श्रुतिस्मृतिपुरा[ण]दिव्यागमादिदृष्टैः पूर्वाचार्यकृतैः स्वकृतैर्वा स्तोत्रैर्यथासम्भवं स्तुवीत। स्वकृतैः स्तोत्रं श्रुतितुल्यमिति पौराणिकाः। ततः पुष्पाञ्जलिसमर्पणपूर्वकं प्रदक्षिणत्रयं कृत्वा, पञ्चधा प्रणम्य, पुनः प्रदक्षिणं कुर्यात्। ततः पुष्पाञ्जलिं दत्वा–

न्यूनं वाप्यधिकं वापि यन्मया मोहतः कृतम्।
सर्वं तदस्तु सम्पूर्णं त्वत्प्रसादान्महेश्वरि॥

इति सुप्रार्थ्य,

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया।
दासोऽहमिति मां मत्वा क्षमस्व परमेश्वरि॥

मातः क्षुद्रेण दासेन मलीमसधिया मया।
कदर्थितासि यद्भक्त्या शिवे प्रीता क्षमस्व तत्॥

इति ज्ञाप्य "३ अर्घ्यदेव्यश्चक्रदेव्यङ्गे विलीनास्सन्तु स्वाहा" इति मन्त्रेण पुष्पक्षेपपूर्वकं अर्घ्यदेवीनां तेजोरूपाणां चक्रदेव्यङ्गे लयं भावयित्वा, "३ चक्रदेव्यो मूलदेव्यङ्गे विलीनास्सन्तु स्वाहा" इति मन्त्रेण, तथैव तासां मूलदेव्यङ्गे लयं भावयित्वा "३ मूलदेवी (च?) स्वात्मनि विलीनाऽस्तु स्वाहा' इति मन्त्रेण तस्याश्चानुग्रहार्थ–परिगृहीतमुहूर्तस्सच्चिदानन्दात्मिके स्वात्मनि लयं भावयित्वा, "मूलम्–

महापद्मवनान्तःस्थे कारणानन्दविग्रहे।
सर्वभूतहिते मातः एह्येहि परमेश्वरि॥

श्रीमहात्रिपुरसुन्दरि क्षमस्व क्षमस्व हृदयारविन्दे पुनरुद्वासयामि" इति मन्त्रेण तां तेजोरूपां संहारमुद्रास्थितपुष्पाञ्जलावानीयावाहनपथेन हृदयारविन्दे नीत्वा, तद्गतश्रीनगरमध्यवर्तितद्दिव्यमङ्गलविग्रहेण

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

संयोज्य, सुप्रसन्नां देवीं ध्यात्वा, पञ्चोपचारान् कृत्वा, पुनः ऋष्यादिषडङ्गन्यासध्यानानि कुर्यात्।

ततो निर्माल्यवासिनीं पूजयेत्। यथा–ऐशान्यां त्रिकोणवृत्त–चतुरस्रात्मकं मण्डलं कृत्वा, तत्र श्रीचक्रनिर्माल्येन "ॐ त्रिपुरचण्डिकायै नमः" इति मन्त्रेण त्रिपुरचण्डिकां संपूज्य, नैवेद्यस्य शतांशं सहस्रांशं वा गृहीत्वा,

ॐ लेह्यचोष्यान्नपानादिताम्बूलं स्रग्विलेपनम्।
निर्माल्यभोजनं तुभ्यं ददामि श्रीशिवाज्ञया।।

इत्युच्चार्य निर्माल्यजलेन दद्यात्। ततो हस्तौ प्रक्षाल्य क्षमस्वेति तान् विसृजेत्। मूलेनार्घ्यजलं पीत्वा-

शङ्खमध्यस्थितं तोयं भ्रामितं ललितोपरि।
अङ्गलग्नं मनुष्याणां ब्रह्महत्यायुतं दहेत्।।

इत्यादिना शङ्खजलेनात्मानं प्रोक्ष्य,

अकालमृत्युहरणं सर्वव्याधिविनाशनम्।
समस्तपापहरणं साम्राज्ञी चरणोदकम्।।

इत्यभिषेकजलं पीत्वा, निर्माल्यधारणं कृत्वा, तन्निवेदितं तद्दास-बुद्ध्या भुञ्जीत।

अग्निकार्यार्थं भोजनं कुर्वाणस्तु निवेद्यशेषं भुञ्जीत। निवेदितभोजिनामनिवेदितभोजिनां च भोजनकालादन्यत्र प(य)दौषध-ताम्बूलपानीयादिभोज्यं गन्धपुष्पादिभिर्भोग्यं वा उपतिष्ठते। तत्पूर्व-मनसैव देवाय समर्प्यैव भोक्तव्यम्।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

पत्रं पुष्पं फलं तोयमन्नं पाद्यमथौषधम्।[97]
अनिवेद्य न भुञ्जीत भगवन्तं सदाशिवम्।।

इति कामिकवचनात्।

उपभोगायपुरतो वस्तु यद्यदुपस्थितम्।
तत्तत् समर्प्य देवाय विदधीतात्मसात्ततः।।

इति वातुलवचनाच्च। यत्तु–

[98]अन्नाद्यमौषधं तोयं पत्रं पुष्पं फलादिकम्।
शिवाय दत्त्वा तच्छेषं भोज्यं भुञ्जीत बुद्धिमान्।।

इत्यौषधादेर्निवेदितशेषस्य भोजनविधानं तदग्निकार्यार्थमनिवेदितभोजनं कुर्वतो औषधादिभोजनविषयम्। अन्यत्र तु– **"शिवदासानां शिवोच्छिष्टम्"** एव भोज्यम्। किं च यत्किञ्चित् फलमुद्दिश्य या क्रिया लौकिकी वैदिकी वा कर्तुमिष्यते, सा सर्वापि शिवाराधनरूपेति–भावेन कर्तव्या। तत्क्रियाजन्यसुखमपि शिवस्तद् भोक्तेति शिवे समर्प्य "एतद् भुक्तमेव सुखं मया भुज्यते" इति भावेन भोक्तव्यम्। एवं विनैव स्वयत्नमुपनताः शब्दस्पर्शरूपरसगन्धाख्यविषयाश्च शिवसमर्पणपूर्वकं तदुच्छिष्टबुद्ध्यैव स्वैन्द्रियैरनुभवितव्याः तत्तद् विषयानुजन्यसुखमपि तूच्छिष्टबुद्ध्यैव भोक्तव्याः।

या या क्रिया विधातव्या भक्तानां जायते पुरा।
तां तां कुर्यान्महादेव समर्पितधिया सुधीः।।
इन्द्रियादागतं किञ्चिद् यत्सुखं तच्छिवार्पितम्।
कृत्वा प्रसादं भोक्तव्यं तदिन्द्रियमुखेन च।।

इति वातुले श्रवणात्।

---

97. 'तोयमन्नपानाद्यमौषधम्' इति मातृकायाः मूलपाठः।
98. श्लोकोऽयं शिवार्चनाचन्द्रिकानुसारेण (पृ.114) सिद्धान्तशेखरस्य वर्तते।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

तदर्थं च भक्तेन सदा सावधानेन भाव्यम्।
संयोगेषु वियोगेषु सावधानो निरन्तरम्।
गच्छन् तिष्ठन् स्वपन् जाग्रत् भुञ्जानो मैथुने रतः।
यश्शिवं प्रीतचेतस्को भक्तिमान् स तु बुद्धिमान्।।

इति बृहत्कालोत्तरे श्रवणात्। एवं क्रियासमर्पणपूर्वकं क्रियाः कुर्वतो विषयसमर्पणपूर्वकं विषयाननुभवतो तज्जन्यसुखसमर्पणपूर्वकं सुखं भुञ्जानस्य च सावधानस्य भक्तस्य पूर्वजन्मवासनावशेन क्वचित् क्वचित् प्रमादान्निषिद्धक्रियां कुर्वतो निषिद्धविषयाननुभवतोऽपि निषिद्धसुखं भुञ्जानस्यापि न पापलेपो भवति, किन्तु सर्वं शिवाराधनमिति भावः। यतः सर्वं प्रीतय एव भवति। एवं प्रधानेन सर्वथा भावयितुमशक्तः प्रातर्वा पूजावसाने वा भविष्यदेव तत्समयपर्यन्तं संभावितानि क्रियाविषयाविषयानुभवतत्त(ज्ज)न्यसुखानि शिवाय समर्पयामीति युगपदेव समर्पयेत्। सर्वत्रापि समर्पणे नमोन्तशिवमन्त्र एव मन्त्रः। तस्य च शिवायेदं न ममेति भावनीयम्। स चार्थो मकारस्य जीवमकारस्य [वाचकस्य] षष्ठ्यन्ततया लभ्यत इति सर्वम् [एतद्] अतिरहस्यम्।

एवं प्रतिदिनं कुर्वन् विधिलौं(धिं लौ)किककार्यविचार-कालानप्य(नाद्य)न्तं शिवनामरूपानुसन्धानेन सफलपन्नं(पानान)-न्तरध्वनिगमागमाभ्यां विहरन्तीं निरतिशयप्रकाश(शा)मृतरूपिणीमा-नन्दरेखामपि सन्ततं चिन्तयन्, कामेश्वराङ्कपर्यङ्कां सच्चिदानन्दविग्रहां महात्रिपुरसुन्दरीं मनसावलोकयन्निष्टबन्धुभिः सह सुखमासीत्।।

।। इति श्रीमद्भारद्वाजकुलज[ल]धिकौस्तुभश्रीकण्ठमतप्रतिष्ठा-पनाचार्यचतुरधिकशतप्रबन्धनिर्वाहकश्रीमदप्पयदीक्षितसौदर्य-

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

श्रीमदाचार्यदीक्षितपौत्रेण श्रीनारायणदीक्षितात्मजेन श्रीनीलकण्ठ-दीक्षितानुजेन श्रीमदतिरात्रयाजिना विरचिता श्रीपदार्थव्यवस्था समाप्ता।। श्रीमहात्रिपुरसुन्दर्यै नमः। श्रीरस्तु। शुभमस्तु। श्रीपदार्थदीपिका समाप्ता। श्रीपदार्थव्यवस्थापुस्तकम्। गुरवे नमः। [श्री]मात्रे नमः।।[99]

99. इतः परम् "सुदर्शनेन लिखायितं" इति पाठः।

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

परिशिष्टम्

ग्रन्थकाराणां नामसूची

अतिरात्रयाजी 98
अप्पयदीक्षितः 2,97
अभियुक्तः 87
आचार्यदीक्षितः 98
केचित् 52, 67, 84
गीर्वाणेन्द्र[सरस्वती] 1
नारायणदीक्षितः 98
नीलकण्ठदीक्षितः 2, 98
पद्धतिकाराः 2, 14, 36
भगवत्पादः 3

उद्धृतग्रन्थसूची

इतिहासपुराणम् 1
उपनिषद् 1
कल्पसूत्रम् 3, 62
कामिकम् 96
कालिकापुराणम् 61
कूर्मपुराणम् 3
कूर्मवचनम्, कौर्मवचनम् 2
चतुःशतीः 5,77
चतुःषष्ठितन्त्राणि 3
ज्ञानार्णवः 67
तन्त्रराजः 3–5, 9,16,36,59, 70,82,87–88
तन्त्रसमुच्चयः 54
त्रिपुरार्णवः 15
दक्षिणामूर्तिसंहिता 64
दिव्यागमः 94
देव्यागमः 64
निगमागमः 97
पद्धतिः 4, 52
पुराणम् 1, 3, 94
प्रपञ्चसारसंग्रहः 17
फेत्कारिणीतन्त्रम् 18–19, 61
बृहत्कालोत्तरम् 97ण
ब्रह्मयामलम् 7
ब्रह्मवैवर्त[पुराणम्] 13
मन्त्रलिङ्गम् 33

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

माया[तन्त्रम्] 3
मेरुतन्त्रम् 36
योगिनीहृदयम् 21,35-36,52, 56,71,84,90-91
योगिनीहृदयव्याख्या(दीपिका) 51
रत्नकोष(शः) 17
रुद्रयामलम् 64
ललितार्चनमञ्जरी 16
वातुलम् 96
वामकेश्वरतन्त्रम् 14,59
वेदः 2
शक्तितन्त्रम् 1-2
शिवानन्दलहरी 1
शिवार्चनचन्द्रिका 15
शैवतन्त्रम् 1
शैवागमः 1-2
श्रीपदार्थदीपिका 98
श्रीपदार्थव्यवस्था 98
श्रुतिः 2,3,15,94
सौन्दर्यलहरी 3
सौभाग्यचन्द्रातपः 2,9,11,17,23
सौभाग्यपद्धतिः 14,30
स्मृतिः 3,9,15,94
स्वच्छन्दपद्धतिः 33

मतान्तरसूची

कापालम् 2
तन्त्रम् 2
तान्त्रिकः 9
पद्धतिः 4,52
पाञ्चरात्रम् 2
पाशुपतम् 2
पौराणिकाः 94
भैरवम् 2
मोहशास्त्रम् 2-3
लागुडम् 2
वामपाशुपतम् 2
वामाचारः 2-3
वैदिकः 9
शाक्तम् 2
श्रीकण्ठमतम् 97

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

श्लोकार्द्धानुक्रमणी

अकार्पण्यां च	93	अपारस्पन्दमस्पन्दं	66
अकालमृत्युहरणं	95	अभीष्टसिद्धिं	74,76,77,83
अक्षसृक्कुम्भचिन्ता-	20	अश्विन्यादेः पुरो भागे	26
अङ्गलग्नं मनुष्याणां	95	आज्यं दधिमधून्मिश्रं	61
अङ्गुष्ठानामिकाभ्यां तु	66	आद्ययुग्मं तथा चैकं	25
अङ्गैश्च सहितास्सर्वे	57	आनन्दमुदितोल्लोल-	5
अघोरेभ्योऽथ	12	आनुकूलस्य संकल्पः	93
अत्युग्रामुग्रदंष्ट्रा-	26	आपूरितं महापात्रं	60
अत्र रुद्रा स्मृता	50	आयुधास्त्वतिरक्ताभाः	81
अनङ्गकुसुमाद्यास्तु	76	आसनं स्वागतं पाद्य-	66
अनर्घरत्नखचित-	6	इन्द्रियादागतं किञ्चिद्	96
अन्तःपदभ्यामनुसञ्चरन्ती-	89	ईशानः सर्वविद्यानामीश्वरः	12
अन्तर्दशारदेव्यस्तु	79	उद्यदादित्यसङ्काशां	8
अन्तर्लीनविमर्शप्रकाशरूपं	1	उपपातकरोमाणं	14
अन्नाद्यमौषधं तोयं	96	उपभोगाय पुरतो	96
अनिवेद्य न भुञ्जीत	96	उरुयुग्मे तथा जान्वो-	25
अनुज्ञां त्रिपुरे देहि	67	ऋग्वेदोऽथ यजुर्वेद-	56
अनौपम्यगुणोपेत-	6	एकं त्रयं तथा चैक-	26
अपराधसहस्राणि	94	एकं द्वयं त्रयं पश्चा-	26
अपसर्पन्तु ते भूताः	15,56	एकं युग्मं द्वयं द्वन्द्व-	26

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

एकमेकं द्वयञ्चेति 26
एकस्मिन्नथवा पात्रे 61
एकैकां पूजयेद् यो हि 69
एवं चतुर्विधो न्यासः 52
एवं यो न्यस्तगात्रस्तु 35
एवं सञ्चोदितो रुद्रो 2
ऐन्द्री श्यामलवर्णा च 72
ऐशान्ये विष्णुराग्नेये 64
कदर्थितासि यद्भक्त्या 94
कदलीललितस्तम्भ- 6
कपालमेणं कस्तूरी- 72
कम्बुग्रीवां महादेवीं पीनो- 21
कम्बुग्रीवां महादेवी मृणाल- 6
करशुद्ध्यादिकं- 36,52
कराम्बुजनखज्योति- 6
कर्पूरशकलोन्मिश्र- 7
कलशस्य मुखे विष्णुः 56
काननवृत्तद्व्यक्षिश्रुति- 20
कापालं लागुडं शाक्तं 2
कामः कमनीयतया 87
कालालिकुलसङ्काश- 5
किञ्चिदर्धेन्दुमुकुट- 5
कुक्षौ तु सागराः सर्वे 56
कूटत्रये महादेवि 90
कृत्वा प्रसादं भोक्तव्यं 96
कृष्णां देवीं त्रिवक्त्रां 28
कौमारी पीतवर्णा च 72
खड्गं वेतालकं चैव 72
खड्गचर्मधरं कृष्णं 14
गङ्गे च यमुने चैव 10
गङ्गे च यमुने देवि 57
गच्छन् तिष्ठन् स्वपन् 97
गणेशग्रहनक्षत्र- 18
गन्धपुष्पाक्षतयव- 61
गायत्रीं सुभगां मन्त्री 14
गुह्यातिगुह्यगोप्त्री 55,92
गूढगुल्फपदद्वन्द्वां प्रपदा- 6
गूढगुल्फपदद्वन्द्वामिन्द्रा- 21
चकार मोहशास्त्राणि 2
चक्राणां पूर्वपूर्वेषां 90
चतुर्भुजां त्रिनेत्रां च 6
चतुष्षष्ट्या तन्त्रैः 3
चामुण्डा कृष्णवर्णा च 72
जगदाकर्षणकरीं 7
जगदाह्लादजननीं 7
जपाकुसुमसङ्काशां 5
जातीलवङ्गकक्कोल- 61
जानामि धर्मं न च मे 8

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

ज्वलत्कालाग्निसङ्काशा	24	त्वं च धारय मां नित्यं	15
ततः पद्मनिभां	5,65	त्वगाद्याकारनिर्मुक्तं	36
ततस्संसेव्यते देवी	64	त्वदीयाश्च मदीयाश्च	81
तत्तत्तिथिमयीनित्यां	69	त्वया हृषिकेशि हृदिस्थ-	8
तत्तत्समर्पणविधौ	54	दासोऽहमिति मां मत्वा	94
तत्तत्समर्प्य देवाय	96	दीप्तास्यां देवदेवीं	27
तत्पुरुषाय विद्महे	12	देवीं ज्योतिःस्वरूपां	30
तत्संसर्गपदद्वन्द्व-	14	देवे युनक्तु सकले	54
तदर्थं च भक्तेन	97	देवैतदक्षभवशक्तिकरे	54
तनुदीर्घाङ्गुलीभास्वन्	6	देव्यः स्फटिकसङ्काशाः	79
तनुमध्यां पृथुश्रोणीं	21	द्रव्याभावे प्रदातव्याः	61
तर्पणानि पुनर्दद्यात्	69	द्विजादीनां तु संस्कारो	9
तस्मात्तां न त्यजेद्	15	धर्माधर्मकलास्नेह-	55
तस्मै तद्यादात्मपदं	8	धूम्रकृष्णं कृष्णधूम्रं	23
तस्यास्त्रिपुरसुन्दर्या	8	धृतचिन्तामहारत्ना	71,77
तां तां कुर्यान्महादेव	96	ध्यात्वा नाभिस्थपद्मे	28
ताम्रविद्रुमबिम्बाभ-	6	ध्यायेत् बालार्कसङ्काशां	21
तास्तु रक्ततरा वर्णै-	71,77	नतिपाण्योश्विनीमुख्या	24
तेन तन्मयता सिद्धिः	9	नमस्ते नाथ! भगवन्!	4
तेन सत्येन मे देव	10	नमोन्तानि महेश्वरी	82
तेषां च तत्र तत्रापि	9	नर्मदे सिन्धु कावेरी	10,57
तोयोर्व्यनन्तपवनानल-	54	नवचक्रात्मिकां देवीं	21
त्रिवलीवल्लिसन्नद्ध-	6	नवाय नवरूपाय	4
त्रैलोक्यचैतन्यमयेश्वरेशि	8	नागखेटकघण्टाख्यान्	72

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

नास्त्यस्य पूज्यो लोकेषु	35	पृथिव्यां यानि तीर्थानि	10
नितम्बबिम्बद्विरद-	6	पृथ्वि त्वया धृता लोका	15
निर्माल्यभोजनं तुभ्यं	95	प्रकाशमानां प्रथमप्रयाणे	89
नैर्ऋतायां गणेशानः	64	प्रकाशानां प्रकाशाय	4
न्यूनं वाप्याधिकं वापि	94	प्रतिपत्प्रभृतौ देवीं	69
पक्वदाडिमबीजाभ-	6	प्रत्यग्रकदलीकाण्ड-	21
पञ्चाशद्वर्णभेदैर्विदित-	20	प्रत्यग्रारुणसङ्काश-	5
पत्रं पुष्पं फलं तोयम-	96	प्रयोजयेत् पूजकस्तानु-	66
पद्मं दूर्वाक्रमादर्घ्य	61	प्रस्विन्नाननपद्ममाकुल-	1
पद्मरागप्रतीकाशां	5	प्रातःकाले	52
परतन्त्राय भक्तानां	4	प्रातः पाशाङ्कुशशरचाप-	8
पश्यन्ती परदेवताऽवतु	1	प्रातः समुत्थाय तव	8
पाञ्चरात्रं पाशुपतं	2	प्रातरारभ्य सायान्तं	8
पादार्धमुदकं पाद्यं	61	प्रातर्नमामि जगतां	8
पाद्यं श्यामाकदूर्वाब्ज-	61	प्रातर्नमामि पादाब्जं	8
पाशाङ्कुशधरा ह्येता	74	प्रातस्त्रिपुरसुन्दर्या नमामि च-	8
पाशाङ्कुशाभयवरान्	14	प्रातस्त्रिपुरसुन्दर्या नमामि प-	8
पिङ्गला पिङ्गलाबभ्रु-	33	बन्धूकाञ्चननिभं	48
पिनाकिधनुराकार-	5	ब्रह्मविष्णुशिरोरत्न-	6
पुटयोर्नासिकायाश्च	25	ब्रह्मविष्णुशिवाकारां	21
पुनः क्रमेण देवेशि	34	ब्रह्महत्या शिरस्कञ्च	13
पुरस्तात् पार्श्वयोः	4	ब्रह्माणी पीतवर्णा च	72
पुस्तकाक्षालिविलसत्	80	ब्रह्माण्डखण्डसंभूत-	60
पूरयेत् शास्त्रवर्त्मना	61	भक्ताऽनुग्रहसन्धान-	73

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

भक्त्या समर्पये तुभ्यं	74,83	यत्करोमि जगन्मात:	8
भवे भवेनातिभवे	13	यत्पाद्यमम्बु शिरसि	8
भास्वद्रत्नौघमुकुटां	14	यत्रैव भास्वानुदयं प्रयाति	64
भूतशुद्धिविहीनेन	18	यश्शिवं प्रीतचेतस्को	97
भ्रूमध्ये बिन्दुपद्मे	31	ये भूता: विघ्नकर्तार-	15,56
मधुपर्काचमनस्नान-	66	ये मन्त्रास्तन्मयी देवी	64
मध्ये तथा पूजकपूज्य-	64	या या क्रिया विधातव्या	96
मन्त्रा मूकत्वमायान्ति	19	रक्तं श्वेतं तथा रक्तं	23
महापद्मवनान्तस्थे!	65,94	रक्तं श्वेतं हरिद्वर्ण	33
महामृगमदोद्दाम-	7	रक्तपद्मनिविष्टां तु	6
महालक्ष्मीस्तु पीताभा	73	रक्तवस्त्रपरीधानां	6
मात: क्षुद्रेण दासेन	94	रक्तां रक्तत्रिनेत्रां	26
मातुलुङ्गफलं चैव	73	रक्ताम्भोधिस्थपोतोल्लसद्	18
मातृकापीठमध्यस्थां	21	रक्तोत्पलकपालाभ्याम-	50
माहेश्वरी पीतवर्णा	72	रक्तोत्पलदलाकार-	6
मुक्ताहारलतोपेत-	6	रक्षिष्यतीति विश्वासो	93
मुण्डव्योमस्थपद्मे	31	रविमुख्यान् कामरूपान्	23
मुद्रादेव्य: प्रसीदन्तु	73	ललाटे दक्षनेत्रे च	25
मूलमन्त्रेण मध्यस्थां	69	लावण्यकदलीतुल्य-	6
मूलाधारास्थपद्मे	30	लावण्यसरिदावर्ता-	6
मूले तत्रस्थितो	56	लेह्यचोष्यान्नपानादि-	95
मेदो धातुप्रविष्टाम-	29	लौहित्यजितसिन्दूर-	6
य: श्लोकपञ्चकमिदं	8	वरदाभयहस्ता च कुण्डिका-	72
यच्छानश्शर्म	15	वरदाभयहस्ता च ध्यात-	72

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

वरदाभयहस्ताश्च पूज्या 81
वशिन्याद्याः प्रसीदन्तु 80
वहन्नाडीपुटद्वारि- 7
वाग्देवी शरदिन्दुसुन्दर- 1
वामदेवाय नमो 12
वामोरुन्यस्तहस्तांश्च 23
वाराही श्यामलच्छाया 72
विद्यावतारसंसिद्ध्यै 4
विभ्राणमिन्दुशकला- 48
विभ्राणाऽसृक्कपालं 19
विवेकिनां विवेकाय 4
विशेषसमयी बिन्दौ 5
विश्वकर्मादिनिर्माण- 5
विष्णुपत्नि नमस्तुभ्यं 9
वेणीकृतलसत्केशा- 76
वैष्णवी श्यामवर्णा च 72
व्यञ्जनेष्वेकमुभयं 26
व्युत्क्रमात् कृष्णप्रति- 69
शङ्खमध्यस्थितं तोयं 95
शक्तयोऽपि तथा ध्येया 24
शक्तयो योगीपीठस्था- 50
शरीरं चिन्तयेदादौ 36
शर्करायुक्तपयसा 59
शिवदासानां शिवोच्छिष्टं 96
शिवाय दत्त्वा तच्छेषं 96
शीतांशुशतसङ्काश- 6
श्यामां शूलाब्जहस्तां 27
श्वेता वराभयकराः 78
श्रीगीर्वाणेन्द्रमहं प्रणमामि 1
श्रीमत्त्रिपुरसुन्दर्या 8
षड्वक्त्रां मज्जसंस्थां 31
षोढान्यासविहीनं यं 35
षोढान्यासस्तु यः प्रोक्तः 35
षोढान्यासेऽणिमाद्याश्च 36,52
संयोगेषु वियोगेषु 97
संरम्भश्लथमौलि- 1
संविन्मये महादेवि 67
संसारयात्रामनुवर्तमानं 8
स एव पूज्यः सर्वेषां 35
सदा मच्चित्तरूपेण 4
सद्यः सन्तप्तहेमाभां 14
सद्योजातं प्रपद्यामि 13
समस्तपापहरणं 95
समुद्रमेखले देवि 9
सर्वं तदस्तु सम्पूर्णं 94
सर्वदेवमयीं देवीं 7
सर्वभूतहिते मातः 65,94
सर्वमन्त्रप्रसिद्ध्यर्थं 19

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

सर्वमन्त्रमयीं देवीं	7	सोऽचिरान्मृत्युमाप्नोति	35
सर्वलक्ष्मीमयीं नित्यां	7	स्तनयोर्नाभिदेशे च	25
सर्वश्रृङ्गारवेषाढ्यां	7	स्थापयेदर्घ्यमम्बुना	59
सर्वाज्ञानतमोभेद-	4	स्पर्धातिरस्कारकलि-	8
सर्वासामपि सन्ध्यानां	15	स्फुरन्मयूखसंघात-	5
सर्वेभ्यः सर्वसर्वेभ्यो	12	स्फुरन्मुकुटमाणिक्य-	5
सर्वोपचारवस्तूना-	61	स्मितमाधुर्यविजित-	6
स विद्या स्मरणं	9	स्योना पृथिवी	15
सादीनां सर्ववक्त्रां	32	स्वतन्त्राय दयाक्लृप्त-	4
सितासितारुणश्याम-	34	स्वस्वप्रियाङ्कनिलयाः	24
सिद्धिर्भवतु मे येन	55,92	स्वाधिष्ठानाख्यपद्मे	29
सुगण्डमण्डलाभोग-	5	हरिर्हरो विरिञ्चिश्च	8
सुगन्धं सुमनो धूपं	66	हलं च मुसलं खड्गं	72
सुरापानहृदायुक्तं	13	हस्तपद्मैस्तु विभ्राणा	72
सुषुम्नावर्त्मना नित्य-	55	हृदि सामान्यसमयी	5
सूर्यकोटिप्रतीकाशं	65	हृद्दोर्मूलापरगलकक्षेषु	20
सूर्येन्दुमण्डलोद्योत-	21		

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
(केन्द्रीयविश्वविद्यालयः)
नवदेहली-110016

डॉ. शीतला प्रसाद उपाध्याय (Dr. Shitla Prasad Upadhyaya)